शास्त्रसंदेश-४२

# स्तोत्रसंदेशमाला

## शाश्वताशाश्वततीर्थानां स्तोत्राणि

१६



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-४२

# स्तोत्र संदेशमाला-१६

## शाश्वताशाश्वततीर्थानास्तोत्राणि

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.


પ્રકાશક-પ્રાપ્તિ સ્થાન

શાસ્ત્રસંદેશ

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૧૯

## शाश्वताशाश्वततीर्थानास्तोत्राणि


આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૨ + ૨૬૫ + ૨

સ્તોત્ર : ૯૨ શ્લોક : ૨૦૪૬


: પ્રમાર્જના :


પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.


: છંદ-સંયોજના :


પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.



ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.


વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!　　　અનુમોદનીય...!　　અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧૫-૧૬ ના
## દ્રવ્ય લાભાર્થી



## શ્રી જિનાજ્ઞા આરાધક શ્વે. મૂર્તિપૂજક તપગચ્છ જૈન ટ્રસ્ટ-મુલુંડ (રામબાગ)

*આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલી શ્રુતભક્તિની*
*અમો હાર્દિક અનુમોદના*
*કરીએ છીએ.*
*ટ્રસ્ટીગણ તથા કાર્યકરોના*
*અમો આભારી છીએ.*



*શાસ્ત્રસંદેશ, સુરત*





**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

*આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

---

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | अपारघोरसंसार-पारावार- | पू.आ.श्री हेमचन्द्रसूरि | १ |
| २ | वरधर्मकीर्तिऋषभो विद्या- | पू.आ.श्री धर्मघोषसूरि | २ |
| ३ | आराध्य श्रीजिनाधीशान् | पू.आ.श्रीजिनप्रभसूरि | ४ |
| ४ | नन्दीश्वरद्वीपमितैर्जिनानां | | ८ |
| ५ | यद्भूरतावनि-वनिता-विशाल- | पू.आ.श्री देवेन्द्रसूरि | ९ |
| ६ | श्रीपुण्डरीकाचलमौलिमौलि- | पू.आ.श्रीजयशेखरसूरि | ११ |
| ७ | देव: श्रीपुण्डरीकाख्यभूभृ- | पू.आ.श्री जिनप्रभसूरि | १५ |
| ८ | मोहध्वान्तवितानतानवनव- | पू.आ.श्री अमरप्रभसूरि | २८ |
| ९ | सिद्धिक्षेत्रं पदमिदमिति प्राप्त- | पू.मु. श्री विनयहंसगणि | ३० |
| १० | जय श्रीविमलाद्रीश जय | मुनिप्रवरश्रीविनयहंसगणि | ३४ |
| ११ | जगामयं श्रीवीरनाभिनन्दनोऽ- | पू.मु.श्री आनन्दवल्लभ वि. | ३४ |
| १२ | नम्रेन्द्रमण्डलमणीमयमौलि- | | ३६ |
| १३ | पूर्णानन्दमयं महोदयमयं | | ४१ |
| १४ | शत्रुञ्जयो नाम नगाधिराज: | | ४२ |
| १५ | धरणेन्द्रमुखानागा: पाताल- | | ४३ |
| १६ | श्री शत्रुञ्जय: पुण्डरीक:, | | ४४ |
| १७ | विमलगिरि मुत्तिनिलओ, संत्तुजो | | ४५ |
| १८ | वरधर्मकीर्तिविद्यानन्दमयो यत्र | पू.आ. श्री धर्मघोषसूरि | ४५ |
| १९ | शृङ्गारयन्तं गिरिमुज्जयन्तं, | पू.आ.श्रीजयशेखरसूरि | ४८ |
| २० | नामभि: श्रीरैवतकोज्जयन्ताद्यै: | पू.आ.श्री जिनप्रभसूरि | ५२ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २१ | राजीमतीयुवतिमानसराजहंसः, | पू.आ.श्री विजयचन्द्रसूरि | ५५ |
| २२ | सौराष्ट्र-राष्ट्र-वसुधा- | पू.आ.श्रीज्ञानचन्द्रसूरि | ५९ |
| २३ | स्वस्ति श्रियः सर्वजिनान् | पू.मु.श्री रविसागरगणि | ६२ |
| २४ | श्रीविमलगिरेस्तीर्थाधिपस्य, | श्री भारती | ६४ |
| २५ | आनन्दकन्दं प्रणिपत्य भक्त्या | | ६७ |
| २६ | आकण्ठामृतपूर्णचारुकलशैश्च- | | ६९ |
| २७ | अथ वैभारकल्पोऽयं | पू.आ.श्री जिनप्रभसूरि | ७१ |
| २८ | अर्हन्तौ प्रणिपत्याहं श्रीमन्ना- | पू.आ.श्री जिनप्रभसूरि | ७४ |
| २९ | भक्तिप्रणम्रसुरराजसमाज- | पू.आ.श्री मुनिसुन्दरसूरि | ७९ |
| ३० | श्रीअर्बुदाद्रिमुकुट-श्रीजीरा- | पू.आ.श्री सोमसुन्दरसूरि | ८४ |
| ३१ | अभिवन्द्य जगद्वन्द्यान् श्रीमतः | पू.आ.श्री जिनप्रभसूरि | ८४ |
| ३२ | जीयाज्जैत्रं पत्तनं पूतमेतद् | पू.आ.श्री जिनप्रभसूरि | ८६ |
| ३३ | उत्तुङ्गैर्विविधैर्नगैरुपलसच्छा- | पू.आ.श्री जिनप्रभसूरि | ८८ |
| ३४ | यः स्यादाराधको जन्तुः | पू.आ.श्री जिनप्रभसूरि | ९० |
| ३५ | सुराचलश्रीजिति देवनिर्मिते | पू.आ.श्रीजिनप्रभसूरि | ९१ |
| ३६ | पञ्चानुत्तरशरणा ग्रैवेयक- | पू.आ. श्री सङ्गमसूरि | ९३ |
| ३७ | तीर्थयात्राप्रचलितसंघ- | पू.आ.श्री जिनेश्वरसूरि | ९५ |
| ३८ | तीर्थेश्वरश्रीयुतविद्यमान- | उपाध्यायश्रीक्षमाकल्याणगणि | ९८ |
| ३९ | वन्दित्वा रचिताञ्जलिर्भगवता- | पू.पं. साधुमेरुगणि | १०२ |
| ४० | चतुर्विंशतिं तीर्थनाथान् प्रणम्य, | श्रीहरिकलशयति | ११८ |
| ४१ | सद्भक्त्या देवलोके, रवि- | पू.मु.श्री कल्याणसागर वि. | १२२ |
| ४२ | नगाधिराजं सुरराजसेवितं, | पू.मु.श्री मेदचन्द्र वि. | १२४ |
| ४३ | सद्विंशतिः श्रीजिननायकानां, | | १२५ |
| ४४ | स्मृत्वाऽहं शिखरेऽजितं गुण- | | १२६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४५ | सिद्धार्थोक्त्या वनान्ते खर- | | १२६ |
| ४६ | उत्कृष्टकाले विजयेष्वभूवन्, | | १२७ |
| ४७ | श्रीशत्रुञ्जयरैवताद्रिशिखरे द्वीपे | | १२८ |
| ४८ | श्री ऋषभवद्र्धमानकचन्द्रानन- | पू.आ. श्री तरुणप्रभसूरि | १२९ |
| ४९ | तीर्थाधिनाथमृषभं विभु वद्र्ध- | पू.आ.श्री तरुणप्रभसूरि | १३३ |
| ५० | त्रिदशपतिमुकुटतटगतमणि- | | १३४ |
| ५१ | जयकारसुपदमृषभं चन्द्रानन- | पू.आ.श्री विनयहंसगणि | १३७ |
| ५२ | श्रीमज्जिनर्षभाऽपारराजमान- | पू.मु.श्री देवविजयगणि | १४० |
| ५३ | चतुर्विंशतीहार्हता वन्दिताश्चा-, | | १४१ |
| ५४ | श्री पुण्डरीकगणभृत्प्रथमं प्रपेदे | पू.आ.श्री हीरविजयसूरि | १४३ |
| ५५ | यत्रार्हतां गणभृतां श्रुतपार- | पूज्यपाददेवनन्दी | १४५ |
| ५६ | सप्तत्यधिकशतप्रियधर्मक्षेत्र- | | १४७ |
| ५७ | सत्केवलज्ञानमहाप्रभाभिः, | | १४८ |
| ५८ | संसार-तारयाणं तियसासुर- | पू.आ. श्री सिद्धसेनसूरि | १५५ |
| ५९ | जे जग बंधण(व) तिहुयण | पू.आ. श्रीमुनिप्रभसूरि | १५८ |
| ६० | चत्तारि जिणवीसं ठाणेसु | पू.आ.श्री कीर्तिरत्नसूरि | १६३ |
| ६१ | चत्तारि अट्ठ दस दो अ | पू. आ. श्रीदेवेन्द्रसूरि | १६३ |
| ६२ | सिरिउसहवद्धमाणं चंदाणण- | पू.आ. श्रीदेवेन्दसूरि | १६५ |
| ६३ | नमिउणं सव्वजिणे, सिद्धे | पू.आ.श्री हरिभद्रसूरि | १६८ |
| ६४ | कल्लाणवल्लिजलहर पणमिय | | १६९ |
| ६५ | सिरिनिलय जंबुदीवो य | पू. श्रीमेरुमुनि | १७३ |
| ६६ | वंदिय नंदियलोयं जिणविसरं | पू.आ.श्री जिनवल्लभसूरि | १७७ |
| ६७ | वरकंचणरयणमय, वरकंचण | | १८० |
| ६८ | सुअधम्मकित्तिअं तं, तित्थं | | १८३ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ६९ | अईमुत्तय केवलिणा, कहिअं | | १८६ |
| ७० | सो आह सामि ! एसो | | १८९ |
| ७१ | समरवि सरसति हंसला- | | १९० |
| ७२ | अत्थि सुरट्ठाविसओ विसय- | | १९४ |
| ७३ | कल्लाणकेलिनिलयं, निन्नासं | | १९५ |
| ७४ | पणमिय नेमिजिणिंदं उज्झित- | पू.आ.श्री महेन्द्रसूरि | १९५ |
| ७५ | परमेसरतित्थेसरह, पयपंकय | पू.आ. श्री विजयसेनसूरि | २०० |
| ७६ | अत्थि सुरट्ठाविसए उज्जिंतो | पू.आ.श्री जिनप्रभसूरि | २०९ |
| ७७ | चउवीसंपि जिणिंदे सम्मं | पू.आ.श्री जिनप्रभसूरि | २१३ |
| ७८ | सिरिसत्तुंजयतित्थे रिसहजिणं | पू.आ. श्रीजिनप्रभसूरि | २१४ |
| ७९ | जयइ जयइ जिण-धम्मो | पू.आ.श्री जिनप्रभसूरि | २१५ |
| ८० | हिययसरोवरे धरिय गुरुराय | पू.आ.श्रीजिनवर्द्धनसूरि | २२० |
| ८१ | अरिहंतं भगवंतं सव्वन्नं | पू.आ.श्री मुनिचन्द्रसूरि | २२६ |
| ८२ | पणमिय जिणवरचलणे, पुव्वं | पू.श्री विनयप्रभोपाध्याय | २३६ |
| ८३ | नमिऊण वद्धमाणं थुणामि | पू. उपा. श्रीविनयविजयगणि | २४० |
| ८४ | वंदे भरहजिणिंदे कालत्तयभा- | | २४३ |
| ८५ | चउवीसंपि जिणिंदे वोलीणे- | पू.गणि श्री पद्मनाह वि. | २४५ |
| ८६ | सिरिचरिमतित्थनाहं पणमिय | पू.मु.श्री पद्मनाह वि. | २४६ |
| ८७ | नमिअ जिणे उवजीविअ | | २४७ |
| ८८ | दढवाहिविहुरिअंगा अणसण- | | २४९ |
| ८९ | विलसिर किन्नर महुरगीय | | २५० |
| ९० | नमिऊण जिणं वीरं कप्पं | पू.आ. श्री जिनप्रभसूरि | २५२ |
| ९१ | थुणिमो केवलिवत्थं, वरवि- | | २५६ |
| ९२ | पहिली पणमउं तिन्नि काल | | २५९ |

पू.आ.श्री हेमचन्द्रसूरिविरचितः
सगरपुत्रजह्नुनृपादिसंस्तुतः

# १. ॥ श्री अष्टापदस्थ-जिनस्तवः ॥

(अनुष्टुप्)

अपारघोरसंसार-पारावारतरीसमाः ।
निर्वाणकारणीभूता, भगवन्तः पुनीत नः ॥ १

स्याद्वादवादप्रासाद-प्रतिष्ठासूत्रधारताम् ।
नयप्रमाणैर्बिभ्रद्भ्यो, युष्मभ्यमनिशं नमः ॥ २

आयोजनं गामिनीभि-र्वाणीसारणिभिर्भृशम् ।
अशेषजगदुद्यानाऽ-प्यायकेभ्यो नमोऽस्तु वः ॥ ३

युष्मद्दर्शनतोऽस्माभि-रपि सामान्यजीवितैः ।
अवाप्तमाऽऽपञ्चमार-जीवितव्यफलं परम् ॥ ४

कल्याणकैर्गर्भजन्म-प्रव्रज्याज्ञानमुक्तिभिः ।
नारकाणामपि सुख-प्रदेभ्यो वो नमो नमः ॥ ५

मेघानामिव वायूना-मिव चन्द्रमसामिव ।
अर्काणामिव भवतां, साधारण्यं श्रियेऽस्तु नः ॥ ६

अष्टापदगिरावत्र, धन्यास्ते पक्षिणोऽपि हि ।
निरन्तरायाः पश्यन्ति, भवतो ये दिने दिने ॥ ७

जीवितं चरितार्थं नः, कृतार्थो विभवश्च नः ।
युष्मदाऽऽलोकनाऽर्चाभि-श्चिररात्राय सम्प्रति ॥ ८

पू.आ.श्री धर्मघोषसूरिविरचितः

## २. ॥ श्री अष्टापदमहातीर्थकल्पः ॥

(आर्या)

वरधर्मकीर्तिऋषभो विद्यानन्दाश्रितः पवित्रितवान् ।
देवेन्द्रवन्दितो यः स जयत्यष्टापदगिरीशः ॥ १

यस्मिन्नष्टापदभूदष्टापदमुख्यदोषलक्षहरः ।
अष्टापदाभ ऋषभः स जयत्यष्टापदगिरीशः ॥ २

ऋषभसुता नवनवतिर्बाहुबलिप्रभृतयः प्रवरयतयः ।
यस्मिन्नभजन्नमृतं स जयत्यष्टापदगिरीशः ॥ ३

अयुजन्निर्वृतियोगं वियोगभीरव इव प्रभोः समकम् ।
यत्रर्षिदशसहस्राः स जयत्यष्टापदगिरीशः ॥ ४

यत्राष्टपुत्रपुत्रा युगपद्वृषभेण नवनवतिपुत्राः ।
समयैकेन शिवमगुः स जयत्यष्टापदगिरीशः ॥ ५

रत्नत्रयमिव मूर्तं स्तूपत्रितयं चितित्रयस्थाने ।
यत्रास्थापयदिन्द्रः स जयत्यष्टापदगिरीशः ॥ ६

सिद्धायतनप्रतिमं सिंहनिषद्येति यत्र चतुर्द्वारम् ।
भरतोऽरचयच्चैत्यं स जयत्यष्टापदगिरीशः ॥ ७

यत्र विराजति चैत्यं योजनदीर्घं तदर्धपृथुमानम् ।
क्रोशत्रयोच्चमुच्चैः स जयत्यष्टापदगिरीशः ॥ ८

यत्र भ्रातृप्रतिमा व्यधाच्चतुर्विंशति जिनप्रतिमाः ।
भरतः सात्मप्रतिमाः स जयत्यष्टापदगिरीशः ॥ ९

स्वस्वाकृतिमितिवर्णाङ्कवर्णितान् वर्तमानजिनबिम्बान् ।
भरतो वर्णितवानिह स जयत्यष्टापदगिरीशः ॥ १०

सप्रतिमान्नवनवर्तिं बन्धुस्तूपांस्तथार्हतस्तूपम् ।
यत्रारचयच्चक्री स जयत्यष्टापदगिरीशः ॥ ११

भरतेन मोहसिंहं हन्तुमिवाष्टापदः कृताष्टपदः ।
शुशुभेऽष्टयोजनो यः स जयत्यष्टापदगिरीशः ॥ १२

यस्मिन्ननेककोट्यो महर्षयो भरतचक्रवर्त्याद्याः ।
सिद्धिं साधितवन्तः स जयत्यष्टापदगिरीशः ॥ १३

सगरसुताग्रे सर्वार्थ-शिवगतीन् भरतराजवंशर्षीन् ।
यत्र सुबुद्धिरकथयत्स जयत्यष्टापदगिरीशः ॥ १४

परिखासागरमकरन्त सागराः सागराशया यत्र ।
परितो रक्षति कृतये स जयत्यष्टापदगिरीशः ॥ १५

क्षालयितुमिव स्वैनो जैनो यो गङ्गयाश्रितः परितः ।
सन्ततमुल्लोलकरैः स जयत्यष्टापदगिरीशः ॥ १६

यत्र जिनतिलकदानाद् दमयन्त्यपि कृतानुरूपफलम् ।
भालस्वभावतिलकं स जयत्यष्टापदगिरीशः ॥ १७

यमकूपारे कोपात् क्षिपन्नलं वालिनांह्रिणाऽऽक्रम्य ।
आरावि रावणोऽरं स जयत्यष्टापदगिरीशः ॥ १८

भुजतन्त्र्या जिनमहकृल्लङ्केन्द्रोऽवाप यत्र धरणेन्द्रात् ।
विजयामोघां शक्तिं स जयत्यष्टापदगिरीशः ॥ १९

चतुरश्चतुरोऽष्टदश द्वौ चापाच्यादिदिक्षु जिनबिम्बान् ।
यत्रावन्दत गणभृत् स जयत्यष्टापदगिरीशः ॥ २०

अचलेऽत्रोदयमचलं स्वशक्तिवन्दितजिनो जनो लभते ।
वीरोऽवर्णयदिति यं स जयत्यष्टापदगिरीशः ॥ २१

प्रभुभणितपुण्डरीकाध्ययनाध्ययनात् सुरोऽत्र दशमोऽभूत् ।
दशपूर्विपुण्डरीकः स जयत्यष्टापदगिरीशः ॥ २२

यत्र स्तुतो जिननाथोऽदीक्षित तापसशतानि पञ्चदश ।
श्री गौतमगणनाथः स जयत्यष्टापदगिरीशः ॥ २३

इत्यष्टापदपर्वत इव योऽष्टापदमयश्चिरस्थायी ।
व्यावर्णि महातीर्थं स जयत्यष्टापदगिरीशः ॥ २४

पू.आ.श्री जिनप्रभसूरिविरचितः

## ३. ॥ श्रीनन्दीश्वरतीर्थकल्पः ॥

(अनुष्टुप्)

आराध्य श्रीजिनाधीशान् सुराधीशार्चितक्रमान् ।
कल्पं नन्दीश्वरद्वीपस्याचक्षे विश्वपावनम् ॥ १

अस्ति नन्दीश्वरो नाम्नाऽष्टमो द्वीपो द्युसन्निभः ।
तत्परिक्षेपिणा नन्दीश्वरेणाम्भोधिना युतः ॥ २

एतद्वलयविष्कम्भे लक्षाशीतिश्चतुर्युता ।
योजनानां त्रिषष्टिश्च कोट्यः कोटीशतं तथा ॥ ३

असौ विविधविन्यासोद्यानवान् देवभोगभूः ।
जिनेन्द्रपूजासंसक्तसुरसम्पातसुन्दरः ॥ ४

अस्य मध्यप्रदेशे तु क्रमात् पूर्वादिदिक्षु च ।
अञ्जनवर्णाश्चत्वारस्तिष्ठन्त्यञ्जनपर्वताः ॥ ५

दशयोजनसहस्रातिरिक्तविस्तृतास्तले ।
सहस्रयोजनाश्चोर्ध्वं क्षुद्रमेरूच्छ्रयाश्च ते ॥ ६

तत्र प्राग् देवरमणो नित्योद्योतश्च दक्षिणः ।
स्वयम्प्रभः प्रतीच्यस्तु रमणीय उदक्स्थितः ॥ ७

शतयोजनायतानि तदर्धं विस्तृतानि च ।
द्विसप्ततियोजनोच्चान्यर्हच्चैत्यानि तेषु च ॥ ८

पृथग् द्वाराणि चत्वार्युच्चानि षोडश योजनीम् ।
प्रवेशे योजनान्यष्ट विस्तारेप्यष्ट तेषु तु ॥ ९

तानि देवासुरनागसुपर्णानां दिवौकसाम् ।
समाश्रयादेव तेषां नामभिर्विश्रुतानि च ॥ १०

षोडशयोजनायामास्तावन्मात्राश्च विस्तृतौ ।
अष्ट योजनकोत्सेधास्तन्मध्ये मणिपीठिकाः ॥ ११

सर्वरत्नमया देवच्छन्दकाः पीठिकोपरि ।
पीठिकाभ्योऽधिका यामोच्छ्रयभाजस्तु तेषु च ॥ १२

ऋषभा वर्द्धमाना च तथा चन्द्राननापि च ।
वारिषेणा चेति नाम्ना पर्यङ्कासनसंस्थिता ॥ १३

रत्नमय्यो युताः स्वस्वपरिवारेण हारिणा ।
शाश्वतार्हत्प्रतिमाः प्रत्येकमष्टोत्तरं शतम् ॥ १४

द्वे द्वे नागयक्षभूतकुण्डभृत् प्रतिमे पृथक् ।
प्रतिमानां पृष्टतस्तु छत्रभृत् प्रतिमैकिका ॥ १५

तेषु धूपघटीदामघण्टाष्टमङ्गलध्वजाः ।
छत्रतोरणचङ्गेर्यः पटलान्यासनानि च ॥ १६

षोडश पूर्णकलशादीन्यलङ्करणानि च ।
सुवर्णरुचिररजो वालुकास्तत्र भूमयः ॥ १७

आयतनप्रमाणेन रुचिरा मुखमण्डपाः ।
प्रेक्षार्थमण्डपा अक्षवाटिकामणिपीठिकाः ॥ १८

रम्याश्च स्तूपप्रतिमाश्चैत्यवृक्षाश्च सुन्दराः ।
इन्द्रध्वजाः पुष्करिण्यो दिव्याः सन्ति यथाक्रमम् ॥ १९

प्रतिमाः षोडश चतुर्द्वारस्तूपेषु सर्वतः ।
शतं चतुर्विंशमेवं ताः साष्टशततद्युताः ॥ २०

प्रत्येकमञ्जनाद्रीणां ककुप्सु चतसृष्वपि ।
गते लक्षे योजनानां निर्मत्स्यस्वच्छवारयः ॥ २१

सहस्रयोजनोसेधा विष्कम्भे लक्षयोजनाः ।
पुष्करिण्यः सन्ति तासां क्रमान्नामानि षोडश ॥ २२

नन्दिषेणा चाप्यमोघा गोस्तूपाऽथ सुदर्शना ।
तथा नन्दोत्तरानन्दा सुनन्दा नन्दिवर्धना ॥ २३

भद्रा विशाला कुमुदा पुण्डरीकिणिका तथा ।
विजया वैजयन्ती च जयन्ती चापराजिता ॥ २४

प्रत्येकमासां योजनं पञ्चशत्या परत्र च ।
योजनानां पञ्चशतिं यावद्विस्तारभाञ्जि तु ॥ २५

लक्षयोजनदीर्घाणि महोद्यानानि तानि तु ।
अशोकसप्तच्छदकचूतचम्पकसञ्ज्ञया ॥ २६

मध्ये पुष्करिणीनां च स्फटिकाः पल्यमूर्तयः ।
ललामवेद्युद्यानादिचिह्ना दधिमुखाद्रयः ॥ २७

चतुःषष्टिसहस्रोच्चाः सहस्रं चावगाहिनः ।
सहस्राणि दशाधस्तादुपरिष्टाच्च विस्तृताः ॥ २८

अन्तरे पुष्करिणीनां द्वौ द्वौ रतिकराचलौ ।
ततो भवन्ति द्वात्रिंशदेते रतिकराचलाः ॥ २९

शैलेषु दधिमुखेषु तथा रतिकराद्रिषु ।
तच्छाश्वतार्हच्चैत्यानि सन्त्यञ्जनगिरिष्विव ॥ ३०

चत्वारो द्वीपविदिक्षु तथा रतिकराचलाः ।
दशयोजनसहस्रायामविष्कम्भशालिनः ॥ ३१

योजनानां सहस्रं तु यावदुच्छ्रयशोभिताः ।
सर्वरत्नमया दिव्या झल्लर्याकारधारिणः ॥ ३२

तत्र द्वयो रतिकराचलयोर्दक्षिणस्थयोः ।
शक्रस्येशानस्य पुनरुत्तरस्थितयोः पृथक् ॥ ३३

अष्टानां महादेवीनां राजधान्योऽष्टदिक्षु ताः ।
लक्षाबाधा लक्षमाना जिनायतनभूषिताः ॥ ३४

सुजाता सौमनसा चार्चिमाली च प्रभाकरा ।
पद्मा शिवा शुच्यञ्जने चूता चूतावतंसिका ॥ ३५

गोस्तूपासुदर्शने अप्यमलाप्सरसौ तथा ।
रोहिणी नवमी चाथ रत्ना रत्नोच्चयापि च ॥ ३६

सर्वरत्नसञ्चया च सुवसुर्वसुमित्रिका ।
वसुभागादि च वसुन्धरा नन्दोत्तरे अपि ॥ ३७

नन्दोत्तरकुरुर्देवकुरुः कृष्णा ततोऽपि च ।
कृष्णराजी रामा रामरक्षिता प्राक् क्रमादमूः ॥ ३८

सर्वर्द्धयस्तासु देवाः कुर्वते सपरिच्छदाः ।
चैत्येष्वष्टाहिकां पुण्यतिथिषु श्रीमदर्हताम् ॥ ३९

प्राच्येऽञ्जनगिरौ शक्रः कुरुतेऽष्टाहिकोत्सवम् ।
प्रतिमानां शाश्वतीनां चतुर्द्वारि जिनालये ॥ ४०

तस्य चाद्रेश्चतुर्दिक्स्थमहावापीविवर्त्तिषु ।
स्फाटिकेषु दधिमुखपरितेषु चतुर्ष्वपि ॥ ४१

चैत्येष्वर्हत्प्रतिमानां शाश्वतीनां यथाविधि ।
चत्वारः शक्रदिग्पालाः कुर्वतेऽष्टाहिकोत्सवम् ॥ ४२

ईशानेन्द्रस्त्वोत्तराहेऽञ्जनाद्रौ विदधाति तम् ।
तल्लोकपालास्तद्वापीदध्यास्यादिषु कुर्वते ॥ ४३

चमरेन्द्रो दाक्षिणात्येऽञ्जनाद्रावुत्सवं सृजेत् ।
तद्वाप्यन्तर्दधिमुखेष्वस्य दिग्पतयः पुनः ॥ ४४

पश्चिमेऽञ्जनशैले तु बलीन्द्रः कुरुते महम् ।
तद्दिग्पालास्तु तद्वाप्यन्तर्भाग्दधिमुखाद्रिषु ॥ ४५

वर्षं दीपदिनारब्धानुपवासान् कुहूतिथौ ।
कुर्वन्नन्दीश्वरोपास्त्यै श्रायसीं श्रियमाश्रयेत् ॥ ४६

भक्त्या चैत्यानि वन्दारुस्तत्स्तोत्रस्तुतिपाठभाक् ।
नन्दीश्वरमुपासीनोऽनुपर्वाहस्तरेत्तराम् ॥ ४७

प्रायःपूर्वाचार्यग्रथितैरेवायमादितः श्लोकैः ।
श्रीनन्दीश्वरकल्पो लिखित इति श्रीजिनप्रभाचार्यैः ॥ ४८

## ४. ॥ श्रीनन्दीश्वरादिस्तुतयः ॥

(इन्द्रवज्रा)

नन्दीश्वरद्वीपमितैर्जिनानां प्रासादशृङ्गैर्भुवि भासमानम् ।
विद्याधराणामसुरामराणां नाथैः स्तुतं मङ्गलदायि भूयात् ॥ १

सम्मेतशैलाभिधभूमहेला - शिरोवतंसास्त्रिजगत्प्रशंसाः ।
लब्धप्रतिष्ठाः शिवसौख्यलक्ष्मीं
कुर्वन्ति ते विंशतितीर्थनाथाः ॥ (उपजाति) २

अष्टापदस्था निजमानवर्णा - श्चिह्नैर्युताः श्रीभरतेन भक्त्या ।
संस्थापिता तरमानतेन्द्राः(?) श्रीआदिनाथप्रमुखा जिनेन्द्राः ॥३

सीमन्धरं निर्ज्जरकोटिसेव्यं तीर्थङ्करं क्षेमकरं जनानाम् ।
सद्देशनाप्रीणितभव्यसङ्घ -
मनन्तलक्ष्मीप्रदमानमामि ॥ (उपजाति) ४

कैवल्यलक्ष्म्या तिथिमेयकर्म-भूमीः पवित्राः सममेव चक्रुः ।
उत्कृष्टकाले शतसप्ततिस्ते तीर्थङ्करा मे शिवदा भवन्तु ॥ ५

स्वर्गे च पातालतले विशाले भूलोकमध्ये बहुतीर्थमाले ।
भूतानि भावीनि च सन्ति यानि जैनानि चैत्यानि नमामि तानि॥६

सन्दर्शितानेकभवस्वरूपं शश्वत्पतङ्गप्रमिताङ्गरूपम् ।
मिथ्यात्ववल्लीलवने लवित्रं ज्ञानं जगद्दीपमहं स्मरामि ॥ ७

सिद्धायिका वीरजिनस्य तीर्थ-सेवापराणां भविकव्रजानाम् ।
विघ्नापहा शासनदेवतेयं माङ्गल्यमालामतुलां तनोतु ॥ ८

पू.आ.श्री देवेन्द्रसूरिविरचितः

## ५. ॥ श्रीसम्मेतशिखरकल्पः ॥

(आर्या)

यद्भरतावनि-वनिता-विशाल-भालस्थलस्य तिलकाभम् ।
तद्भव-समुद्रतीर्थं स्तवीमि सम्मेतगिरितीर्थम् ॥ १

यो जिनमुनिचरणाम्बुज-लग्नरजो-राजि-राजित-सुदेशः ।
किन्नर-गणगीतयशाः स जयति सम्मेतगिरिराजः ॥ २

यत्र बहुयतिसमेताः समेत्य शिवमगुरपेत-कर्ममलाः ।
विंशतिरजितादि-जिनाः स जयति सम्मेतगिरिराजः ॥ ३

तीर्थमिति यत्र कृत्वाऽनशनेन मुनीन्द्र-शीलसन्नाहः ।
शिवमाप विगतकर्मा स जयति सम्मेतगिरिराजः ॥ ४

अपरैरपि बहुमुनिभिः सुखेन लोकाग्रमापि यत्र गतैः ।
चिरमप्रमेयमहिमा स जयति सम्मेतगिरिराजः ॥ ५

यत्र बहुजिनमुनीनां शिव-महिमाकारि हारिणी हरिभिः ।
आनन्दित-भुवन-जनः स जयति सम्मेतगिरिराजः ॥ ६

सद्ध्यानमकम्पतया तन्मित्रं साधवो मृगयमाणाः ।
श्रितवन्तो यमनेके स जयति सम्मेतगिरिराजः ॥ ७

कीर्त्तिस्तम्भसरूपः स्तूपगणः सुरकृतः सुमणिरूपः ।
यत्र जिन-शिवस्थाने स जयति सम्मेतगिरिराजः ॥ ८

स्तूपगतचैत्यराजिषु रम्या अजितादि-जिनपति-प्रतिमाः ।
यत्र सुरासुरपूज्याः स जयति सम्मेतगिरिराजः ॥ ९

आसीदासीनादिम-जिनमुनि-पावितशिराः पुराप्यजितात् ।
यः प्रथितस्तीर्थतया स जयति सम्मेतगिरिराजः ॥ १०

त्रिदिवादिपदारोहण-सोपान-समानतां भुवि दधाति ।
अद्यापि यो जनानां स जयति सम्मेतगिरिराजः ॥ ११

कुण्डजलप्रतिबिम्बितचैत्यततिं यत्र कुसुममोचनतः ।
पूजयति सङ्घलोकः स जयति सम्मेतगिरिराजः ॥ १२

इह समवसरण-मिह देशनेह मुक्तिरिति जिनपद-पवित्राः ।
रमयन्ति यत्र देशाः स जयति सम्मेतगिरिराजः ॥ १३

रङ्गदभङ्गुर–संवेगरंगिणो यत्र किल कुरङ्गाद्याः ।
मुनिसङ्गाद्दिवमापुः स जयति सम्मेतगिरिराजः ॥ १४

यत्र तपो जिनपूजानशनादिकृतं विशालफलमल्पम् ।
तीर्थानुभावतः स्यात् स जयति सम्मेतगिरिराजः ॥ १५

सम्मेततीर्थमिति यो देवेन्द्रमुनीन्द्रवन्दितं विदितम् ।
भक्त्या स्तवीति वीता–पदमच्युतपदमसो लभते ॥ १६

पू.आ.श्री जयशेखरसूरिविरचिता

## ६. ॥ श्रीशत्रुञ्जयतीर्थस्तुतिगर्भिता द्वात्रिंशिका ॥

(उपजाति)

श्रीपुण्डरीकाचलमौलिमौलि–
मुन्मीलिताऽनादिसमाधिलीनम् ।
शक्त्याऽल्पया पुष्कलया च भक्त्या,
स्तुवे शिवेच्छः प्रथमं जिनेशम् ॥ १

क्व ते स्तुतिः ? कुण्ठितशक्रशक्तिः,
क्व चाऽहमज्ञेषु धुरीणरेखः ? ।
स्तुतेर्मिषादेष जनः सुमेरु–मारोढुमुद्यच्छति पङ्गुकल्पः ॥ २

परं भवद्भक्तिभरेरितः स–न्नवं नवं कर्तुमहं यतिष्ये ।
अत्येति नेतः ! कियतीमपि क्ष्मां, यतः परप्रेरणयोपलोऽपि ॥३

विलीनमीनध्वजराजमान !, सत्केवलज्ञानविराजमान ! ।
जय त्वमादीश ! जिनाभिजात !,
निष्णातजातस्तुत ! नाभिजात ! ॥ ४

सुधाञ्जनं सज्जनलोचनेषु, मिथ्यादृशामक्षिषु धूमरेखा ।
यैरालुलोके विमलाचलोऽयं, पुण्यानि तान्येव चिरं जयन्तु ॥५

सुपर्वशैलादपि पर्वतोऽयं, स्वामिन्महीयानिति मे वितर्कः ।
नो चेदवापुः किमु मंक्षु मोक्षं,
मुमुक्षवोऽमुष्य शिरोधिरुह्य ? ॥ ६

ये ये विनिर्माय मनो विमाय–मायान्ति ते तेऽत्र भवन्ति सन्तः।
पुण्यश्रियः पात्रमतो मतोऽयं, त्वत्सानुमानक्षयपुण्यकोशः ॥७
(इन्द्रवज्रा)

स्पृष्टोऽपि लोकैः शिरसि स्वपादै–र्दत्ते सुखं तात्त्विकमेव तेभ्यः।
संसर्गतस्ते शमिनो मुनीश !, क्षमाधरोऽभूच्चरितार्थ एषः ॥८

भुवं प्रविष्टो नरकं पिधत्ते, पुनाति पृथ्वीं विशदैः स्वपादैः ।
गिरिस्तवाऽयं गगनाग्रलग्नोऽपवर्गमार्गं सुगमं करोति ॥ ९
(उपेन्द्रवज्रा)

अमुं महद्भ्योऽपि महान्तमद्रिं, श्रयन्ति माहात्म्यधना जना ये ।
भवाब्धिमस्ताघमदृश्यपारं, तरन्ति ते मङ्क्षु तदीश ! चित्रम्॥१०
(उपेन्द्रवज्रा)

सन्त्यत्र शैला बहवोऽयमेव, गिरिः परं सिद्धपदं प्रसिद्धः ।
के के ग्रहा व्योमनि न स्फुरन्ति,
सुधानिधानं विधुरेव किन्तु ॥ ११

आरोहतां स्यादचलेऽत्र दूरे, नीचैर्गतिः स्वर्गशिवौ त्वदूरे ।
प्रत्यक्षमेतज्जगतोऽप्यतोऽन्यत्, प्रमाणमन्तर्गतभाव एव ॥ १२

श्रितस्त्रिलोकीपतिना त्वयाऽयं, शैलश्चलन्निर्झरबद्धकक्षः ।
सन्नाह्यदन्तीव बलिष्ठदन्तो, दृष्टोऽपि भावारिबलं भिनत्ति ॥१३

विराजसेऽस्मिन्नचले निलीन-स्त्वं सिद्धयोगीव युगादिदेव ! ।
सिद्धं रसं शान्तमवाप्य यस्मा-
ज्जायेत कल्याणधनो जनौघः ॥ १४

शिलोच्चयः शैलकुलेऽखिलेऽपि,
युक्तं जिनासौ वहते विभुत्वम् ।
नष्टापदऽष्टापदकान्तकान्ति-र्यदीयमौलौ मुकुटायसे त्वम् ॥१५

चलाचला भूरिमलाऽऽविला च, रजोमयी दृष्टविचित्रमारा ।
क्व सुन्दरी ? क्वाऽस्य दरी नगस्य, ?
स्थिरा पवित्रा विरजा अहिंस्रा ॥ (उपेन्द्रवज्रा) १६

मेघेन मुक्तं तव शैलमौला-वधोयियासज्जलमश्रुवारि ।
अधित्यकायामिह नित्यरङ्गैः,
शृङ्गैस्तु लेभे किमु कूटनाम ? ॥ १७

न यान्ति ये गोत्रममुं विहाय, विहायसस्सन्तु चिरायुषस्ते ।
किं तैर्नरैरऽप्यऽफलावतारै-
र्नालोकि यैस्तीर्थमदोऽपदोषम् ॥ १८

कर्पूरपारीभिरुताऽमृतांशो, रुग्भिः सुधावारिधिवीचिभिर्वा ।
पुण्याणुभिर्वा घटितेति चेतः,
सन्देग्धि शुभ्रां तव वीक्ष्य मूर्तिम् ॥ (इन्द्रवज्रा) १९

केचित्तवोपास्तिविधौ प्रमोदं, परे प्रमादं च दधत्यऽधन्याः ।
द्वयेऽपि ते कौशिकतां लभन्ते, स्वर्गे विनैनं गिरिमद्रिदुर्गे ॥२०

त्वं देव ! तावद् वृषभाभिधानः, पङ्के निमग्नश्च जनो जिनाऽयम्।
मामार्त्तमुद्धर्त्तुमतो यतस्व,
स्वनामवामो हि किमुत्तमः स्यात् ? ॥ २१

चिरादसञ्चारतरः शिवाऽध्वा, त्वया तथाऽवाहि महोर्जितेन ।
प्रायः स्खलन्ति स्म न बालवृद्धा,
एकाकिनोऽप्यऽत्र यथा चरन्तः ॥ २२

भावारिभीत्या श्रितमुक्तिदुर्गे, वीरः कुले ते स मरीचिरेकः ।
कृत्वा पुरो यो भवभीतलोक-
मादुःखमारं स्वयमार मोक्षम् ॥ (इन्द्रवज्रा) २३

मोक्षं त्रिलोकीलतिकाशिरःस्थं, फलं सुधास्वादु जिघृक्षुरेनम् ।
निःश्रेणिकावद् गिरिमारुरोह, मोहादिगृध्रो धुनुते पुनर्माम् ॥२४

संसारचुण्डीचिरवासलग्नपङ्कप्रलीनोर्ध्वगतिप्रयत्नः ।
कृपासरस्तावकपादपद्मे, चिखेलिषत्येष मदीयहंसः ॥ २५

पद्मासनासीनमदीनतोषं, कृपारसागारमरागरोषम् ।
भवन्तमालोक्य कदा मुदाऽह-
मदाहदुःखं स्वमनः करिष्ये ? ॥ २६

कदा कदाशामृगतृष्णिकाया-मसद्रसप्रार्थनया विषण्णः ।
त्वद्ध्यानमुद्यानमिवाधिगत्य,
नित्यं लयं चित्तमृगो गमी मे ? ॥ २७

कदा त्वदालोकनजप्रमोद-मेधस्विचक्षुःक्षरदश्रुनीरैः ।
निःशेषनिर्वापितदुःखदावः,
सद्भाववल्लीं परिवर्धयेऽहम् ? ॥ २८

असारसंसारविहाररीणौ, स्पृष्ट्वा कृतार्थौ तव तीर्थमार्गम् ।
कदा क्रमावीश ! ममेतरासां, भवभ्रमीणां प्रकरिष्यतोऽन्तम्॥२९

बालोऽहमाऽऽलोक्य चिराद्भवन्तं, तातं निरातङ्कमतिः प्रसन्नम्।
प्रियं प्रियं वस्तु कदार्थयिष्ये,
बलादपि प्रीतिविकस्वरास्यः ॥ ३०

चित्ते पुरा याश्चन वीचयो मे-ऽभूवन्ननेकास्त्वयि वीक्षिते ताः ।
नाकस्मिकाद्विस्मयतः स्मरन्ति,
स्वेनैव तद्योग्यतया प्रसीद ॥ (इन्द्रवज्रा) ३१

एवं सर्वसुपर्वसंहतियुतश्रीमन्महेन्द्रार्चित !,
श्रीशत्रुञ्जयशेखर ! प्रियकर ! श्रीमद्युगादीश्वर ! ।
वाचो मार्गमुपेतया स्तुतिमिषाच्चेतःस्थभक्त्याऽनया,
चेत्तुष्टोसि तदा सदा निजपदाभ्यर्णे स्थितिं देहि मे ॥ ३२
(शा.वि.)

पू.आ.श्री जिनप्रभसूरिविरचितः

## ७. ॥ श्रीशत्रुञ्जयतीर्थकल्पः ॥

(अनुष्टुप्)

देवः श्रीपुण्डरीकाख्यभूभृच्छिखरशेखरम् ।
अलङ्करिष्णुः प्रासादं श्रीनाभेयः श्रियेऽस्तु वः ॥ १

श्रीशत्रुञ्जयतीर्थस्य माहात्म्यमतिमुक्तकः ।
केवली यदुवाच प्राक् (ग्) नारदस्य ऋषेः पुरः ॥ २

तदहं लेशतो वक्ष्ये स्वपरस्मृतिहेतवे ।
श्रोतुमर्हन्ति भव्यास्तत् पापनाशनकाम्यया ॥ (यु.) ३

शत्रुञ्जये पुण्डरीकस्तपोभृत् पञ्चकोटियुक् ।
चैत्र्यां सिद्धस्ततः सोऽपि पुण्डरीक इति स्मृतः ॥ ४

सिद्धिक्षेत्रं तीर्थराजो मरुदेवो भगीरथः ।
विमलाद्रिर्बाहुबली सहस्रकमलस्तथा ॥ ५

तालध्वजः कदम्बश्च शतपत्रो नगाधिराट् ।
अष्टोत्तरशतकूटः सहस्रपत्र इत्यपि ॥ ६

ढङ्को लौहित्यः कपर्द्दिनिवासः सिद्धिशेखरः ।
शत्रुञ्जयस्तथा मुक्तिनिलयः सिद्धिपर्वतः ॥ ७

पुण्डरीकश्चेति नामधेयानामेकविंशतिः ।
गीयते तस्य तीर्थस्य कृता सुरनरर्षिभिः ॥ (कलापकम्) ८

ढङ्कादयः पञ्च कूटास्तत्र सन्ति सदैवताः ।
रसकूपीरत्नखनिविवरौषधिराजिताः ॥ ९

ढङ्कः कदम्बो लौहित्यस्तालध्वज-कपर्द्दिनौ ।
पञ्चेति ते कालवशान्मिथ्यादृग्भिरुरीकृताः ॥ १०

अशीतिं योजनान्याद्ये द्वैतीयीके तु सप्ततिम् ।
षष्टिं तृतीये तुर्ये चारके पञ्चाशतं तथा ॥ ११

पञ्चमे द्वादशैतानि सप्तरत्नी तथान्तिमे ।
इत्याप्तैरवसर्प्पिण्यां विस्तारस्तस्य कीर्तितः ॥ (यु.) १२

पञ्चाशतं योजनानि मूलेऽस्य दश चोपरि ।
विस्तार उच्छ्रयस्त्वष्टौ युगादीशे तपत्यभूत् ॥ १३

अस्मिन्नृषभसेनाद्या असङ्ख्याः समवासरन् ।
तीर्थाधिराजाः सिद्धाश्चातीते काले महर्षयः ॥ १४

श्रीपद्मनाभप्रमुखा भाविनो जिननायकाः ।
अस्मिन् समवसर्त्तारः कीर्त्तिपावितविष्टपाः ॥ १५

श्रीनाभेयादि-वीरान्ताः श्रीनेमीश्वरवर्ज्जिताः ।
त्रयोविंशतिरर्हन्तः समवासार्षुरत्र च ॥ १६

हेमरूप्यादिजद्वाविंशत्यर्हत्प्रतिमान्वितम् ।
अङ्करत्नजनाभेयप्रतिमालङ्कृतं महत् ॥ १७

द्वाविंशतिक्षुल्लदेवकुलिकायुक्तमुच्चकैः ।
योजनप्रमितं रत्नमयमुत्पन्नकेवले ॥ १८

आदीश्वरे श्रीभरतश्चक्री चैत्यमचीकरत् ।
एतस्यामवसर्प्पिण्यां पूर्वमत्र पवित्रधीः ॥ (त्रिभि.) १९

द्वाविंशतेर्जिनेन्द्राणां यथास्वं पादुकायुता ।
भात्यत्रायतनश्रेणी लेप्यनिर्मितबिम्बयुक् ॥ २०

अकारि चात्र समवसरणेन सहोच्चकैः ।
प्रासादो मरुदेवायाः श्रीबाहुबलिभूभुजा ॥ २१

प्रथमोऽत्रावसर्प्पिण्यां गणभृत् प्रथमार्हतः ।
प्रथमं प्रथमः सूनुः सिद्धः प्रथमचक्रिणः ॥ २२

अस्मिन् नमि-विनम्याख्यौ खेचरेन्द्रमहाऋषी ।
कोटिद्वय्या महर्षीणां सहितौ सिद्धिमीयतुः ॥ २३

सम्प्रापुरत्र द्रविड-वालिखिल्यादयो नृपाः ।
कोटीभिर्दशभिर्युक्ताः साधूनां परमं पदम् ॥ २४

जयरामादिराजर्षिकोटित्रयमिहागमत् ।
नारदादिमुनीनां च लक्षैकनवतिः शिवम् ॥ २५

प्रद्युम्न-शाम्बप्रमुखाः कुमाराश्चात्र निर्वृतिम् ।
पराप्तवन्तः साद्र्धाष्टकोटिसाधुसमन्विताः ॥ २६

मनुप्रमितलक्षादिसङ्ख्याभिः श्रेणिभिस्तथा ।
असङ्ख्याताभिः सर्वार्थसिद्धान्तरितमासदन् ॥ २७

पञ्चाशत्कोटिलक्षाब्धीन् यावन्नाभेयवंशजाः ।
अत्रादित्ययशोमुख्याः सगरान्ताः शिवं नृपाः ॥ (यु.) २८

भरतस्यापत्याः पुत्रश्रीशैलक-शुकादयः ।
अत्र सिद्धा असङ्ख्यातकोटाकोटिमिता यताः ॥ २९

मुनीनां कोटिविंशत्या कुन्त्या च सह निर्वृताः ।
कृतार्हत्प्रतिमोद्धारा अत्र ते पञ्च पाण्डवाः ॥ ३०

द्वितीयषोडशावत्राजित-शान्ती जिनेश्वरौ ।
वर्षारात्रचतुर्मासीं तस्थतुः स्थितिदेशिनौ ॥ ३१

श्रीनेमिवचनाद् यात्रागतः सर्वरुजापहम् ।
नन्दिषेणगणेशोऽत्राजितशान्तिस्तवं व्यधात् ॥ ३२

पौस्ना असङ्ख्या उद्धारा असङ्ख्याः प्रतिमास्तथा ।
असङ्ख्यानि च चैत्यानि महातीर्थेऽत्र जज्ञिरे ॥ ३३

अर्च्चाः क्षुल्लतडागस्थास्तथा भरतकारिताः ।
गुहास्थाश्च नमन् भक्त्या स्यादत्रैकावतारभाक् ॥ ३४

सम्प्रतिर्विक्रमादित्यः सातवाहन-वाग्भटौ ।
पादलिप्ता-ऽऽम-दत्ताश्च तस्योद्धारकृतः स्मृताः ॥ ३५

विदेहेष्वपि वास्तव्याः स्मरत्येनं सुदृष्टयः ।
इति श्रीकालिकाचार्यपुरः शक्रः किलाब्रवीत् ॥ ३६

अत्र श्रीजावडेर्बिम्बोद्धारे जाते क्रमेण वै ।
अजितायतनस्थाने बभूवानुपमासरः ॥ ३७

अत्र श्रीमरुदेवायाः श्रीशान्तेश्चोद्धरिष्यति ।
मेघघोषनृपः कल्किप्रपौत्रो भवने सुधीः ॥ ३८

अस्यापश्चिममुद्धारं राजा विमलवाहनः ।
श्रीदुष्प्रसहसूरीणामुपदेशाद्विधास्यति ॥ ३९

तीर्थोच्छेदेऽपि ऋषभकूटाख्योऽयं सुरार्चितः ।
यावत् पद्मनाभतीर्थं पूजायुक्तो भविष्यति ॥ ४०

प्रायः पापपरित्यक्तास्तिर्यञ्चोऽप्यत्र वासिनः ।
प्रयान्ति सुगतिं तीर्थमाहात्म्याद् विशदाशयाः ॥ ४१

सिंहाग्निजलधिव्यालभूपालविषयुद्धजम् ।
चौरारिमारिजं चास्य स्मृतेर्नश्येद्भयं नृणाम् ॥ ४२

भरतेशकृतेर्लेप्यमयस्याद्यजिनेशितुः ।
ध्यायन्नुत्सङ्गशय्यास्थं स्वं सर्वभयजिद्भवेत् ॥ ४३

उग्रेण तपसा ब्रह्मचर्येण च यदाप्नुयात् ।
शत्रुञ्जये तन्निवसन् प्रयतः पुण्यमश्नुते ॥ ४४

प्रदद्यात् कामिकाहारं तीर्थे कोटिव्ययेन यः ।
तत्पुण्यमेकोपवासेनाप्नोति विमलाचले ॥ ४५

भूर्भुवःस्वस्त्रये तीर्थं यत्किञ्चिन्नाम विद्यते ।
तत्सर्वमेव दृष्टं स्यात् पुण्डरीकेऽभिवन्दिते ॥ ४६

अत्राद्यापि विनारिष्टं सम्पातोऽरिष्टपक्षिणाम् ।
न जातु जायते सत्रागारभोज्येषु सत्स्वपि ॥ ४७

भोज्यदानेऽत्र यात्रायै याते कोटिगुणं शुभम् ।
कृतयात्राय वलते तत्रानन्तगुणं पुनः ॥ ४८

प्रतिलाभयतः सङ्घमदृष्टे विमलाचले ।
कोटीगुणं भवेत् पुण्यं दृष्टेऽनन्तगुणं पुनः ॥ ४९

केवलोत्पत्ति-निर्वाणे यत्राभूतां महात्मनाम् ।
तानि सर्वाणि तीर्थानि वन्दितानीह वन्दिते ॥ ५०

जन्म-निष्क्रमण-ज्ञानोत्पत्ति-मुक्तिगमोत्सवाः ।
वैयस्त्यात् क्वापि सामस्त्याज्जिनानां यत्र जज्ञिरे ॥ ५१

अयोध्या-मिथिला-चम्पा-श्रावस्ती-हस्तिनापुरे ।
कौशाम्बी-काशि-काकन्दी-काम्पिल्ये भद्रिलाभिधे ॥ ५२

रत्नवाहे शौर्यपुरे कुण्डग्रामेऽप्यपापया ।
चन्द्रानना-सिंहपुरे तथा राजगृहे पुरे ॥ ५३

श्रीरैवतक-सम्मेत-वैभारा-ऽष्टापदाद्रिषु ।
यात्रयास्मिंस्तेषु यात्राफलाच्छतगुणं फलम् ॥ (च.क.) ५४

पूजापुण्याच्छतगणं पुण्यं बिम्बविधापने ।
चैत्येऽत्र सहस्रगुणं पालनेऽनन्तसङ्गुणम् ॥ ५५

यः कारयेदस्य मौलौ प्रतिमां चैत्यवेश्म वा ।
भुक्त्वा भारतवर्षर्द्धीः स स्वर्गश्रियमश्नुते ॥ ५६

नमस्कारसहितादितपांसि विदधन्नरः ।
उत्तरोत्तरतपसां पुण्डरीकस्मृतेर्लभेत् ॥ ५७

तीर्थमेतत्स्मरन्मर्त्यः करणत्रयशुद्धिमान् ।
षष्ठादिमासिकान्तानां तपसां फलमाप्नुयात् ॥ ५८

अद्यापि पुण्डरीकाद्रौ कृत्वानशनमुत्तमम् ।
भूत्वा शीलविहीनोऽपि सुखेन स्वर्गमृच्छति ॥ ५९

छत्रचामरभृङ्गारध्वजस्थालप्रदानतः ।
विद्याधरो जायतेऽत्र चक्री स्याद्रथदानतः ॥ ६०

दशात्र पुष्पदामानि ददानो भावशुद्धितः ।
भुञ्जानोऽपि लभेतैव चतुर्थतपसः फलम् ॥ ६१

द्विगुणानि तु षष्ठस्याष्टमस्य त्रिगुणानि तु ।
चतुर्गुणानि दशमस्येति तानि ददत् पुनः ॥ ६२

फलं भवेद् द्वादशस्य ददत् पञ्चगुणानि तु ।
तेषां यथोत्तरं वृद्ध्या फलवृद्धिरपि स्मृता ॥ ६३

पूजास्नपनमात्रेण यत् पुण्यं विमलाचले ।
नान्यतीर्थेषु तत् स्वर्णभूमिभूषणदानतः ॥ ६४

धूपोत्क्षेपणतः पक्षोपवासस्य लभेत् फलम् ।
कर्पूरपूजया चात्र मासक्षपणजं फलम् ॥ ६५

निर्दोषैरत्र भक्ताद्यैर्यः साधून् प्रतिलाभयेत् ।
फलेन कार्तिकमासक्षपणस्य स युज्यते ॥ ६६

त्रिसन्ध्यं मन्त्रवाः स्नातो मासानाश्नान् मधूर्जयोः ।
नमोऽर्हद्भ्याःपदं ध्यायन्निहार्जेत् तीर्थकृत्पदम् ॥ ६७

पादलिप्तपुरे भातः प्रासादौ पार्श्व-वीरयोः ।
अधोभागे चास्य नेमिनाथस्यायतनं महत् ॥ ६८

तिस्रः कोटीस्त्रिलक्षोना व्ययित्वा वसु वाग्भटः ।
मन्त्रीश्वरो युगादीशप्रासादमुददीधरत् ॥ ६९

दृष्टैव तीर्थप्रथमप्रवेशेऽत्रादिमार्हतः ।
विशदा मूर्तिराधत्ते दृशोरमृतपारणम् ॥ ७०

अष्टोत्तरे वर्षशतेऽतीते श्रीविक्रमादिह ।
बहुद्रव्यव्ययाद् बिम्बं जावडिः स न्यवीविशत् ॥ ७१

भास्वरद्युतिमम्माणमणिशैलतटोत्थितम् ।
ज्योतीरसाख्यं यद्रत्नं तत्तेन घटितं किल ॥ ७२

मधुमत्यां पुरि श्रेष्ठी वास्तव्यो जावडिः पुरा ।
श्रीशत्रुञ्जयमाहात्म्यं श्रीवैरस्वामितोऽशृणोत् ॥ ७३

गन्धोदकस्नात्ररुचिर्लेप्यबिम्बं शुशोच सः ।
स्मृत्वा चक्रेश्वरीं सैष मम्माणाद्रिखनीमगात् ॥ ७४

निर्माप्येहाश्मनीं मूर्तिं रथमारोप्य चाचलत् ।
विमलाद्रिं सभार्योऽसौ पद्यया हृद्यया दिने ॥ ७५

ययौ यावन्तमध्वानं दिवा सप्रतिमो रथः ।
रात्रौ तावन्तमेवासौ पश्चाद् व्यावर्तताद्भुतम् ॥ ७६

खिन्नः कपर्दिनं स्मृत्वा दृष्ट्वा हेतुं च तद्विधौ ।
रथमार्गेऽपतत्तिर्यक् प्रयतः सह जायया ॥ ७७

तत्साहसप्रसन्नेन दैवतेनाधिरोपितः ।
रथः सबिम्बोऽद्रिशृङ्गे दुःसाधं सात्त्विकेषु किम् ॥ ७८

मूलनायकमुत्थाप्य न्यस्ते बिम्बे तदास्पदे ।
लेप्यबिम्बारटितेन पर्वतः खण्डशोऽदलत् ॥ ७९

तन्मुक्ताऽथ तडिच्छ्रेष्ठिबिम्बेन करमर्दिता ।
सोपानानि च्छिद्रयन्ती निर्ययौ शैलदेशभित् ॥ ८०

आरुह्य चैत्यशिखरं सकलत्रः प्रमोदतः ।
जावडिर्नरिनर्त्ति स्म चञ्चद्रोमाञ्चकञ्चुकः ॥ ८१

अपतीर्थिकबोहित्थान्यब्देऽष्टादश आपतन् ।
तद्‌द्रव्यव्ययतः श्रेष्ठी तत्र चक्रे प्रभावनाम् ॥ ८२

इत्थं जावडिराद्यार्हत्-पुण्डरीक-कपर्द्दिनाम् ।
मूर्तीर्निवेश्य सञ्जज्ञे स्वर्विमानातिथित्वभाक् ॥ ८३

दक्षिणाङ्गे भगवतः पुण्डरीक इहादिमः ।
वामाङ्गे दीप्यते तस्य जावडिस्थापितोऽपरः ॥ ८४

इक्ष्वाकु-वृष्णिवंश्यानामसङ्ख्याः कोटिकोटयः ।
अत्र सिद्धाः कोटिकोटीतिलकं सूचयत्यदः ॥ ८५

पाण्डवाः पञ्च कुन्ती च तन्माता च शिवं ययुः ।
इति शासति तीर्थेऽत्र षडेषां लेप्यमूर्तयः ॥ ८६

राजादनश्चैत्यशाखी श्रीसङ्घाद्भुतभाग्यतः ।
दुग्धं वर्षति पीयूषमिव चन्द्रकरोत्करः ॥ ८७

व्याघ्रीमयूरप्रमुखास्तिर्यञ्चो भक्तमुक्तितः ।
सुरलोकमिह प्राप्ताः प्रणतादीशपादुकाः ॥ ८८

वामे सत्यपुरस्यावतारो मूलजिनौकसः ।
दक्षिणे सकुनी-चैत्यपृष्ठे चाष्टापद[ः] स्थितः ॥ ८९

नन्दीश्वर-स्तम्भनकोज्जयन्तानामकृच्छ्रतः ।
भव्येषु पुण्यवृद्ध्यर्थमवतारा इहासते ॥ ९०

आत्तासिना विनमिना नमिना च निषेवितः ।
स्वर्गारोहणचैत्ये च श्रीनाभेयः प्रभासते ॥ ९१

तुङ्गं शृङ्गं द्वितीयं च श्रेयांसः शान्ति-नेमिनौ ।
अन्येऽप्यृषभः-वीराद्या अस्यालङ्कुर्वते जिनाः ॥ ९२

मरुदेवां भगवतीं भवनेऽत्र भवच्छिदम् ।
नमस्कृत्य कृती स्वस्य मन्यते कृतकृत्यताम् ॥ ९३

यक्षराजः कपर्द्दीह कल्पवृक्षः प्रणेमुषाम् ।
चित्रान् यात्रिकसङ्घस्य विघ्नान् मर्द्दयति स्फुटम् ॥ ९४

श्रीनेम्यादेशतः कृष्णो दिनान्यष्टावुपोषितः ।
कपर्द्दियक्षमाराध्य पर्वतान्तर्गुहान्तरे ॥ ९५

अद्यापि पूज्यं शक्रेण बिम्बत्रयमगोपयत् ।
अद्यापि श्रूयते तत्र किल शक्रसमागमः ॥ (यु.) ९६

पाण्डवस्थापितश्रीमदृषभोत्तरदिग्गता ।
सा गुहा विद्यतेऽद्यापि यावत् क्षुल्लतडागिका ॥ ९७

यक्षस्यादेशतस्तत्र दृश्यन्ते प्रतिमाः किल ।
तत्रैवाजित-शान्तीशौ वर्षारात्रमवस्थितौ ॥ ९८

तयोश्चैत्यद्वयं पूर्वाभिमुखं तत्र चाभवत् ।
निकषाजितचैत्यं च बभूवानुपमासरः ॥ ९९

मरुदेव्यन्तिके शान्तेश्चैत्यं शैत्यकरं दृशाम् ।
भवति स्म भवभ्रान्तिभिदुरं भव्यदेहिनाम् ॥ १००

श्रीशान्तिचैत्यस्य पुरो हस्तानां त्रिंशता पुनः ।
पुरुषैः सप्तभिरदः खानी द्वे स्वर्णरूप्ययोः ॥ १०१

ततो हस्तशतं गत्वा पूर्वद्वाराऽस्ति कूपिका ।
अधस्तादष्टभिर्हस्तैः श्रीसिद्धरसपूरिता ॥ १०२

श्रीपादलिप्ताचार्येण तीर्थोद्धारकृते किल ।
अस्ति संस्थापितं रत्नसुवर्णं तत्समीपगम् ॥ १०३

पूर्वस्यां वृषभबिम्बादधश्चर्षभकूटतः ।
धनूंषि त्रिंशतिं (तं?) गत्वोपवासांस्त्रीन् समाचरेत् ॥ १०४

कृते बलिविधानादौ वैरोट्या स्वं प्रदर्शयेत् ।
तदाज्ञयोद्घाट्य शिलां रात्रौ मध्ये प्रविश्यते ॥ १०५

तत्रोपवासतः सर्वाः सम्पद्यन्ते च सिद्धयः ।
तत्रर्षभार्चानमनाद्भवेदेकावतारभाक् ॥ १०६

पुरो धनुष्पञ्चशत्या आस्ते पाषाणकुण्डिका ।
ततः सप्त क्रमान् गत्वा कुर्याद्बलिविधिं बुधः ॥ १०७

शिलोत्पाटनतस्तत्र कस्यचित् पुण्यशालिनः ।
उपवासद्वयेन स्यात् प्रत्यक्षा रसकूपिका ॥ १०८

कल्किपुत्रो धर्मदत्तो भावी स परमार्हतः ।
दिने दिने जिनबिम्बं प्रतिष्ठाप्य च भोक्ष्यते ॥ १०९

स श्रीशत्रुञ्जयोद्धारं कर्ताथ जितशत्रुराट् ।
द्वात्रिंशद्वर्षराज्यश्रीर्भविष्यति तदात्मजः ॥ ११०

तत्सूनुर्मेघघोषाख्यः श्रीशान्ति-मरुदेवयोः ।
कपर्द्दियक्षस्यादेशाच्चैत्यमत्रोद्धरिष्यति ॥ १११

नन्दिः सूरिरथार्यश्च श्रीप्रभो माणिभद्रकः ।
यशोमित्रो धनमित्रस्तथा विकटधर्म्मकः ॥ ११२

सुमङ्गलः सूरसेन इत्यस्योद्धारकारकाः ।
अर्वाक् (ग् ?) दुष्प्रसहादन्ते भावी विमलवाहनः ॥ ११३

यात्रिकान् येऽस्य बाधन्ते द्रव्यं वापहरन्ति ये ।
पतन्ति नरके घोरे सान्वयास्तेंऽहसां भरात् ॥ ११४

यात्रां पूजां द्रव्यरक्षां यात्रिकस्तोमसत्कृतिम् ।
कुर्वाणोऽत्र सगोत्रोऽपि स्वर्ग्गलोके महीयते ॥ ११५

श्रीवस्तुपालोपज्ञानि पीथडादिकृतानि च ।
वक्ता पारं न यात्यत्र धर्मस्थानानि कीर्त्तयन् ॥ ११६

दुःख(ष्ष)मासचिवान् म्लेच्छाद्भङ्गं सम्भाव्य भाविनम् ।
मन्त्रीशः श्रीवस्तुपालस्तेजःपालाग्रजः सुधीः ॥ ११७

मम्माणोपलरत्नेन निर्माप्यात्यन्तनिर्म्मले ।
न्यधाद्भूमिगृहे मूर्ती आद्यार्हत्-पुण्डरीकयोः ॥ (यु.) ११८

ही ग्रहर्तुक्रियास्थान (१३६९) सङ्ख्ये विक्रमवत्सरे ।
जावडिस्थापितं बिम्बं म्लेच्छैर्भग्नं कलेर्वशात् ॥ ११९

वैक्रमे वत्सरे चन्द्रहयाग्नीन्दु(१३७१) मिते सति ।
श्रीमूलनायकोद्धारं साधुः श्रीसमरो व्यधात् ॥ १२०

तीर्थेऽत्र सङ्घपतयो ये बभूवुर्भवन्ति ये ।
ये भविष्यन्ति धन्यास्ते नन्द्यासुस्ते चिरं श्रिया ॥ १२१

कल्पप्राभृततः पूर्वं कृतः श्रीभद्रबाहुना ।
श्रीवज्रेण ततः पादलिप्ताचार्यैस्ततः परम् ॥ १२२

इतोऽप्युद्धृत्य सङ्क्षेपात् प्रणीतः कामितप्रदः ।
श्रीशत्रुञ्जयकल्पोऽयं श्रीजिनप्रभसूरिभिः ॥ १२३

कल्पेऽस्मिन् वाचिते ध्याते व्याख्याते पठिते श्रुते ।
स्यात्तृतीयभवे सिद्धिर्भव्यानां भक्तिशालिनाम् ॥ १२४

श्रीशत्रुञ्जयशैलेश ! लेशतोऽपि गुणास्तव ।
कैर्व्यावर्णयितुं नाम पार्यन्ते विदुषै (बुधै ?) रपि ॥ १२५

भवद्यात्रोपनम्राणां नृणां तीर्थानुभावतः ।
प्रायो मनःपरीणामः शुभ एव प्रवर्द्धते ॥ १२६

त्वद्यात्राप्रचलत्सङ्घरथाश्वोष्ट्रनृपादजः ।
रेणुरङ्गे लगन् भव्यपुंसां पापं व्यपोहति ॥ १२७

यावान् कर्म्मक्षयोऽन्यत्र मासक्षपणतो भवेत् ।
नमस्कारसहितादेरपि तावान् कृतात्त्वयि ॥ १२८

श्रीनाभेयकृतावास ! वासवस्तुत्यवैभव ! ।
मनसा वचसा तन्वा सिद्धिक्षेत्र ! नमोऽस्तु ते ॥ १२९

त्वत्कल्पमेतं निर्माय निर्मायमनसा मया ।
यदार्जि पुण्यं तेनास्तु विश्वं वास्तवसौख्यवत् ॥ १३०

पुस्तकन्यस्तमपि यः कल्पमेनं महिष्यति ।
न्यक्षेण काङ्क्षितास्तस्य सिद्धिमेष्यन्ति सम्पदः ॥ १३१

प्रारम्भेऽप्यस्य राजाधिराजः सङ्घे प्रसन्नवान् ।
अतो राजप्रसादाख्यः कल्पोऽयं जयताच्चिरम् ॥ १३२

श्रीविक्रमाब्दे बाणाष्टविश्वेदेव (१३८५) मिते शितौ ।
सप्तम्यां तपसः काव्यदिवसेऽयं समर्थितः ॥ १३३

पू.आ.श्री अमरप्रभसूरिविरचितम्

## ८. ॥ श्रीशत्रुञ्जयचैत्यपरिपाटीस्तोत्रम् ॥

(शार्दूलविक्रीडितम्)

मोहध्वान्तवितानतानवनवप्रोद्भासिभानुप्रभं
चिन्तातीतफलप्रदानविधये चिन्तामणिः प्राणिनाम् ।
वक्त्रालोकन एव दत्तपरमानन्दं मुदा मेदुरः
श्रीशत्रुञ्जयपर्वते जिनपतिं नाभेयदेवं स्तुवे ॥ १

पूर्वं श्रीभरतेश्वरेण भरतक्षेत्रैकचूडामणौ
शैलेऽस्मिन् स्वकुलावचूलचरितः स्वामी स्वयं कारितः ।
यस्योद्धारमकारयत् स सगरस्ते पाण्डवाद्या नृपाः
तं वन्दे विमलाचलेन्द्रतिलकं देवाधिदेवं प्रभुम् ॥ २

देव त्वद्वदनावलोकनयनप्रोद्भूदहर्षाश्रुभिः
सिक्तो मे हृदयालवालवलये पुण्यैः पुराणैः पुरा ।
न्युप्तस्त्वन्नमने मनोरथतरः सोऽयं तु रोमोद्गमै-
र्जाताङ्कुर इव क्षणेन फलितः श्रेयः फलेदद्भुतम् ॥ ३

पूर्णाः अद्य मनोरथाः शुभकथा जाताः प्रथा सर्वथा
दत्तो दुःखजलाञ्जलिः कलिमलः काले कलौ क्षालितः ।
तीर्णोऽयं भवसागरः शिवपुरी दूरेण यस्मान्नगा-
न्नागात्कस्यचनापि पूर्वमपि हि स्वामिन्भवद्दर्शनात् ॥ ४

मुक्तं यत्स्वगृहं ग्रहः स हि महामोहस्य मुक्तो महा-
(नध्वाक्तामि यादेष) दुस्तरतरः प्राप्तः स मार्गः शिवः ।
आरूढं विमलाचलं यदिह तत् प्रोच्चैर्गुणस्थानकं
दृष्टं त्वत्पदपङ्कजं च परमानन्दं पदं तन्मया ॥ ५

साक्षाद्रक्षितदक्षताहितमतिर्यक्षः कपर्दीभवत्
पादाम्भोजमधुव्रतः प्रतिपदं जायात् स शत्रुञ्जये ।
यस्त्वन्नामनिकामसादरमतेः सङ्घस्य यात्राक्षणे
मार्ग्गे दुर्ग्गसरित्सचौरचरटारण्येपि साहाय्यकृत् ॥ ६

आदौ श्रीमरुदेवि-शान्ति-ऋषभ-श्रेयांस-चैत्यं ततो
नेमि-वीरजिनं प्रणम्य ऋषभं स्वर्गाधिरोहे स्थितम् ।
पार्श्वं नौमि तमिन्द्रमण्डपगतं श्रीसुव्रतं रैवतं
वीरं सत्यपुरेश्वरं विरचितं श्रीवस्तुपालेन च ॥ ७

भक्त्या स्तौमि विदेहमण्डनजिनान् सीमन्धराद्यानपि
श्रीनन्दीश्वरमत्र चित्रजननं चाष्टापदं पाण्डवान् ।
कोटाकोटि-जिनानथो विहरतो वन्दे प्रभोः पादुकान्
नानालेप्यमयान् कृतान् जिनवरानत्र त्रयोविंशतिम् ॥ ८

वामं भ्राममकामकामविलसन् सत्पुण्डरीकादित-
स्त्रस्तोऽहं भवकानने मुनिमनः सत्पुण्डरीकांशुभत् ।
त्वामेकं शरणं करोमि भगवन् श्रीपुण्डरीकान्वितं
भक्त्या सेवककल्पपादप विभोः श्रीपुण्डरीकाचले ॥ ९

संवत्सरे सरस-लोचन-लोक-चन्द्रे
चैत्येषु चैत्रबहुलाष्टमीवासरे च ।
सानन्दमादिजिनमत्र विधाय यात्रा-
मानन्दसूरिगुरु-शिष्यलवः स्तवीति ॥ (उपजाति) १०

पू.मु. श्री विनयहंसगणिविरचितम्

## ९. ॥ श्रीशत्रुञ्जयमहातीर्थस्तोत्रम् ॥

(मन्दाक्रान्ता)

सिद्धिक्षेत्रं पदमिदमिति प्राप्तपुष्टप्रतिष्ठं
जीयादेतत्त्रिजगति गतं क्वापि नैतत्प्रभुत्वम् ।
तेन स्तुत्यः स्तुतिपदपदैर्योऽस्ति सिद्धार्थसिद्ध्यै,
तं स्तौमि त्वां विमलगिरिराट् दर्शनोदारबीजम् ॥ १

यस्यावश्यं श्रवणसुभगं नाममन्त्रं सकर्णाः
श्रावं श्रावं विमलमहिमं निर्विषं स्वात्मरूपम् ।
कुर्वन्त्युच्चैर्गुणपदभवद्भावनाभावनाभिः,
सेवे शत्रुञ्जयगिरिममुं कर्ममर्मारिजैत्रम् ॥ २

इन्द्रोपेन्द्राद्यतिरसकृताऽर्हाऽर्हणाऽरीणमूर्त्ति-,
स्फूर्त्त्यैवाशु व्यपहतजगत्पापतापप्रपातः ।
आधिव्याधिज्वरदरगराऽरिप्रपञ्चप्रवासी,
श्रेयः श्रीणां प्रकटनपरः स्तात् सतां सिद्धराजः ॥ ३

सर्वार्हद्भिः स्तुतनतमतं चाभवत् सिद्धिसिद्ध्यै,
यच्चाऽवश्यं कुगतिभयभिद्धातमात्रं त्रिलोक्याम् ।
चिन्तामण्याद्यधिकफलदं विश्वशुद्धिप्रकाशं,
सिद्धक्षेत्रं दिशतु तदिदं सिद्धिसौधाधिवासम् ॥ ४

अस्मिन् सिद्धाचलभुवि पुरा सर्वतः सर्वदेशे,
सिद्धाः सिद्धाः शरदशभिदानन्तशो ये च भव्याः ।
सेत्स्यन्त्यत्राद्भुतगुणगणे तानहं साधु सेवे,
शश्वद्भावैः सुखपदमिदं वन्दनं भाविनां यत् ॥ ५

तिर्यञ्चोऽपि प्रशमितरुषस्त्यक्तजातिस्वभावा,
लब्धा दिव्यावतरणपदं प्राप्तसौख्यप्रकर्षाः ।
यत्रामात्रा प्रतिहतगुणाः का कथा मानुषाणां,
तं श्रीमन्तं विमलमचलं साधुशुद्ध्यै प्रपद्ये ॥ ६

श्रेयःश्रेणीप्रसव इव लसत्सम्पदो-दारकन्दः,
सत्त्वालीनामिव सुखकलाचार्यकश्रीरिवास्ते ।
साक्षाद्भास्वानिव शिवपथोद्द्योतने कोविदाना,-
मुत्प्रेक्षैवं स्फुरति हृदये प्रेक्ष्य शत्रुञ्जयाद्रिम् ॥ ७

प्रज्ञा-ज्ञानं चरणकरणं दर्शनानां प्रभुत्वं,
योगाः सर्वे व्रततततपस्तप्तिभावप्रभावाः ।
त्वय्यासन्ने विपुलसफलानन्तवीर्यप्रवादाः,
सम्पद्यन्ते सुभग-गरिमागारसिद्धाचलेन्द्र ! ॥ ८

यस्मिन् दृष्टे विकटनिकटस्थायिनोऽनन्तदुःखो,-
त्पादे दक्षाः सुविपुलखलाः कर्ममर्मादिरूपाः ।
नश्यन्त्येते परिकरधरावैरिपूराः समूला,-
स्तेनेव स्याज्जगति विततं नाम शत्रुञ्जयस्य ॥ ९

राजादन्या सरस सुभग स्थापयाऽर्हन्मुखानां,
वैयावृत्त्यं स्वयमुपकृतं यत्र तेनेव मन्ये ।
पूज्या जाता जयति जगतां सिद्धराजे स्थिता सा,
प्रोच्चैःसङ्घः प्रथयति गुणित्वाख्यया वन्द्यभावम् ॥ १०

संसारामप्रमयनिरतं भेषजं दोषराग-,
द्वेषोन्मादज्वरहरवरं तथ्यपथ्यं त्रिलोक्याः ।

तापव्यापप्रशमनसुधाकुण्डमुद्दण्डलीला,
दण्डं श्रीणां विमलमचलं भावयेऽलं मुदोत्कः ॥ ११

यन्माहात्म्यं प्रकटयति सत्संसदि श्रीयुगादि,-
र्यत्सेवायां स्वयमविरतत्वेन विद्यानवद्यः ।
मोक्षद्वारं यदसममर्हीं सेविनामाह्वयानः,
केषां न स्याद्विमलगिरिराट् कामितार्थप्रदोऽसौ ॥ १२

सिद्धक्षेत्रे विततमतिभिर्द्दष्टिदृष्टे सतीष्टे,
दीप्रे भावप्रकटनपदे दुर्गतिद्वैतबाधः ।
सम्पद्येत स्वयमपि पुनर्मानुषस्वर्गमोक्ष-,
श्रेयः सौख्योदय इह सतां दर्शनं सम्पदे स्यात् ॥ १३

चिन्तामण्यादय इह फलैरैहिकैः किञ्चिदासन्,
दातृत्वाख्यास्त्वयि तु सततं शैलमौले प्रसर्पेत् ।
नानानन्तातुलफलकलादानशक्तिप्रभावः,
किं तच्चित्रं ननु सुगुरवः सर्वशक्तिप्रयुक्ताः ॥ १४

सद्भिः सेव्यः सुगुरुरिति या ख्यातिरास्ते यथार्था,
चक्रे सैवं विमलगिरिणा भावना भावितानाम् ।
एतत्तीर्थोत्तम गुरुधियामिष्टशिष्टार्थदानैः,
सर्वं युक्तं सततसफलाः सेविनां स्युर्महान्तः ॥ १५

स्मारं स्मारं विशदशिवदं रूपरूपं तवात्म,-
स्वान्तं पूतं नयनसुभगच्छायशृङ्गप्रसङ्गम् ।
कारं कारं त्वयि नुतिरतं शैलवाक्कायशुद्धिं,
कुर्वे सन्तः खलु परिचितास्तान्तिशान्त्यै प्रसन्नाः ॥ १६

सौभाग्यं तेऽनुपम महिमारम्यमान्याः क्षमः कः,
शक्त्या वक्तुं शिखरिमुकुट त्वद्गुणध्यानधन्याः ।
सम्पत्प्राप्तिं भवभयभिदं भाग्यसौभाग्यभोगं,
लब्ध्वा हृष्टप्रकृतय इहानन्दकन्दा हि सन्तः ॥ १७

वन्दे शत्रुञ्जयगिरिवरं विश्वसम्पद्विलासं
श्रेयः श्रीणां ललनसदनं ब्रह्मलक्ष्मीविनोदम् ।
कर्मारीणां सरसविजयस्तम्भमिष्टद्युरत्नं,
सद्बोहित्थं भवभयजले सर्वसिद्धिप्रसिद्धिम् ॥ १८

इत्यानन्दमहोदयोज्ज्वलकलालीलाविलासान्नुतः,
श्रीशत्रुञ्जयनामतीर्थशिखरी सौभाग्यचूडामणिः ।
त्रैलोक्योदितहर्षहर्षविनयश्रीसूरितप्रौढिमं,
बोधिं मे विदधातु कामितफलं श्रीधर्महंसश्रियम् ॥ १९

मुनिप्रवरश्री विनयहंसगणिविरचितम्

## १०. ॥ श्रीशत्रुञ्जयस्तोत्रम् ॥

(अनुष्टुप्)

जय श्रीविमलाद्रीश ! जय श्रीविमलालय ! ।
महानन्दपदं देव महानन्दपदं ददौ ॥ १

शत्रुं शत्रुञ्जयाजय्य च्छिन्द्धि भिन्द्धि तमस्तमम् ।
ग्रन्थिं ग्रन्थं च निर्ग्रन्थसेव्यसेव्यतमाह्वया ॥ २

सिद्धक्षेत्रं सुसेवध्वं सिद्धिक्षेत्रं सतां मतम् ।
भाविका भविकात्मानः पापपापवियत्पदाम् ॥ ३

पुण्डरीकाचलं वन्दे श्रीपदं पुण्डरीकवत् ।
सहसा सहसानेकदोषपोषविशोषकृत् ॥ ४

भक्तिभक्तिभरैरेवं स्तुतैः सिद्धगिरिर्गिरिः ।
स्थितः सुस्थितदो मेऽस्तु श्रीहर्षविनयश्रिया ॥ ५

पू.मु.श्री आनन्दवल्लभविजयविरचितम्

## ११. ॥ श्रीशत्रुञ्जयतीर्थाष्टकम् ॥

(उपजाति)

जगामयं श्रीवीरनाभिनन्दनोऽप्यनैकशः पुष्कलसाधुसंयुतः ।
अनन्तसज्ज्ञानधरो युगेशः, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥१

गणाधिपश्शोभनपुण्डरीकको,
वव्रे च यस्मिन् शिवसौख्यसम्पदम् ।
लसन्मुनीनामिषुकोटिभिस्समं,
शत्रुञ्जयं तं प्रणमामि भक्तितः ॥ २

मुनीश्वराः शैलक-पन्थकादयः, सुलेभिरे यत्र सुखावहं शिवम्।
दुर्भेद्यकर्मारिविनाशनक्षमं, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥३

अनेकयुद्धार्जितपापकर्मकाः, श्रीपाण्डुपुत्रा गतकल्मषा मुदा ।
ययुः पदं यत्र सुखैकभाजनं, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥४

इक्ष्वाकुवंशे भरताख्यभूपतेः, पट्टे च वव्रुर्मुनयो हि यन्नगे ।
असङ्ख्यकाः सिद्धिवधूं मनोहरां,
शत्रुञ्जयं तं प्रणमामि भक्तितः ॥ ५

स्वयं त्रयोविंशतितीर्थनायकाः,
विना च नेमिं सुखधाम्नि वव्रजुः ।
यत्राऽचले देवनरेन्द्रसेवितं, शत्रुञ्जयं तं प्रणमामि भक्तितः ॥६

विद्याधरैश्वर्यधरा मुनीश्वरा, नम्यादयो यत्र सुखेन वव्रजुः ।
सुरा-ऽसुराधीशनिषेव्यमुत्तमं,
शत्रुञ्जयं तं प्रणमामि भक्तितः ॥ ७

चक्रेश्वरी-गोमुखयक्षसेवितः, शिवैकमार्गो गिरिराजशेखरः ।
योभूत् सदा भव्यहिताय नामतः,
शत्रुञ्जयं तं प्रणमामि भक्तितः ॥ ८

रस-द्विकाऽष्ट-सिध्य(द्ध्य)ब्दे, राधमासे सिते दले ।
द्वितीयाकर्मवाट्यां च, नुनाव प्रथमो जिनः ॥ (अनुष्टुप्) ९

कवेः श्रीरामचन्द्रस्य, शिष्येणाऽत्महितेच्छुना ।
आनन्दवल्लभेनाऽसौ, श्रीसङ्घेन समं मुदा ॥ १०

# १२. ॥ श्रीपुण्डरीकगिरिस्तोत्रम् ॥

(श्रीशत्रुञ्जयचैत्यपरिपाटिका)

(वसन्ततिलका)

नम्रेन्द्रमण्डलमणीमयमौलिमाला-
मीलन्मरीचिचयचुम्बितपादपीठम् ।
नत्वा युगादिजिनमादिमतीर्थराजं
शत्रुञ्जये गिरिपतिं प्रयतः स्तवीमि ॥ १

पुण्यं चिनोति नरजन्मफलं तनोति
पापं लुनाति नयनानि सतां पुनाति ।
दूरेऽपि दर्शनपथं समुपागतो यः
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ २

श्रीपादलिप्तपुरपावनपार्श्वनाथ-
श्रीवर्धमानजिनराजयुगं नमन्ति ।
नेमीश्वरं च भविका यदधोविभागे
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ ३

शृङ्गं च यस्य भविका अधिरूढवन्तः
प्रासादपङ्क्तिममलामवलोकयन्तः ।
लोकोत्तरं किमपि सौख्यमहो ! लभन्ते
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ ४

लक्षत्रयीविरहिता द्रविणस्य कोटी-
स्तिस्रो विविच्य किल वाग्भटमन्त्रिराजः ।
यस्मिन्युगादिजिनमन्दिरमुद्दधार
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ ५

कर्पुरपूरधवला किल यत्र द्रष्टा
मूर्तिः प्रभोर्जिनगृहे प्रथमप्रवेशे ।
सम्यग्दृशाममृतपारणमातनोति
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ ६

श्रीमूलनायकजिनः प्रणतः स्तुतो वा
सम्पूजितश्च भविकैर्भवकोटिबद्धम् ।
यत्रोच्छिनत्ति सहसाऽखिलकर्मजालं
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ ७

अष्टोत्तरे च किल वर्षशते व्यतीते
श्रीविक्रमादथ बहुद्रविणव्ययेन ।
यत्र न्यवीविशत जावडिरादिदेवं
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ ८

मम्माणिनाममणिशैलतटीसमुत्थ-
ज्योतीरसाख्यवररत्नमयश्च यत्र ।
दृष्टोप्यपूर्व इव भाति युगादिदेवः
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ ९

यत्रार्चिते भगवतीह करौ कृतार्थौ
वाणी स्तुते च सफला प्रणते च भालम् ।
द्रष्टव्यदर्शनफले नयने च दृष्टे
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ १०

यत्रादिमो भगवतः किल दक्षिणाङ्गे
वामे च जावडिनिवेशितमूर्तिरन्यः ।

श्रीपुण्डरीकयुगलं भवभीतिभेदी
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ ११

यत्राद्यदेवगृहदक्षिणबाहुसंस्थं
श्रीपार्श्वनाथभवनं समरागरस्य ।
पुण्यप्रकर्षमिव विश्वकृतः प्रमोदं
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ १२

इक्ष्वाकु-वृष्णिकुलजामुनिकोटिकोट्यः
सङ्ख्यातिगाः शिवसुखश्रियमत्र भेजुः ।
इत्याह यत्र तिलकं किल कोटिकोट्यः
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ १३

चन्द्रानन-प्रभृतिनित्यजिनान्वितानां
सद्विंशतेर्विहरतां जिनपुङ्गवानाम् ।
यत्रोच्चकैर्भुवनमस्ति निरस्तदोषं
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ १४

पञ्चापि पाण्डुतनया सहिता जनन्या
कुन्ताख्यया शिवमगुः शिखरे यदीये ।
तन्मूर्त्तयः षडिति शासति यत्र लेप्याः
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ १५

यत्र प्रियालुरिति चैत्यतरुश्चिरन्तः
श्रीसङ्घपुण्यमहिमाद्भुतदुग्धवर्षी ।
शस्तं समस्त्यनुपमाख्यसरोवरं च
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ १६

श्रीपादुकां भगवतः प्रणिपत्य यत्र
भालस्थले तिलकिता नखजैर्मयूखैः ।
भव्या भवन्ति सुभगाः शिवसौख्यलक्ष्म्याः
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ १७

हिंसाजुषोऽपि पशवोऽपि मयूरमुख्याः
स्पृष्ट्वा यदीयशिखरं परिपूतदेहाः
आस्वादयन्ते तरसा सुरसम्पदोऽपि
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ १८

द्वाविंशतिर्जिनवरा अजितादयस्ते
स्वस्वप्रभान्वितसपादुकलेप्यबिम्बैः ।
अत्रैयरुः श्रुतिम(मि)ति द्रढयन्ति यत्र
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ १९

वामे च पार्श्व इह सत्यपुरावतारः
स्याद् दक्षिणे शकुनिकाङ्क्तिसद्विहारः ।
अष्टापदो भगवतः किल यत्र पृष्ठे
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ २०

नन्दीश्वरस्य गिरिनारगिरीश्वरस्य
श्रीस्तम्भनस्य भविका अवतारतीर्थम् ।
संवीक्ष्य तत्र परमां मुदमुद्वहन्ति
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ २१

स्वर्गाधिरोहभवने जगतां कृपालु-
र्यत्र प्रभुर्विनमिना नमिना च सेव्यः ।

तत्खड्ग-बिम्बनकृताऽपररूपयुग्मः
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ २२

श्रीषोडशो जिनपतिः प्रथमो जिनेशः
श्रेयांसनेमिजिनवीरजिनेन्द्रमुख्याः ।
शृङ्गं द्वितीयमिह यत्र पवित्रयन्ति
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ २३

त्रैलोक्यलोचनचकोरकचन्द्रिकाभा
सुस्वामिनी शिवगता मरुदेवीनाम्नी ।
यत्र प्रयच्छति निजं सुखसंविभागं
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ २४

यत्रैष भव्यजनकल्पितकल्पवृक्षः
श्रीसङ्घरक्षणमहर्निशबद्धकक्षः ।
अष्टासु दिक्षु वितनोति कपर्दियक्षः
श्रीमानसौ विजयतां गिरिपुण्डरीकः ॥ २५

(शार्दूलविक्रीडितम्)

इत्येवंविधपुण्डरीकशिखरीस्तोत्रं पवित्रं मुदा
श्रीमन्नाभिनरेन्द्रनन्दनजिनध्यानैकतानव्रतः ।
श्रद्धाबन्धुरमानसः पठति यः सन्ध्याद्वये नित्यशः
स्थानस्थोपि निरन्तरं स लभते सत्तीर्थयात्राफलम् ॥ २६

# १३. ॥ श्रीशत्रुञ्जयतीर्थस्तोत्रम् ॥

पूर्णानन्दमयं महोदयमयं कैवल्यचिद्दृङ्मयं,
रूपातीतमयं स्वरूपरमणं स्वाभाविकी-श्रीमयम् ।
ज्ञानोद्योतमयं कृपारसमयं स्याद्वादविद्यालयं,
श्रीसिद्धाचलतीर्थराजमनिशं वन्देऽहमादीश्वरम् ॥(शा.वि.) १

(इन्द्रवज्रा)

श्रीमद्युगादीश्वरमात्मरूपंलो, योगीन्द्रगम्यं विमलाद्रिसंस्थम् ।
सज्ज्ञानसद्दृष्टिसुदृष्टलोकं, श्रीनाभिसूनुं प्रणमामि नित्यम् ॥२

राजादनाधस्तनभूमिभागे, युगादिदेवाङ्घ्रिसरोजपीठम् ।
देवेन्द्रवन्द्यं नरराजपूज्यं, सिद्धाचलाग्रस्थितमर्चयामि ॥ ३

आदिप्रभोर्दक्षिणदिग्विभागे, सहस्रकूटे जिनराजमूर्त्तीः ।
सौम्याकृतीः सिद्धततीनिभाश्च, शत्रुञ्जयस्थाः परिपूजयामि ॥४

आदिप्रभोर्वक्त्रसरोरुहाच्च, विनिर्गतां श्रीत्रिपदीमवाप्य ।
यो द्वादशाङ्गीं विदधे गणेशः, स पुण्डरीको जयताच्छिवाद्रौ ॥५

चउद्दसाणं सयसंखयाणं, बावण्णसहियाण गणाहिवाणं ।
सुपाउआ जत्थ विराजमाणा,
सत्तुंजयं तं पणमामि णिच्चं ॥ (उपजाति) ६

चत्तट्ठकम्मा परिणामरम्मा, लद्धप्पधम्मा सुगुणेहिं पुण्णा ।
चत्तारि अट्ठा दस दुण्णि देवा, अट्ठावए ताइं जिणाइं वंदे ॥ ७

अणंतणाणीण अणंतदंसिणो, अणंतसुक्खाण अणंतवीरिणो ।
वीसं जिणा जत्थ सिवं पवण्णा,
सम्मेअसेलं तमहं थुणामि ॥ (उपजाति) ८

जत्थेव सिद्धो पढमो मुणिंदो, गणाहिवो पुंडरिओ विसिट्ठो ।
अणेगसाहु परिवारसंजुओ,
तं पुण्डरीयाचलमंचयामि ॥ (उपजाति) ९

विमलगिरिवतंसः सिद्धिगङ्गाम्बुहंसः,
सकलसुखविधाता दर्शन-ज्ञानदाता ।
प्रणतसुरनरेन्द्रः केवल-ज्ञानचन्द्रः,
सृजतु मुदमुदारं नाभिजन्मा जिनेन्द्रः ॥ (मालिनी) १०

## १४. ॥ श्रीशत्रुञ्जयगिरिस्तोत्रम् ॥

(उपजाति)

शत्रुञ्जयो नाम नगाधिराजः सौराष्ट्रदेशे प्रथितप्रशस्तिः ।
तीर्थाधिराजो भुवि पुण्यभूमिस्तत्रादिनाथं शिरसा नमामि ॥१

अनन्ततीर्थाधिपसाधुवृन्दैर्या सेविता शान्तितपाभिवृद्धयै ।
सा पुण्यभूमिर्वितनोतु सौख्यं, जिनादिनाथं शिरसा नमामि ॥२

अनेकराज्याधिपमन्त्रिमुख्यै-र्विनिर्मिता सुन्दरचैत्यपङ्क्तिः ।
स्वर्भूमितुल्या भुवि सुप्रसिद्धा,
तत्रादिनाथं शिरसा नमामि ॥ ३

विश्रामधामो मुनिसाधकानां, संसारतापै-र्हतसाधकानाम् ।
यो यानतुल्यो च भवाऽपमार्गे, तमादिनाथं शिरसा नमामि ॥४

या पादपद्मैः पुनिता सुभूमि-रनन्तयोगिमुनिभिर्नितान्तम् ।
आकर्षणं चुम्बकरत्नतुल्यं, तत्रादिनाथं शिरसा नमामि ॥ ५

निसर्गरम्योदितनाकतुल्या, गिरीन्द्रसौगन्धितवृक्षराजिः ।
विचित्रवर्णैः सुमनोहरा च, तत्रादिनाथं शिरसा नमामि ॥ ६

शचीन्द्रदैवैः परिवेष्टिता च नृत्यन्ति शृङ्गारभूताः सुभक्त्या ।
कुर्वन्ति वृष्टिं मधुगन्धपुष्पै-स्तत्रादिनाथं शिरसा नमामि ॥ ७

स्वजीवितं पावनतामुपैति, ये पूजयन्ति प्रभुपादयुग्मम् ।
श्रीनाभिपुत्रं प्रथमं जिनेन्द्रं, युगादिनाथं शिरसा नमामि ॥ ८

## १५. ॥ श्रीशत्रुञ्जयमहातीर्थाधिराजस्तोत्रम् ॥

(अनुष्टुप्)

धरणेन्द्रमुखा नागाः पातालस्थान वासिनः ।
सेवन्ते यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ १

चमरेन्द्रबलीन्द्राद्याः सर्वे भुवनवासिनः ।
सेवन्ते यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ २

किन्नर किम्पुरुषाद्याः, किन्नराणां च वासवाः ।
सेवन्तं यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ ३

राक्षसानामधीशाश्च यक्षेशाः सपरिच्छदाः ।
सेवन्ते यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ ४

ज्योतिषां वासवौ चन्द्र-सूर्यावन्येपि खेचराः ।
सेवन्ते यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ ५

अणपन्नी पणपन्नीमुखा व्यन्तरनायकाः ।
सेवन्ते यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ ६

मनुष्यलोकसंस्थानां, वासुदेवाश्च चक्रिणः ।
सेवन्ते यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ ७

इन्द्रोपेन्द्रादयोप्येते सिद्ध-विद्याधराधिपाः ।
सेवन्ते यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ ८

ग्रैवेयकानुत्तरस्था मनसा त्रिदीवौकसाः ।
सेवन्ते यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ ९

एवं त्रैलोक्यसंस्थाना, एते नरसुरासुराः ।
सेवन्ते यं सदा तीर्थ-राजं तस्मै नमो नमः ॥ १०

अनन्तमक्षयं नित्यमनन्तफलदायकम् ।
अनादिकालजं यच्च, तीर्थं तस्मै नमो नमः ॥ ११

सिद्धास्तीर्थकृतोऽनन्ता, यत्र सेत्स्यन्ति चापरे ।
मुक्तेर्लीलागृहं यच्चं, तीर्थं तस्मै नमो नमः ॥ १२

इमां स्तुतिं पुण्डरीकगिरेर्यः पठति सदा ।
स्थानस्थोपि स यात्रायाः, लभ्यते फलमुत्तमम् ॥ १३

## १६. ॥ श्रीशत्रुञ्जयमहातीर्थाधिराजस्तोत्रम् ॥

(अनुष्टुप्)

श्री शत्रुञ्जयः पुण्डरीकः, सिद्धक्षेत्रं महाचलः ।
सुरशैलो विमलाद्रिः, पुण्यराशिः श्रियःपदम् ॥ १

पर्वतेन्द्रः सुभद्रश्च, दृढशक्तिरकर्मकः ।
मुक्तिगेहं महातीर्थं शाश्वतः सर्वकामदः ॥ २

पुष्पदन्तो महापद्मः पृथ्वीपीठं प्रभोः पदम् ।
पातालमूलं कैलासं, क्षितिमण्डल-मण्डनम् ॥ ३

शतमष्टोत्तरं नाम्ना-मित्याद्युक्तममुष्य हि ।
महाकल्पे विजानीयात्, सुधर्मोक्तेऽति शर्मदः ॥ ४

नामान्यमूनि यः प्रातः पठत्याकर्णयत्यपि ।
भवन्ति सम्पदः तस्य, व्रजन्ति विपदः क्षयम् ॥ ५

तीर्थानामुत्तमं तीर्थं, नगानामुत्तमो नगः ।
क्षेत्राणामुत्तमं क्षेत्रं, सिद्धयद्रिरयमीरितः ॥ ६

## १७. ॥ श्रीशत्रुञ्जयैकविंशतिनामगर्भिता स्तुतिः ॥

विमलगिरि मुत्तिनिलओ, संत्तुजो सिद्धखित्त पुंडरिओ ।
सिरिसिद्ध सेहरओ, सिद्धपव्वओ सिद्धराओ अ ॥ १

बाहुबली मरुदेवो, भगीरहो सहस्सपन्नसयवन्तो ।
कूडसयडुत्तरओ, नगाहिराओ सहस्सकमलो ॥ २

ढंको कउडिनिवासो, लोहिच्चो तालज्झओ कयंबुत्ति ।
सुरनरमुणिकयनामो, सो विमलगिरि जयउ तित्थं ॥ ३

पू.आ. श्री धर्मघोषसूरिविरचितः

## १८. ॥ श्रीगिरिनारकल्पः ॥

वरधर्मकीर्तिविद्यानन्दमयो यत्र विनतदेवेन्द्रः ।
स्वस्ति श्रीनेमिरसौ, गिरिनारगिरीश्वरो जयति ॥ १

नेमिजिनो यदुराजीमतीत्य राजीमतीत्यजनतो यम् ।
शिश्राय शिवायासौ, गिरिनारगिरीश्वरो जयति ॥ २

स्वामी छत्रशिलान्ते, प्रव्रज्य यदुच्चशिरसि चक्राणः ।
ब्रह्मावलोकनमसौ, गिरिनारगिरीश्वरो जयति ॥ ३

यत्र सहस्राम्रवने, केवलमवाप्यादिशद् विभूर्धर्मम् ।
लक्षारामे सोऽयं, गिरिनारगिरीश्वरो जयति ॥ ४

निर्वृतिनितम्बिनीवर - नितम्बसुखमाप यन्नितम्बस्थः ।
श्रीयदुकुलतिलकोऽयं, गिरिनारगिरीश्वरो जयति ॥ ५

बुद्ध्वा कल्याणत्रयमिह कृष्णो रुप्यरूक्ममणिबिम्बम् ।
चैत्यत्रयमकृतायं, गिरिनारगिरीश्वरो जयति ॥ ६

पविना हरिर्यदन्तर्विधाय विवरं व्यधाद् रजतचैत्यम् ।
काञ्चनबलानकमयं, गिरिनारगिरीश्वरो जयति ॥ ७

तन्मध्ये रत्नमयीं, प्रमाणवर्णान्वितां चकार हरिः ।
श्रीनेमेर्मूर्तिमसौ, गिरिनारगिरीश्वरो जयति ॥ ८

स्वकृतैतद्बिम्बयुतं, हरिस्त्रिबिम्बं सुरैः समवसरणे ।
न्यदधत् यदन्तरसौ, गिरिनारगिरीश्वरो जयति ॥ ९

शिखरोपरि यत्राम्बा-ऽवलोकनशिरस्थरङ्गमण्डपके ।
शम्बो बलानकेऽसौ, गिरिनारगिरीश्वरो जयति ॥ १०

यत्र प्रद्युम्नपुरः सिद्धिविनायकसुरः प्रतिहारः ।
चिन्तितसिद्धिकरोऽसौ, गिरिनारगिरीश्वरो जयति ॥ ११

तत्प्रतिरुपं चैत्यं, पूर्वाभिमुखं तु निर्वृतिस्थाने ।
यत्र हरिश्चक्रेऽसौ, गिरिनारगिरीश्वरो जयति ॥ १२

तीर्थेऽतिस्मरणाद् यत्र यादवाः सप्त कालमेघाद्याः ।
क्षेत्रपतामापुरसौ, गिरिनारगिरीश्वरो जयति ॥ १३

विभुमर्चति मेघरवो, बलानकं गिरिविदारणश्चक्रे ।
यत्र चतुर्द्वारमसौ, गिरिनारगिरीश्वरो जयति ॥ १४

यत्र सहस्राम्रवनान्तरस्ति रम्या सुवर्णचैत्यानाम् ।
चतुरधिकविंशतिरयं, गिरिनारगिरीश्वरो जयति ॥ १५

द्वासप्ततिर्जिनानां, लक्षारामेऽस्ति यत्र तु गुहायाम् ।
सचतुर्विंशतिकाऽसौ, गिरिनारगिरीश्वरो जयति ॥ १६

वर्षसहस्रद्वितयं, प्रावर्तत यत्र किल शिवासूनोः ।
लेप्यमयी प्रतिमाऽसौ, गिरिनारगिरीश्वरो जयति ॥ १७

लेपगमेऽम्बादेशात्, प्रभुचैत्यं यत्र पश्चिमाभिमुखम् ।
रतनोऽस्थापयतासौ, गिरिनारगिरीश्वरो जयति ॥ १८

काञ्चनबलाकान्तः समवसृतेस्तन्तुनेह बिम्बमिदम् ।
रतनेनानीतमसौ, गिरिनारगिरीश्वरो जयति ॥ १९

बौद्धनिषिद्धः सङ्घो, नेमिनतौ यत्र मन्त्रगगनगतिम् ।
जयचन्द्रमादिशदसौ, गिरिनारगिरीश्वरो जयति ॥ २०

तारां विजित्य बौद्धान् निहत्य देवानवन्दयत् सङ्घम् ।
जयचन्द्रो यत्रायं गिरिनारगिरीश्वरो जयति ॥ २१

नृपपुरतः क्षपणेभ्यः कुमार्युदितगाथयाऽम्बयाऽर्प्यत यः ।
श्रीसङ्घाय सदाऽयं, गिरिनारगिरीश्वरो जयति ॥ २२

नित्यानुष्ठानान्ततोऽनुसमयं समस्तसङ्घेन ।
यः पठ्यतेऽनिशमसौ, गिरिनारगिरीश्वरो जयति ॥ २३

दीक्षाज्ञानध्यानव्याख्यानशिवावलोकनस्थाने ।
प्रभुचैत्यपावितोऽसौ, गिरिनारगिरीश्वरो जयति ॥ २४

राजीमतीचन्द्रदरी - गजेन्द्रपदकुण्डनागझर्यादौ ।
यः प्रभुमूर्तियुतोऽयं, गिरिनारगिरीश्वरो जयति ॥ २५

छत्राक्षरघण्टाञ्जन-बिन्दुशिवशिलादि यत्र हार्यति ।
कल्याणकारणमयं, गिरिनारगिरीश्वरो जयति ॥ २६

याकुड्यमात्यसज्जन - दण्डेशाद्या अपि व्यधुर्यत्र ।
नेमिभवनोद्धृतिमसौ, गिरिनारगिरीश्वरो जयति ॥ २७

कल्याणत्रयचैत्यं, तेजपालो न्यवीविशन्मन्त्री ।
यन्मेखलागतमसौ, गिरिनारगिरीश्वरो जयति ॥ २८

शत्रुञ्जयसम्मेताष्टापदतीर्थानि वस्तुपालस्तु ।
यत्र न्यवेशयदसौ, गिरिनारगिरीश्वरो जयति ॥ २९

यः षड्विंशतिविंशति षोडशदशकद्वियोजनास्त्रशतम् ।
अरषट्क उच्छ्रितोऽयं, गिरिनारगिरीश्वरो जयति ॥ ३०

अद्यापि सावधाना, विदधाना यत्र गीतनृत्यादि ।
देवाः श्रूयन्तेऽसौ, गिरिनारगिरीश्वरो जयति ॥ ३१

विद्याप्राभृतकोद्धृत- पादलिप्तकृतोज्जयन्तकल्पादेः ।
इति वर्णितो मयाऽसौ, गिरिनारगिरीश्वरो जयति ॥ ३२

पू.आ.श्री जयशेखरसूरिविरचिता

## १९. ॥ श्रीगिरनारतीर्थस्तुतिगर्भिताद्वात्रिंशिका ॥

(उपजाति)

शृङ्गारयन्तं गिरिमुज्जयन्तं, पञ्चेषुचक्रम् धुतमुज्जयन्तम् ।
श्रीनेमिनं नौमि निरस्तमोहं, व्यपोहितुं भक्तिपरस्तमोऽहम् ॥१

स्तुतं श्रुतज्ञैः समतोदधे ! त्वां,
स्तुवन्नविद्वानपि नाऽस्मि निन्द्यः ।
निम्बः स्फुटन्मासि मधौ विकासी-
रसालसंशालिनि किं विगेयः ? ॥ २

ममाद्य माद्यत्तमसां विनाशे, ज्ञाते च मोक्षाध्वनि सुप्रकाशे ।
श्रीउज्जयन्तोदयशैलशृङ्गे, त्वद्दर्शनेनाऽजनि सुप्रभातम् ॥ ३

नृपः समुद्रो विजयात् पयोधे-र्जातो जगन्नाथ ! यथार्थनामा ।
लोकद्वयास्तोकसुखोपनेता, चिन्तामणिः प्रादुरभूर्यतस्त्वम् ॥४

आदृत्य सिंहासनमुग्रनाददुर्वादिदन्तीन्द्रनिराकरिष्णुम् ।
याऽजीजनत्त्वां महिला बलाढ्यं,
चित्रं ! शिवेति श्रुतिमाप सापि ॥ (इन्द्रवज्रा) ५

ब्रह्मास्त्रनिर्नाशितभावशत्रोः, पुष्पायुधेनापि विडम्ब्यमानः ।
कृष्णः सतृष्णस्तव निर्जयाय, मृगो मृगारेरिव किं रराज ? ॥६

स्वयं प्रपद्यापि विवाहकर्म, धर्म्मज्ञ ! यत्तत्र पराङ्मुखोऽभूः ।
तत्रैकहेतुः शिवलाभलोभो,
लोभान्न वा कस्त्यजति प्रतिज्ञाम् ॥ ७

अदस्तदा निर्वृतिकारि कारा-निबद्धतिर्यक्षु यथा स्वचक्षुः ।
किं सारशक्ते ! परमोपरक्ते,
भक्ते जनेऽस्मिन्न तथा ददासि ? ॥ ८

चेत्त्वं मुमुक्षुः किमुरीकृताह-मुरीकृता वा किमु नाथ ! मुक्ता ?।
स्वयं नयज्ञोऽसि किमुच्यते ते ?,
जीयाद्वचो भोजभुवस्त्वयीति ॥ ९

राजीमती मन्थरताबलत्वलक्ष्म स्त्रियां मार्ष्टुमिहोदियाय ।
किमन्यथा त्वत्प्रथमं जगाम,
सा कामवीराभिभवाद्धवान्तम् ॥ १०

घनाघनाभे त्वयि पर्वतेऽत्र, वर्षत्यजस्रं वचनामृतेन ।
भव्या अभव्याः क्रमशो मयूर-
मरालकेलीः कलयाम्बभूवुः ॥ ११

पपात पूरे पतितं यदीये, त्रिलोकमन्तर्भववार्द्धि तस्याम् ।
कृष्णानुजः कृष्णतनुश्च कृष्ण-
चित्रोऽभवस्त्वं प्रमदापगायाम् ॥ १२

भवन्मतेन्दोर्मम हृच्चकोरे, शमामृतं साधुहितं पिपासौ ।
अदभ्रविश्रोतसिकाभ्ररेखा, सैषान्तरुत्थाय करोति विघ्नम् ॥१३

नीतं फलाशां मम चारुचेतः-क्षेत्रे त्वदाज्ञामृतसारणीभिः ।
कुतोप्युपेतो बत बोधिबीजं,
प्रमादकोलः सकलं निहन्ति ॥ १४

याऽसूत्रि सूत्रेण तवैव पुण्य-शाला विशाला मम चित्तभूमौ ।
तामद्य भिन्दन् क्रमबद्धमूलो,
मोहप्ररोहः कथमेष रक्ष्यः ? ॥ (इन्द्रवज्रा) १५

भवाटवीतः शिववासमाप्तुमुपक्रमन्तेऽत्र जना न के के ? ।
मिथ्यात्वरथ्यापरिवर्त्ततस्तु, ते दिग्विमूढा इव हि भ्रमन्ति ॥१६

तुच्छेन्द्रियार्थैः कुवलीफलाभैर्विलोभ्य मां बालमनङ्गधूर्त्तः ।
त्वदेव देवाधिगतं विवेक-रत्नं भृशं दुर्ल्लभमाच्छिनत्ति ॥ १७

समं सुमास्त्रेण तवाऽवियोगा, कदा जगन्मित्र ! बभूव मैत्री ।
स्थितिर्मदन्तःकरणेऽल्पकेऽपि,
तवापि तस्यापि यदद्य जाता ॥ (उपेन्द्रवज्रा) १८

युधि त्वया त्रासित एष कामो, मच्चित्तदुर्गं विवशो विवेश ।
तत्रापि वीरस्त्वमुपागतोऽसि, तद्दूरय क्रूरममुं निगृह्य ॥ १९

अपायतः पासि कथं त्रिलोक-मोकस्तवैवातिकृशं भृशं सः ।
मच्चेत एतत्त्वयि मध्यगेपि, यत्साम्प्रतं लुम्पति कामचौरः ॥२०

यद्वा स्वसद्मापि समत्वसार !, नाऽरिक्षितं रक्षितुमुद्यमस्ते ।
अयं शमः कस्य न विस्मयाय,
पुनः प्रभो ! न प्रभुधर्म एषः ॥ २१

सर्वस्वनाथ ! स्वयमेव चेत-श्चेत्कृन्तसीदं मम तन्न खेदः ।
रागादिभिर्वैरिभिरर्द्यमान-मुपेक्षसे यत्तदलं दुनोति ॥ २२

येन त्वदाज्ञा बहुशो व्यलोपि, भ्रमेण सर्वत्र तया भियेव ।
स एष चेतश्चरटो नियन्त्र्य
युक्तं त्वयावासि निजाङ्घ्रिमूले ॥ २३

शान्ताभिधं सिद्धरसं तवेश !, दृष्टावहं साधयितुं समीहे ।
पञ्चेन्द्रियव्यन्तरका अकाले, जिहीर्षवस्तं भवतैव वार्याः ॥२४

भवोदधौ तावकतत्त्वमुक्ता, व्यक्ता जिघृक्षामि सुदुर्विधोऽहम् ।
दुरायतिर्धावति किन्तु हन्तुमज्ञाननक्रः क्रियते किमीश ! ॥२५

शमद्रुमो मे भवदुक्तवृत्त्या, प्रपालितः पुण्यफलान्यदास्यत् ।
न चोद्धर्वशोषं तमशोषयिष्य-
न्निविश्य चेत्कोपकपोतपोतः ॥ (उपेन्द्रवज्रा) २६

त्वदागमाम्भोदरसैरशेषां, तृष्णामहं चातकवच्छिनद्मि ।
यावद्भवौ तावदखर्वगर्व-पूर्वानिलो मत्प्रमदासहिष्णुः ॥ २७

संसारकुग्राममपास्य मुक्ति-पुर्यै प्रतिष्ठेऽधिगतत्रिरत्नः ।
यदा तदाभिज्ञ ! भनक्ति मायो-
रगी पुरोगा शकुनानुकूल्यम् ॥ २८

निघ्नन्मनोरङ्कुमवार्यवीर्य-स्तुष्टे त्वयि द्वीपितुलामवापम् ।
परं चरन्तं शिववर्त्मना मां, लोभानलो भापयति प्रदीप्तः ॥२९

मां यानि यान्तं नरकादिघोर-स्थानेष्वपि प्रागनुजग्मुरीश ! ।
कर्म्माणि तानि त्वयि वीक्षितेऽपि,
नोज्झन्ति हेतुश्चिरसंस्तवोऽत्र ॥ (इन्द्रवज्रा) ३०

सम्भूय भावारिभिरेवमर्द्य-मानं स्वयं शाश्वतसौख्यलीनः ।
उपेक्षसे मां यदि तद्वराकी,
निराश्रया नाथ ! दया क्व यातु ? ॥ ३१

उत्सार्य मात्सर्यमदादिवैरि-व्रातं निरातङ्कतया कथञ्चित् ।
विश्वेश ! विश्वासुखपीडितोऽहं,
प्राप्तोऽस्मि ते दृष्टिमतः प्रसीद ॥ (इन्द्रवज्रा) ३२

श्रीमद्रैवतदैवत ! स्तुतिमिमां निर्माय नेमीश ! ते,
सूरिः श्रीजयशेखरः स्थिरधिया यत्पुण्यमासादयत् ।
तेन स्तेनतुलान्तरारिनिवहाव्यालुप्तविद्याधनो,
धेयात्त्वन्मतपूततत्त्वपदवीनित्याध्वगानां धुरम् ॥(शा.वि.) ३३

पू.आ.श्री जिनप्रभसूरिविरचितः

## २०. ॥ श्रीउज्जयन्तगिरिस्तवः ॥

(अनुष्टुप्)

नामभिः श्रीरैवतकोज्जयन्ताद्यैः प्रथामितम् ।
श्रीनेमिपावितं स्तौमि गिरिनारं गिरीश्वरम् ॥ १

स्थाने देशः सुराष्ट्राख्यां बिभर्ति भुवनेष्वसौ ।
यद्भूमिकामिनीभाले गिरिरेष विशेषकः ॥ २

शृङ्गारयन्ति खङ्गारदुर्गं श्रीऋषभादयः ।
श्रीपार्श्वस्तेजलपुरं भूषितैतदुपत्यकम् ॥ ३

योजनद्वयतुङ्गेऽस्य शृङ्गे जिनगृहावलिः ।
पुण्यराशिरिवाभाति शरच्चन्द्रांशुनिर्मला ॥ ४

सौवर्णदण्डकलशामलसारकशोभितम् ।
चारु चैत्यं चकास्त्यस्योपरि श्रीनेमिनः प्रभोः ॥ ५

श्रीशिवासूनुदेवस्य पादुकाऽत्र निरीक्षिता ।
स्पृष्टाऽर्चिता च शिष्टानां पापव्यूहं व्यपोहति ॥ ६

प्राज्यं राज्यं परित्यज्य जरत्तृणमिव प्रभुः ।
बन्धून्विधूय च स्निग्धान् प्रपेदेऽत्र महाव्रतम् ॥ ७

अत्रैव केवलं देवः स एव प्रतिलब्धवान् ।
जगज्जनहितैषी स पर्यणैषीच्च निर्वृतिम् ॥ ८

अत एवात्र कल्याणत्रयमन्दिरमादधे ।
श्रीवस्तुपालो मन्त्रीशश्चमत्कारितभव्यहृत् ॥ ९

जिनेन्द्रबिम्बपूर्णेन्द्रमण्डपस्था जना इह ।
श्रीनेमेर्मज्जनं कर्तुमिन्द्रा इव चकासति ॥ १०

गजेन्द्रपदनामास्य कुण्डं मण्डयते शिरः ।
सुधाविधैर्जलैः पूर्णं स्नानार्हत्स्नपनक्षमैः ॥ ११

शत्रुञ्जयावतारेऽत्र वस्तुपालेन कारिते ।
ऋषभः पुण्डरीकोऽष्टापदो नन्दीश्वरस्तथा ॥ १२

सिंहयाना हेमवर्णा सिद्धबुद्धसुतान्विता ।
कम्राम्रलुम्बिभृत्पाणिरत्राम्बा सङ्घविघ्नहृत् ॥ १३

श्रीनेमिपत्पद्मपूतमवलोकननामकम् ।
विलोकयन्तः शिखरं यान्ति भव्याः कृतार्थताम् ॥ १४

शाम्बो जाम्बवतीजातस्तुङ्गे शृङ्गेऽस्य कृष्णजः ।
प्रद्युम्नश्च महाद्युम्नस्तेपाते दुस्तपं तपः ॥ १५

नानाविधौषधिगणा जाज्वलन्त्यत्र रात्रिषु ।
किञ्च घण्टाक्षरच्छत्रशिलाः शालन्त उच्चकैः ॥ १६

सहस्राम्रवणं लक्षारामोऽन्येपि वनव्रजाः ।
मयूरकोकिलाभृङ्गीसङ्गीतिसुभगा इह ॥ १७

न स वृक्षो न सा वल्ली न तत्पुष्पं न तत्फलम् ।
नेक्ष्यतेऽत्राभियुक्तैर्यदित्यैतिह्यविदो विदुः ॥ १८

राजीमती गुहागर्भे कैर्न नामात्र वन्द्यते ।
रथनेमिर्ययोन्मार्गात्सन्मार्गमवतारितः ॥ १९

पूजास्नपनदानानि तपश्चात्र कृतानि वै ।
सम्पद्यन्ते मोक्षसौख्यहेतवो भव्यजन्मिनाम् ॥ २०

दिग्भ्रमावपि योऽत्राद्रौ क्वाप्यमार्गेऽपि सञ्चरन् ।
सोऽपि पश्यन्ति चैत्यस्था जिनार्चाः स्नपितार्चिताः ॥ २१

काश्मिरागतरत्नेन कूष्माण्ड्यादेशतोऽत्र च ।
लेप्यबिम्बास्पदे न्यस्ता श्रीनेमेर्मूर्त्तिराश्मनी ॥ २२

नदीनिर्जरकुण्डानां खनीनां वीरुधामपि ।
विदाङ्करोत्वतः सङ्ख्याः सङ्ख्यावानपि कः खलु ॥ २३

आसेचनकरूपाय महातीर्थाय तायिने ।
चैत्यालङ्कृतशीर्षाय नमः श्रीरैवताद्रये ॥ २४

स्तुतो मयेति सूरीन्द्रवर्णितावृजिनप्रभः ।
गिरिनारस्तारहेमसिद्धिभूमिर्मुदेऽस्तु वः ॥ २५

पू.आ.श्री विजयचन्द्रसूरिविरचितम्

## २१. ॥ श्रीरैवताचलचैत्यपरिपाटीस्तवनम् ॥

(वसन्ततिलका)

राजीमतीयुवतिमानसराजहंसः,
श्रीयादवप्रथितवंशशिरोऽवतंसः ।
नेमिर्निजांह्रिकमलैरमलं चकार,
श्रीरैवतं गिरिपतिं तमहं स्तवीमि ॥ १

पार्श्वः स तेजलपुरैकशिरःकिरीटः,
खङ्गारदुर्गतिलकाः वृषभादिदेवाः ।
पुष्णन्ति पुण्यममलं यदुपत्यकायां,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ २

अभ्रंलिहा जिनगृहावलिरिन्दुशुभ्राः,
शृङ्गे यदीय इह योजनयुग्मतुङ्गे ।
पिण्डीकृतः सुकृतराशिरिवैष भाति,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ ३

सौवर्णदण्डकलशाऽऽमलसारसारं,
श्रीनेमिमन्दिरमुदारमुदं विधत्ते ।
यस्योपरि त्रिदशखेचरसुन्दरीणां,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ ४

यत्राङ्गिभिः कृतनुतिः प्रभुपादुकेयं,
सन्तक्ष्य पापपटलं नखकोटिटङ्कैः ।
पुण्यानि भालफलकेषु समुत्करोति,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ ५

त्रैलोक्यलोकशुचिलोचनलोभनीये,
नेमीश्वरे जिनवरे किल यत्र दृष्टे ।
चेतः प्रसीदति विषीदति दुःखराशिः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ ६

प्राज्यं जरत्तृणमिव प्रविहाय राज्यं,
बन्धून् विधूय विधुरानपि यत्र नेमिः ।
दीक्षां श्रितस्त्रिभुवनाभयदानदक्षां,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ ७

नेमीशितुर्भगवतोऽजनि यत्र लोका-
ऽऽलोकाविलोकनकलाकलितस्वभावम् ।
ज्योतिर्जगज्जनवनीनवनीरदाऽऽभं,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ ८

षट्त्रिंशतास्यधिकया मुनिपञ्चशत्या,
नेमिर्निषण्णवपुषाऽनशितश्च मासम् ।
यस्मिन् जगाम शिवमद्भुतधामधाम,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ ९

श्रीजैनबिम्बभृतवासवमण्डपस्थाः,
श्रीनेमिमज्जनमहोत्सवबद्धकक्षाः ।
यस्मिन् सहस्रनयना भविनो भवन्ति,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ १०

यत्रावतार इव सर्वसरस्वतीनां,
रम्यं सदैव सलिलैरमृतायमानैः ।

कुण्डं विराजति गजेन्द्रपदाभिधानं,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ ११

अष्टापदप्रभृतिकीर्त्तनकीर्त्तनीये,
श्रीवस्तुपालसचिवाधिपतेर्विहारे ।
यत्र स्वयं निवसति प्रथमो जिनेन्द्रः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ १२

सिंहासना वरसुवर्णसुवर्णदेहा,
पुष्पन्धयी पदसरोरुहि नेमिभर्तुः ।
यत्राम्बिका वितनुते किल सङ्घरक्षां,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ १३

शैवेयदेवपदपङ्कजसङ्गचङ्गं,
शृङ्गं विलोक्य भविका अवलोकनाख्यम् ।
यस्मिन्निजानि नयनानि कृतार्थयन्ति,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ १४

श्रीजाम्बवत्युदरकन्दरसिंहपोतः,
शाम्बस्तपःशितनखैर्भवकुम्भिकुम्भम् ।
यस्मिन् बभञ्ज किल मौक्तिकलाभहेतोः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ १५

श्रीरुक्मिणीसुतमुनिः शिखरे यदीये,
तेपे तपांसि सुभगं करणानि कायम् (करुणाऽतिकामम्) ।
सम्बन्धबद्धहृदयः किल सिद्धिवध्वां,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ १६

दीप्रप्रदीपकलिका इव यत्र नित्यं,
नानाविधौषधिगणा रजनौ ज्वलन्ति ।
घण्टाक्षराऽऽतपनिवारिशिलैकशाली,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ १७

सत्पल्लवैर्निवसितेव सितप्रसूनै-
र्लिप्तेव सत्फलभरैः समलङ्कृतेव ।
यस्मिन् मनांसि रमयत्यनिशं वनश्रीः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ १८

यस्मिन् सहस्रवनलक्षवनद्रुमौघ-
पुंस्कोकिलप्रियतमा कलनाददम्भात् ।
सुस्वागतानि किल पृच्छति भव्यलोकं,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ १९

स्नानं विलेपनमुदारतरा च पूजा,
दानं तपःप्रभृतिशेषमशेषकृत्यम् ।
जायेत यत्र विहितं शिवसौख्यहेतोः,
श्रीमानसौ विजयतां गिरिरुज्जयन्तः ॥ २०

इत्येवंविध-रैवताचलशिरःशृङ्गारचूडामणि-
र्विश्वाम्भोजविकाशवासरमणिस्त्रैलोक्यचिन्तामणिः ।
सेव्यः सैष तमोवितानविजये चन्द्रोपमैः सूरिभिः
श्रीनेमिर्जगतां विभुर्भवतु मे दुष्टाष्टकर्म्मच्छिदे ॥ (शार्दूल) २१

राजगच्छीयज्ञानचन्द्रसूरिविरचितम्

## २२. ॥ श्रीरैवतगिरितीर्थ-स्तोत्रम् ॥

(वसन्ततिलका)

सौराष्ट्र-राष्ट्र-वसुधा-वनिता-किरीट-
कल्पोज्जयन्तगिरि-मौलि-मणीयमानम् ।
नेमीश्वरं जिनवरं प्रयतः प्रणौमि
सौभाग्य-सौरभ-सुभावित-विश्वविश्वम् ॥ १

स्वामिन् ! स्मर प्रसरथ स्मरकान्धकार
प्रत्यूष-भास्कर-सुरासुर-सेव्यपादः ।
श्रीरैवताचल सदोदितविश्वदीप-
ज्ज्योतिर्मय प्रशमयामयमन्तरं नः ॥ २

दुष्कर्मशर्मभिदुरं गलितं ममाद्य
प्रोद्यन्मनोरथ-तरुः फलितश्च सद्यः ।
मानुष्य-जन्मदुरवाप्यमभूत्कृतार्थं
यल्लाघवी क्षणपथं त्वमुपागतोसि ॥ ३

श्रीनेमि-निष्क्रमण-केवल-मोक्षरूप-
कल्याण[क]त्रयपवित्रित-भूमिभागम् ।
तीर्थाधिराजमभिषिञ्चित यत्तडित्वात्
तत्सर्पिगर्जितमहोर्जिततूर्यरायः ॥ ४

राजीमती बल सनातनसौख्यलक्ष्मी
साङ्गत्यगौरवमहो ! गमिता जितेश ।
विश्वत्रयी प्रभवता भवता तथापि
त्यक्ते त्यजायत मुधैव जनः प्रघोषः ॥ ५

पद्यामीवाद्य दलिती किल सिद्धिसौध-
सोपान-पद्धतिमिवेह सदाधिरोहन् ।
भव्यो जनः स्मरति वाग्भटदेवमन्त्रि
राजन्यनेमिजिनयात्रकधर्मबन्धोः ॥ ६

आनीय काञ्चनबलानकतोऽम्बिकाया-
स्तोषेण रत्नमयबिम्बमनर्घ्यमेतत् ।
रत्नः पुरोहितनिवेशितमुद्दधार
तीर्थं भवाब्धि-पतयालुमनेकजीवम् ॥ ७

चैत्यं चिरन्तनमिदं मदनोद्दधार
श्रीसज्जनः सुकृतसज्जनसज्जधुर्यः ।
सौवर्ण-कुम्भ-मणि-तोरण-रत्नदीप-
यद्रैवताद्रि-कटके पटकायतीव ॥ ८

रत्नानि तान्यपि चतुर्दश यत्पुरस्ता-
न्नूनञ्जरात्तृणमुलापति न स्पृशन्ति ।
विश्वैकरत्न भवता तवकात्मजेन
मन्ये समुद्रविजयेन जितः समुद्रः ॥ ९

माहात्म्यमस्य भणितुं भुवनातिशायि
श्रीरैवतस्य न तु वागधिपः किमीशः ।
नेमीश्वरस्य विजिनान्तरवैरिणोपि
प्रेयानभूत् समवसृत्यनुबन्धतो यः ॥ १०

कल्याणकत्रयजिनालयभूत्रयेपि
नेमिं नमामि चतुराननमञ्जनाभम् ।

देवेन्द्रमण्डप जिननाथ-दिव्य-कुण्डं
दौर्गत्यतापमलहारि गजेन्द्रपादम् ॥ ११

शत्रुञ्जयाभिधगिरीशकृतावतारं
श्रीवस्तुपालसचिवेशविहारसारम् ।
सम्मेतचैत्यभवनेन युगादिदेव-
मष्टापदेन च निविष्टमहं नमामि ॥ १२

राजीमती किल स निर्झरकन्दराया-
मश्रूणि नेमि-विरहादि-वशो चयन्ती ।
अम्बेव यात्रिकजने दुरितापहन्त्री
दिव्याम्बिका जयति कामित-कामधेनुः ॥ १३

वन्देऽवलोकशिखरे तमरिष्टनेमि-
वैषम्यभाक् शिखरशेखरतामितौ तौ ।
प्रद्युम्नशाम्बमुनिकेवलिनौ दिशन्ता-
वुच्चैर्महोदयपदं तु यथा तथेति ॥ १४

श्रीमान् सहस्रसहकारवनेन लक्षा-
रामेण नेमिपदपङ्कज-पावितेन ।
तीर्थात्मकः शुचिरयां क्षितिभृत्समन्तात्
जीयान्निशास्वपि सदोषधिदीपदीप्तः ॥ १५

ज्ञानेन्दुरुग्विदितवैद्यसुरेन्द्रवन्द्य
विश्वाभिनन्द्ययदुनन्दन सम्मदेत[त्] ।
स्तोत्रं पठन्निदमनन्यमनाः सुतीर्थ-
यात्राफलं शुभमतिर्लभते स्थितोऽपि ॥ १६

कुमारसम्भवरीत्या समस्याकाव्यम्

पू.मु.श्री रविसागरगणिविरचितम्

## २३. ॥ श्रीगिरिनारवर्णनम् ॥

(इन्द्रवंशा)

स्वस्ति श्रियः सर्वजिनान् प्रणत्य तान्
स्तोष्ये किलाऽहं वृषभं च नेमिनम् ।
रीत्या समासेन कुमारसम्भव-श्रीमेघदूताख्यरघूरुवंश्यया ॥ १

अस्त्यत्र भूयः शिखरानुषङ्गी शिलोच्चयो रैवतकाभिधानः ।
अनेकसौपर्वसमागमेन गरीयसीं संस्थितिमादधानः ॥ २

सर्वेषु शैलेष्वयमेव तुङ्ग-शृङ्गं समारुह्य यदीयभुवम् ।
समागतैः केलिचिकीर्षयेति वृन्दारकौघैरवधार्यते स्म ॥ ३

एवं न चेत्तन्न किमारुरोह जिनं जिगीषुः कुसुमायुधोऽयम् ।
यथातथं तद्भुवि योऽल्पशक्ति-
र्यत्सोऽधिरोढुं प्रभवेदनुच्चम् ॥ (यु.) ४

काठिन्यमासीद्वचनीयतायै न यस्य भूयः सुखसिद्धिहेतोः ।
यदेकदोषो महिमच्छिदेन लावण्यभर्तुः सरितां विभोर्वा ॥ ५

अशोकवृक्षस्य यमाश्रितस्य छायां सुशीमामनुभूय मर्त्यः ।
अनन्तकालं वपुषां सहायौ निरावकाशाखिलशोकतापौ ॥ ६

यत्र स्थितानां सहकारकाणां स्वादूनि खण्डानि रसालयानि ।
पाणौ समादाय मुदा लिहन्त-स्तृप्यन्ति देवा इव देहभाजः ॥७

यदीयखानि वरिवर्त्तिभूयो-माहात्म्यभृत् कल्पलतेव नृणां ।
समग्रसम्पत्तिविधानहेतो-र्विभ्राजिरत्नप्रकरं दधाना ॥ ८

निष्पन्नमादाय यदीयखानौ स्वर्णादिधातुं कमलानिदानम् ।
जीवन्ति निःस्वा हृदि दीनभावा भूयोर्थितस्त्यागधियो ददन्ते॥९

यदीयखानेः शुचिचीनपिष्ट–मानाय्य दास्या सह मानिनीभिः ।
मूर्ध्नि क्रियन्ते तिलकानि नूनं विराजि नानारचनाविशेषैः ॥१०

सदौषधीर्भावुककर्मकर्त्रीः सम्प्राप्य यस्माद् भुवि बोभवीति ।
सुखी हृषीकाणि पटूनि बिभ्र–
ज्जनो मनोवाञ्छितवस्तुलाभात् ॥ ११

यस्मिन्नुपस्थाय पुरोगविद्या विद्याधरैः साधयितुं कृतेच्छैः ।
प्रभूय ते तत्रभवत् सकाशा–दनाविलाम्नायमवाप्य पुण्यात् ॥१२

आरूढमुच्चैः सुमनःसमूहं क्रीडार्थमालोक्य सहाङ्गनाभिः ।
कदापि मा भूत् स्वपदस्य भङ्गो यस्मिन्... वसन्ति मेघाः ॥१३

बहिर्गताः कन्दफलस्य पुण्य–स्यादित्सया मेघघटाः समीक्ष्य ।
तपस्विनो यस्य दरीः श्रयन्ति विद्युल्लताढ्यां शिखराधिरूढाम्॥१४

वेविद्यमाने मयि कोऽपि मा भूत् कदापि दारिद्र्यगृहीतधिष्ण्यः।
इतीव सद्धातुरधारि येन प्रवर्त्तते सन् हि परोपकृत्यै ॥ १५

कुलाङ्गनावच्छुशुभेतरां ये विशालवंशस्थितिमुज्जिहानः ।
नीतः स्तुतिं किन्नरकिन्नरीभि–र्मध्यप्रतीके शुचिमेखलाभृत् ॥१६

आलिङ्गितानां युवतीजनानां मुक्तास्त्रजां चारु वरिष्ठवक्षः ।
भूषाभृतो निर्मलताऽनुषक्ता यत्राश्रयं प्राप्य झरा बभूवुः ॥१७

अविप्रलम्भे जलदावलीनां शिखण्डिनां सन्नटनावियोगः ।
यस्मिन् वरीवर्त्ति निवर्तिताघे कार्यं यतः कारणसम्भवे स्यात्॥१८

यस्योपकण्ठं मुमुचुर्नितान्तं न नीलकण्ठाः स्वसुहृद्वनस्य ।
अनीहमाना विरहं कदापि यदुत्तमीया नियतैव मैत्री ॥ १९

न सस्मरुर्विन्ध्यगिरिं द्विपेन्द्रा यं प्राप्य तद्भूतबृहत्सुखाप्तेः ।
विस्मारकं स्याच्च चिरन्तनस्य प्रत्यक्षसौख्यं हि निरन्तरायम्॥२०

उपस्थिता निर्जररामरामा-क्रीडां विधातुं प्रतिवल्लभं स्वम् ।
इतस्ततो भ्रान्तिमिवाशु नेतुं केलीच्छया यस्य गुहाः सिषेवे ॥२१

द्राक्षीच्च मा मामपि कः सलज्जा-मितीव कृष्णाम्बुदकेतवेन ।
यदीयकुण्डे जवनीं विधाय समन्ततः स्नाति सुपर्वकान्ता ॥२२

यत्र स्थितानां विलसन् मणीनां स्थितिर्बभूव क्षितिभृत्किरीटे ।
सम्यक् तदाहुर्गरिमाम्बुराशौ यत् संश्रितानां पदमग्र्यमेव ॥२३

मद्वर्गपक्षक्षिप एष यस्मात् कुर्वेऽहमिन्द्रं तदधः प्रसह्य ।
उच्चैस्तरैः शृङ्गगणैः परीत इत्यूर्ध्वमैधिष्टतरां गिरिर्यः ॥ २४

मुमुक्षया संसृतिदुःखपङ्क्तेः कल्याणमाप्तुं व्रतिभिः सिषेवे ।
यः प्राज्यराज्याऽन्वितभूमिभृद्वा सम्पत्तिमूरीचकृवाननल्पाम् ॥२५

शैलाधिराजस्त्वयमेव विश्व इत्युज्जयन्तः प्रथितः स चक्रे ।
श्रीनेमिनाथेन पुरैव नीत्वा राजीमतीं स्त्रीकृपया विमुक्तिम् ॥२६

श्री भारतीविरचितः

## २४. ॥ श्रीगिरनारमहातीर्थकल्पः ॥

(आर्या)

श्रीविमलगिरेस्तीर्थाधिपस्य, परमं वदन्ति तत्त्वज्ञाः ।
शैलमनादियुगीनं, स जयति गिरिनारगिरिराजः ॥ १

षट्विंशतिर्विंशति-षोडशदशद्वियोजन धनुः शतोच्चशिराः ।
अवसर्पिणुषु यः खलु, स जयति गिरिनारगिरिराजः ॥ २

परमोतमं नृलोके सिद्धानन्तं शिवाद्रि परमाणौ ।
यस्मिन्नर्हदनन्तं, स जयति गिरिनारगिरिराजः ॥ ३

दीक्षाकेवलं निवृति कल्याणत्रिकमनन्ततीर्थकृताम् ।
युगपदथैकमभवन्, स जयति गिरिनारगिरिराजः ॥ ४

स्वर्भुर्भुवःस्थचैत्ये यस्याकारं सुरासुरनरेशाः ।
सम्पूजयन्ति सततं, स जयति गिरिनारगिरिराजः ॥ ५

यदतीतचतुर्विंशति नमीश्वराद्या इहाष्ट जिनपतयः ।
कल्याणत्रिकमापुः स जयति गिरिनारगिरिराजः ॥ ६

दीक्षाज्ञानं निवृतिमाप, श्रीनेमिनाथ इह भगवान् ।
ब्रह्माद्वैतनिधिर्यः स जयति गिरिनारगिरिराजः ॥ ७

शाम्बप्रद्युम्नाद्या, राजीमत्याद्यानेकशो भव्याः ।
यत्सेवया शिवमगुः, स जयति गिरिनारगिरिराजः ॥ ८

श्रीऋषभादेशादिह भरतेन कृता भविष्यतो नेमेः ।
अर्चा हेमीरुप्या, स जयति गिरिनारगिरिराजः ॥ ९

अस्थापित शक्रदत्ता चैत्ये भरतेन भाविनेमिविभोः ।
रत्नमयी मूर्तिरियं, स जयति गिरिनारगिरिराजः ॥ १०

विश्वत्रयस्य नद्योऽवतेरुरस्मिन् गजेन्द्रपदकुण्डे ।
श्रीनेमिस्नात्रकृते, स जयति गिरिनारगिरिराजः ॥ ११

सर्वर्तु भद्रशालाप्रमुखवनं पुजयत्यमुं परितः ।
सुरनरपन्नगगीतः स जयति गिरिनारगिरिराजः ॥ १२

यस्यान्तः श्रीकाञ्चनबलानके दिव्यरत्नमयदेहः ।
श्रीनेमिः शक्रदत्तः स जयति गिरिनारगिरिराजः ॥ १३

देवाभियोगतोऽयं नेमिर्गुप्तः कदाचिदर्थदर्याम् ।
मदनेन चैत्यनिहितः स जयति गिरिनारगिरिराजः ॥ १४

वलभीभङ्गे शक्रादिष्टामम्बाछन्नरत्नकान्तिरिह ।
श्रीनेमिदिप्ततनुः स जयति गिरिनारगिरिराजः ॥ १५

सोऽयं श्रीनेमिविभुः द्विसहस्रे वीरतः पुनर्दीप्तः ।
भविताऽत्र हेमचैत्ये, स जयति गिरिनारगिरिराजः ॥ १६

स्वर्गे सुरेन्द्रपूज्यः श्रीनेमिः पञ्चमारपर्यन्ते ।
उत्सर्पिण्यां पुनरिह, स जयति गिरिनारगिरिराजः ॥ १७

श्रीपद्मनाभमुख्या द्वाविंशतिरिह जिनास्तु सेत्स्यन्ति ।
कल्याणत्रिकमुभयोः स जयति गिरिनारगिरिराजः ॥ १८

अन्यस्था अपि भविनो, यद्ध्यानाद् घातिकर्ममलमुक्तः ।
सेत्स्यन्ति भव चतुष्के, स जयति गिरिनारगिरिराजः ॥ १९

नित्यानित्यस्थावरजङ्गमतीर्थाधिकं जगत्त्रितये ।
पर्वसु ससुरेन्द्रार्च्यः स जयति गिरिनारगिरिराजः ॥ २०

रैवतकस्फुटिकाचल चिन्तामणिरमिततेजसा सह्यः ।
श्रीमानरिष्टनेमिः स जयति गिरिनारगिरिराजः ॥ २१

श्रीब्रह्मेन्द्रकृतेऽयं श्रीनेमिमूर्तिरमरगण पूज्याः ।
विंशतिसागरकोटीः स जयति गिरिनारगिरिराजः ॥ २२

श्रीनारदेन लिखितं श्रीमत्काञ्चनबलानकद्वारे ।
श्रीभारती विरचितं श्रीनेमेः संस्तवं तुष्ट्यै ॥ २३

# २५. ॥ श्रीगिरिनारचैत्यपरिपाटीस्तवनम् ॥

(उपजाति)

आनन्दकन्दं प्रणिपत्य भक्त्या श्रीनेमिनाथस्य पदारविन्दम् ।
तीर्थेषु विख्यातमहाप्रभावं स्तवीम्यहं श्रीगिरिनारतीर्थम् ॥ १

यस्मिन् सहस्राम्रवणे नराणां सार्धं सहस्रेण व्रतं प्रपद्य ।
तपांसि भूयांसि चकार नेमिर्वन्दे सदा तं गिरिमुज्जयन्तम् ॥२

कर्माणि चत्वारि निहत्य यत्र श्रीयादवाधीश्वरनेमिनाथः ।
ज्ञानं प्रपेदे किल केवलाख्यं वन्दे सदा तं गिरिमुज्जयन्तम् ॥३

त्यक्त्वा पवित्रामपि भोजपुत्रीं यत्रोपयेमे वरसिद्धिकन्याम् ।
शिवातनूजः शिवतातिरत्र वन्दे सदा तं गिरिमुज्जयन्तम् ॥ ४

जीर्णाख्यकोट्टे यदुपत्यकायां वामेयवीरादिजिनान् भजन्तः ।
लुनन्ति लोका निजपापजालं वन्दे सदा तं गिरिमुज्जयन्तम् ॥५

आरुह्य यं नेमिजिनं नमन्तो भव्या भवाम्भोनिधियानपात्रम् ।
भवन्ति पापेन विमुक्तकाया वन्दे सदा तं गिरिमुज्जयन्तम् ॥६

प्रासादगर्भे शिवताति यत्र निरीक्ष्य नेमीश्वरदेवबिम्बम् ।
कृतार्थमात्मानममंस्त लोको वन्दे सदा तं गिरिमुज्जयन्तम् ॥७

यस्मिन्नपापाख्यमठे प्रभूताश्चिरन्तनीश्च प्रतिमाः प्रणम्य ।
छिन्दन्ति पापानि निजानि लोका
वन्दे सदा तं गिरिमुज्जयन्तम् ॥ ८

श्रीमूलदेवालयदेवकुल्यो जिनेन्द्रबिम्बैः परितः परीताः ।
यत्रार्चकेभ्यो ददते प्रसादं वन्दे सदा तं गिरिमुज्जयन्तम् ॥ ९

सम्मेतकाऽष्टापदतीर्थयुक्तं दृष्ट्वा विहारं वृषभेश्वरस्य ।
स्युर्हर्षभाजो भविकाश्च यत्र वन्दे सदा तं गिरिमुज्जयन्तम् ॥१०

कल्याणकाख्ये भवने विशाले यस्मिन्नवस्थात्रयरूपधारी ।
शिवातनूजो वितनोति भद्रं वन्दे सदा तं गिरिमुज्जयन्तम् ॥११

मनोहरे खारतरे विहारे महोज्ज्वला वीरजिनस्य मूर्तिः ।
अभ्यर्चिता यत्र हिनस्ति दौस्थ्यं
वन्दे सदा तं गिरिमुज्जयन्तम् ॥ १२

जीरादिपल्लीप्रभुपार्श्वनाथं चैत्ये नवीने विमलादिदेवान् ।
दृष्ट्वा जनो यत्र भवेत् पवित्रो
वन्दे सदा तं गिरिमुज्जयन्तम् ॥ १३

गजाधिरूढा मरुदेवमूर्ती राजीमतीश्रीरथनेमिमूर्ती ।
यत्राऽर्चकेभ्यो ददते प्रमोदं वन्दे सदा तं गिरिमुज्जयन्तम् ॥१४

यत्राऽम्बिका शासनदेवता तु कपर्दियक्षेण समं समन्तात् ।
सङ्घस्य रक्षां कुरुते नितान्तं वन्दे सदा तं गिरिमुज्जयन्तम् ॥१५

गजेन्द्रकुण्डेन्दुगुहा प्रधानावलोकना शाम्बमुखानि यत्र ।
स्थानानि पश्यन्ति जनाः सहर्षं
वन्दे सदा तं गिरिमुज्जयन्तम् ॥ १६

चक्रे नवो नेमिजिनस्तवोऽयं यात्रागतैर्यत्र विशालतीर्थे ।
श्रीकीर्तिरत्नाभिधसूरिराजैर्वन्दे सदा तं गिरिमुज्जयन्तम् ॥१७

इत्थं गरिष्ठगिरिनारगिरीन्द्रतीर्थं
स्मृत्वा हृदि स्फुटमदः स्तवनं पठेद् यः ।
यात्राफलं स लभते गृहसंस्थितोऽपि,
प्राप्नोति सिद्धिमचिरादपि सौख्यसाराम् ॥(वसन्ततिलका)१८

## २६. ॥ श्रीगिरनारतीर्थस्तोत्रम् ॥

(शार्दूलविक्रीडित)

आकण्ठामृतपूर्णचारुकलशैश्चामीकरैर्निर्मितै-
र्यस्य क्लृप्तमहाभिषेचनविधिः श्रीमत्सुरेशव्रजैः ।
विख्यातो ननु यस्य कीर्तिनिवहो जम्ब्वन्तरीपे सदा,
यस्याङ्घ्रिद्वितयं नमन्ति विबुधा भक्त्या मुदा सादराः ॥ १

नेत्रानन्दनदायकस्सुनितरां यस्तीर्थचूडामणिः,
मिथ्याज्ञानविनाशने दिनकरः श्रेयोद्रुमाणाञ्चयः ।
सूर्येन्दू तु सदैव पूजनपरौ पार्श्वद्वये राजतो,
रिष्टिः कर्मविपक्षवृन्दहनने विज्ञानकोशालयः ॥ २

विस्तीर्णा पदपङ्क्तयः शिवगृहे मुक्तालताकल्पिता,
जन्तूनामधिरोहणे विरचिता मन्ये सुरेशैर्नगे ।
यन्नाम्नस्स्मरणात्प्रयान्ति विदशा द्वेषादयश्शत्रवः,
ते धन्या नितरां भजन्ति मनसा श्रीरैवताद्यान् सदा ॥ ३

वागीशोऽपि यदा स्वशक्तिनिवहैर्वक्तुं समर्थो भवेत्,
चर्चा तस्य शचीपतिर्गणयितुं साहस्रजिह्वो भवेत् ।
स्पष्टा चारुप्रलेखने पशुपती रात्रिन्दिवासौ मुदा,
तीर्थानां गुणसञ्चयस्य विततं पारं न संयास्यति ॥ ४

रम्यं धाम मनोहरं न जगति श्रीरैवताद्रिं विना,
चन्द्रार्कादिनवग्रहैस्सनिवहैः पूजा कृता निर्मला ।
कत्स्वं(स्त्वां?)नन्दनगं शचीशरमणो विज्ञाय भव्याश्रयं,
निर्माल्यैकनिकेतनं च परमं चक्रे दरीदृश्यते ॥ ५

विध्वस्तामतिमुक्तिरुपरमणं देवेन्द्रमौल्यालय-
सौम्यानन्दकिरीटरक्तचरणाकल्पान्तलोकाश्रय ।
त्रैलोक्यामितलोकदेवशरणालोकाब्धिसंतारक-
मूर्ति तद्गुणरूपिणं सुनयतो वन्दे मुदा शङ्करम् ॥ ६

(षड्भिः कुलकम्)

तीर्थैश्वर्यगुणाकरं गुणनिधिं कल्याणरत्नाकरं,
ध्यायन्तीन्द्रगणास्सदा सुमनसा त्रैलोक्यकल्याणिनः ।
सर्वे विघ्नगणा व्रजन्ति रभसा यत्तीर्थमाहात्म्यत-
स्तं वन्दे गिरनारशैलमनिशं भास्वद्गुणालङ्कृतम् ॥ ७

योऽघं दारयतीव यं च सततं देवास्स्तुवन्तीश्वरं,
येन ज्वालित आत्मभूस्सुनितरां यस्मै नमन्ति प्रगे ।
यस्मात्प्राज्ञगणास्सुखं विदधते यस्योज्वलाः कीर्तयो,
यस्मिन् सर्वगुणा गतास्त्रिजगतां तं नौमी नेमीश्वरम् ॥ ८

रम्या रैवतमङ्गलस्तुतिरियं श्रीसौख्यसम्पत्करी,
संराध्या सुमहोत्सवेऽपि सततं धर्मार्थकामान्वितैः ।
ये शृण्वन्ति भजन्ति तैश्च मनुजैः श्रेयोवरं प्राप्यते,
तस्माद् भव्यगणास्स्मरन्तु नितरां कल्याणलीलाश्रिये ॥ ९

पू.आ.श्री जिनप्रभसूरिविरचितः

## २७. ॥ श्रीवैभारगिरिकल्पः ॥

(अनुष्टुप्)

अथ वैभारकल्पोऽयं स्तवरूपेण तन्यते ।
सङ्क्षिप्तरुचितोषाय श्रीजिनप्रभसूरिभिः ॥ १

बभार वैभारगिरेर्गुणप्राग्भारवर्णने ।
निर्भरं भारता बुद्धिं भारती तत्र के वयम् ॥ २

तीर्थभक्त्या तरलितास्तथापि व्यापिभिर्गुणैः ।
राजन्तं तीर्थराजं तं स्तुमः किञ्चिज्जडा अपि ॥ ३

अत्र दारिद्र्यविद्राविरूपिका रसकूपिका ।
तप्त-शीताम्बुकुण्डानि कुर्युः कस्य न कौतुकम् ॥ ४

त्रिकूट-खण्डिकादीनि शृङ्गाण्यस्य चकासति ।
निःशेषकरणग्रामस्यावनानि वनानि च ॥ ५

ओषध्यो विविधव्याधिविध्वंसादिगुणोर्जिताः ।
नद्यो हृद्योदकाश्चात्र सरस्वत्यादयोऽनघाः ॥ ६

बहुधा लौकिकं तीर्थं मगधा-लोचनादिकम् ।
यत्र चैत्येषु बिम्बानि ध्वस्तडिम्बानि चार्हताम् ॥ ७

मेरूद्यानचतुष्कस्य पुष्पसङ्ख्यां विदन्ति ये ।
अमुष्मिन् सर्वतीर्थानां विदाङ्कुर्वन्तु ते मितम् ॥ ८

श्रीशालिभद्र-धन्यर्षी इह तप्तशिलोपरि ।
दृष्टौ कृततनूत्सर्गौ पुंसां पापमपोहतः ॥ ९

श्वापदाः सिंह–शार्दूल–भाल्लूक–गवलादयः ।
न जातु तीर्थमाहात्म्यादिह कुर्वन्त्युपप्लवम् ॥ १०

प्रतिदेशं विलोक्यन्ते विहाराश्चात्र सौगताः ।
आरुह्यैनं न निर्वाणं प्रापुस्ते ते महर्षयः ॥ ११

रौहिणेयादिवीराणां प्राग् निवासतया श्रुताः ।
निचाय्यन्ते तमस्काण्ड दुर्विगाहा गुहा इह ॥ १२

उपत्यकायामस्याद्रेर्भाति राजगृहं पुरम् ।
क्षितिप्रतिष्ठादिनामान्यन्वभूद्यत्तदा तदा ॥ १३

क्षितिप्रतिष्ठ–चणकपुर–र्षभपुराभिधम् ।
कुशाग्रपुरसञ्ज्ञं च क्रमाद्राजगृहाह्वयम् ॥ १४

अत्र चासीद् गुणसि(शि)लं चैत्यं शैत्यकरं दृशाम् ।
श्रीवीरो यत्र समवससार गणशः प्रभुः ॥ १५

प्राकारं यत्र मेतार्यः शातकौम्भमचीकरत् ।
सुरेण प्राच्यसुहृदा मणींश्चाजीहदच्छगम् ॥ १६

शालिभद्रादयोऽनेके महेभ्या यत्र जज्ञिरे ।
जगच्चमत्कारकरी येषां श्रीर्भोगशालिनी ॥ १७

सहस्राः किल षड्त्रिंशद्यत्रासन् वणिजां गृहाः ।
तत्र चार्धाः सौगतानां मध्ये चार्हतसञ्ज्ञिनाम् ॥ १८

यस्य प्रासादपङ्क्तीनां श्रियः प्रेक्ष्यातिशायिनीः ।
त्यक्तमाना विमानाख्यामापुर्मन्ये सुरालयाः ॥ १९

जगन्मित्रं यत्र मित्रः सुमित्रान्वयपङ्कजे ।
अश्वावबोधनिर्व्यूढव्रतोऽभूत् सुव्रतो जिनः ॥ २०

यत्र श्रीमान् जरासन्धः श्रेणिकः कूणिकोऽभयः ।
मेघ-हल्ल-विहल्लाः श्रीनन्दिषेणोऽपि चाभवन् ॥ २१

जम्बूस्वामि कृतपुण्य-शय्यम्भवपुरस्सराः ।
जज्ञुर्यतीश्वरा यत्र नन्दाद्याश्च पतिव्रताः ॥ २२

यत्र श्रीमन्महावीरस्यैकादश गणाधिपाः ।
पादपोपगमान् मासं सिद्धावासं समासदन् ॥ २३

एकादशो गणधरः श्रीवीरस्य गणेशितुः ।
प्रभासो नाम पावित्र्यं यस्य चक्रे स्वजन्मना ॥ २४

नालन्दालङ्कृते यत्र वर्षारात्रांश्चतुर्दश ।
अवतस्थे प्रभुर्वीरस्तत्कथं नास्तु पावनम् ॥ २५

यस्यां नैकानि तीर्थानि नालन्दा नायनश्रियाम् ।
भव्यानां जनितानन्दा नालन्दा नः पुनातु सा ॥ २६

मेघनादः स्फुरन्नादः शात्रवाणां रणाङ्गणे ।
क्षेत्रपालाग्रणीः कामान् कांस्कान् पुंसां पिपर्ति न ॥ २७

श्रीगौतमस्यायतनं कल्याणस्तूपसन्निधौ ।
दृष्टमात्रमपि प्रीतिं पुष्णाति प्रणतात्मनाम् ॥ २८

वर्षे सिद्धा सरस्वद्रसशिखिकुमिते (१३६४) वैक्रमे तीर्थमौलेः
सेवाहेवाकिनां श्रीवितर सुरतरो ! देवतासेवितस्य ।
वैभारक्षोणिभर्त्तुर्गुणगणभणनव्यापृता भक्तियुक्तैः
सूक्तिर्जैनप्रभीयं मृदुविशदपदाऽधीयतां धीरधीभिः ॥ २९

पू.आ.श्री जिनप्रभसूरिविरचितः

## २८. ॥ श्रीअर्बुदाद्रिकल्पः ॥

(अनुष्टुप्)

अर्हन्तौ प्रणिपत्याहं श्रीमन्नाभेय-नेमिनौ ।
महाद्रेरर्बुदाख्यस्य कल्पं जल्पामि लेशतः ॥ १

देव्याः श्रीमातुरुत्पत्तिमादौ वक्ष्ये यथाश्रुतम् ।
तदधिष्ठानतो ह्येष प्रख्यातो भुवि पर्वतः ॥ २

श्रीरत्नमालनगरे राजाभूद् रत्नशेखरः ।
सोऽनपत्यतया दूनः प्रैषीच्छाकुनिकान् बहिः ॥ ३

शिर[:]स्थां काष्ठभारिण्यास्ते दुर्गां दुर्गतस्त्रियाः ।
वीक्ष्य व्यजिज्ञपन् राज्ञे भाव्यस्यास्त्वत्पदे सुतः ॥ ४

राज्ञादिष्टा सगर्भैव सा हन्तुं तन्नरैर्निशि ।
गर्त्ते क्षिप्ता कायचिन्ताव्याजात्तस्माद्बहिर्निरैत् ॥ ५

साऽसूत सूनुं भयार्त्ता द्राक् च झाटान्तरेऽमुचत् ।
गर्तं चानीय तद्वृत्तानभिज्ञैस्तैरघाति सा ॥ ६

पुण्येरितार्भं स्तन्यं चापीपत्सन्ध्याद्वये मृगी ।
प्रवृद्धेऽस्मिष्टङ्कशाला महालक्ष्म्याः पुरोऽन्यदा ॥ ७

मृग्याश्चतुर्ण्णां पादानामधो नूतननाणकम् ।
जातं श्रुत्वा शिशुरूपं लोके वार्त्ता व्यजृम्भत ॥ ८

नव्यो नृपोऽभूत्कोऽपीति श्रुत्वा प्रैषीद् भटान्नृपः ।
तद्वधायाथ तं दृष्ट्वा सायं ते पुरगोपुरे ॥ ९

बालहत्याभियाऽमुञ्चन् गोयूथस्यायतः पथि ।
तत्तथैव स्थितं भाग्यादेकस्तूक्षा पुरोऽभवत् ॥ १०

तत्प्रेर्य स चतुष्पादान्तराले तं शिशुं न्यधात् ।
तच्छ्रुत्वा मन्त्रिबोधात्तं राजाऽमंस्तौरसं मुदा ॥ ११

श्रीपुञ्जाख्यः क्रमात्सोऽभूद् भूपस्तस्याऽभवत् सुता ।
श्रीमाता रूपसंपन्ना केवलं प्लवगानना ॥ १२

तद्वैराग्यान्निर्विषया जातु जातिस्मरा पितुः ।
न्यवेदयत् प्राग्भवं स्वं यदाऽऽसं वानरी पुरा ॥ १३

सञ्चरन्त्यर्बुदं शाखिशाखां तालुनि केनचित् ।
विद्धा मृष्यथ रुण्डं मे कुण्डेऽपतत्तरोरधः ॥ १४

तस्य कामिततीर्थस्य माहात्म्यान्नृतनुर्मम ।
मस्तकं तु तथैवास्तेऽद्याप्यतः कपिमुख्यहम् ॥ १५

श्रीपुञ्जोऽक्षेपयच्छीर्षं कुण्डे प्रेष्य निजान्नरान् ।
ततः सा नृमुखी जज्ञेऽतपस्यच्चार्बुदे गिरौ ॥ १६

व्योमगाम्यन्यदा योगी दृष्ट्वा तां रूपमोहितः ।
खादुत्तीर्यालपत् प्रेम्णा–मां कथं वृणुषे शुभे ! ॥ १७

सोचेऽत्यगादाद्ययामो रात्रेस्तावदतः परम् ।
ताम्रचूडरुतादर्वाक् कयाचिद्विद्यया यदि ॥ १८

शैलेऽत्र कुरुषे हृद्याः पद्या द्वादश तर्हि मे ।
वरः स्या इति, चेटैः स्वैर्द्वियाम्याचीकरत्स ताः ॥ १९

स्वशक्त्या कुक्कुटरवे कृतके कारिते तया ।
निषिद्धोऽपि विवाहाय नास्थात्तत्कैतवं विदन् ॥ २०

सरित्तीरेऽथ तं स्वस्रा क्लृप्तवीवाहसम्भृतिम् ।
सोचे त्रिशूलमुत्सृज्य विवोढुं संनिधेहि मे ॥ २१

तथा कृत्वोपागतस्य पदयोर्विकृतान् शुनः ।
नियोज्य साऽस्य शूलेन हृद्यस्तेन वधं व्यधात् ॥ २२

इत्याजन्माखण्डशीला जन्म नीत्वा स्वराप सा ।
श्रीपुञ्जोऽशिखरं तत्र तत्प्रासादमचीकरत् ॥ २३

षण्मासान्तेऽर्बुदाख्योऽस्याधोभागेऽद्रेश्चलत्यहिः ।
ततोऽद्रिकम्पस्तत्सर्वे प्रासादाः शिखरं विना ॥ २४

लौकिकास्त्वाहुः-

नन्दिवर्द्धन इत्यासीत् प्राक् शैलोऽयं हिमाद्रिजः ।
कालेनार्बुदनागाधिष्ठानात्त्वर्बुद इत्यभूत् ॥ २५

वसन्ति द्वादश ग्रामा अस्योपरि धनोद्धुराः ।
तपस्विनो गोग्गलिका राष्ट्रिकाश्च सहस्रशः ॥ २६

न स वृक्षो न सा वल्ली न तत् पुष्पं न तत् फलम् ।
न स कन्दो न सा खानिर्या नैवात्र निरीक्ष्यते ॥ २७

प्रदीपवन्महौषध्यो जाज्वलन्त्यत्र रात्रिषु ।
सुरभीणि रसाढ्यानि वनानि द्विविधान्यपि ॥ २८

स्वच्छन्दोच्छलदच्छोर्म्मिस्तीरद्रुकुसुमाञ्चिता ।
पिपासुक्लृप्तानन्दाऽत्र भाति मन्दाकिनी धुनी ॥ २९

चकासत्यस्य शिखराण्युत्तुङ्गानि सहस्रशः ।
परिस्खलन्ति सूर्यस्य येषु रथ्या अपि क्षणम् ॥ ३०

चण्डाली–वज्रतैलेभकन्दाद्याः कन्दजातयः ।
दृश्यन्तेऽत्र प्रतिपदं तत्तत्कार्यप्रसाधिकाः ॥ ३१

प्रदेशाः पेशलाः कुण्डैस्तत्तदाश्चर्यकारिभिः ।
अस्य धातुखनीभिश्च निर्झरैश्चामृतोदकैः ॥ ३२

कोकूयिते कृतेऽत्रोच्चैर्द्राक् कोकूयितकुण्डतः ।
प्रादुर्भवति वाः पूरः कुर्वन् खलहलारवम् ॥ ३३

श्रीमाता–ऽचलेश्वरश्च वशिष्ठाश्रम एव च ।
अत्रामी लौकिकास्तीर्था मन्दाकिन्यादयोऽपि च ॥ ३४

महाद्रेरस्य नेतारः परमारनरेश्वराः ।
पुरी चन्द्रावती तेषां राजधानी निधिः श्रियाम् ॥ ३५

कलयन् विमलां बुद्धिं विमलो दण्डनायकः ।
चैत्यमत्रर्षभस्याधात् पैत्तलप्रतिमान्वितम् ॥ ३६

आराध्याम्बां भगवतीं पुत्रसम्पदपस्पृहः ।
तीर्थस्थापनमभ्यर्थ्य चम्पकद्रुमसन्निधौ ॥ ३७

पुष्पस्रग्दामरुचिरं दृष्ट्वा गोमयगोमुखम् ।
तत्राग्रहीद् भुवं दण्डेट् श्रीमातुर्भवनान्तिके ॥ (यु.) ३८

राजानकश्रीधान्धूके क्रुद्धं श्रीगूर्जरेश्वरम् ।
प्रसाद्य भक्त्या तं चित्रकूटादानाय्य तद्गिरा ॥ ३९

वैक्रमे वसुवस्वाशा (१०८८) मितेऽब्दे भूरिरैव्ययात् ।
सत्प्रासादं स विमलवसत्याह्वं व्यधापयत् ॥ ४०

यात्रोपनम्रसङ्घस्यानिघ्नविघ्नविघातनम् ।
कुरुतेऽत्राम्बिका देवी पूजिता बहुभिर्विधैः ॥ ४१

युगादिदेवचैत्यस्य पुरस्तादत्र चाश्मनः ।
एकरात्रेण घटितः शिल्पिना तुरगोत्तमः ॥ ४२

वैक्रमे वसुवस्वर्क्क (१२८८) मितेऽब्दे नेमिमन्दिरम् ।
निर्ममे लूणिगवसत्याह्वयं सचिवेन्दुना ॥ ४३

कषोपलमयं बिम्बं श्रीतेजःपालमन्त्रिराट् ।
तत्र न्यास्थत् स्तम्भतीर्थे निष्पन्नं दृक्सुधाञ्जनम् ॥ ४४

मूर्त्तीः स्वपूर्ववंश्यानां हस्तिशालां च तत्र सः ।
न्यवीविशद्विशांपत्युः श्रीसोमस्य निदेशतः ॥ ४५

अहो ! शोभनदेवस्य सूत्रधारशिरोमणेः ।
तच्चैत्यरचनाशिल्पान्नाम लेभे यथार्थताम् ॥ ४६

वज्रात्त्रातः समुद्रेण मैनाकोऽस्यानुजो गिरेः ।
समुद्रौ त्रातौ त्वनेन दण्डे[ण्डा]न्मन्त्रीश्वरौ भवात् ॥ ४७

तीर्थद्वयेऽपि भग्नेऽस्मिन् दैवान्म्लेच्छैः प्रचक्रतुः ।
अस्योद्धारं द्वौ शकाब्दे वह्निवेदार्क्कसंमिते (१२४३) ॥ ४८

तत्राद्यतीर्थस्योद्धर्त्ता लल्लो महणसिंहभूः ।
पीथडस्त्वितरस्याभूद् व्यवहृच्चण्डसिंहजः ॥ ४९

कुमारपालभूपालश्चौलुक्यकुलचन्द्रमाः ।
श्रीवीरचैत्यमस्योच्चैः शिखरे निरमीमपत् ॥ ५०

तत्तत्कौतूहलाकीर्ण्णं तत्तदौषधिबन्धुरम् ।
धन्याः पश्यन्त्यर्बुदाद्रिं नैकतीर्थपवित्रितम् ॥ ५१

दृब्धः श्रोत्रसुधाकल्पः श्रीजिनप्रभसूरिभिः ।
श्रीमदर्बुदकल्पोऽयं चतुरैः परिचीयताम् ॥ ५२

पू.आ.श्री मुनिसुन्दरसूरिविरचितः

# २९. ॥ श्रीअर्बुदाचलकल्पः ॥

(वसन्ततिलका)

भक्तिप्रणम्रसुरराजसमाजमौलि-
र्मन्दारदाममकरन्दकृताभिषेकः ।
पादारविन्दमभिवन्द्य द्रुमादिभर्तुः
श्रीमन्तमर्बुदगिरिं प्रयतः स्तवीमि ॥ १

यः स्वीकृताचलपचितमहेश्वरेण
कामान्तकेन गणनाथनिषेवितेन ।
शोभां बिभर्त्ति परमां वृषभध्वजेन
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ २

यः सन्ततं परिगतो बहुवाहीनीभि
र्नानाक्षमाधरनिषेवितपादमूलः ।
राजत्वमद्रिषु बिभर्त्ति गिरीन्द्रसूनुः
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ ३

आदिप्रभुप्रभृतयो यदपत्यकायां
कासहृदादिषु पुरेषु जिनाधिनाथाः ।
प्रीणति दृष्टिममृताञ्जनवज्जनस्य
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ ४

श्रीमातरं नृपतिपुञ्जसुतां विवोढुं
पद्याद्द्वियुग् दश निशि प्रहरद्वयेन ।
योगा व्यधत्त निजमन्त्रबलेन यत्र
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ ५

मन्ये तदस्ति भुवने न खनी न वृक्षो
नो वल्लरी न कुसुमं न फलं न कन्दः ।
यद्दृश्यतेऽद्भुतपदार्थनिधौ न यत्र
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ ६

यत्तुङ्गशृङ्गमवलम्ब्य रविरथस्य
रथ्या नभस्यऽनवलम्बविहारखिन्नाः ।
मध्यंदिने किमपि विश्रममाप्नुवन्ति
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ ७

रम्यं यदीयशिखरं सुखमावसन्ति
ग्रामाद्विषाद्विषदधृस्परमाभिरामाः ।
नैके च गौग्गलिकराष्ट्रिकतापसाद्याः
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ ८

सौधेषु तुङ्गशिखराङ्गणसङ्गतेषु
यत्रान्तरप्रसृमरैरुडुदीप्रदीपैः ।
दीपोत्सवः स्फुरति नित्यमधित्यकायां
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ ९

नागेन्द्रचन्द्रप्रमुखैः प्रथितप्रतिष्ठः
श्रीनाभिसम्भवजिनाधिपतिर्यदीयम् ।
सौवर्णमौलिखिलमौलिमलङ्करोति,
श्रीमानसौ विजयतेऽर्बृदशैलराजः ॥ १०

प्राग्वाटवंशमुकुटं विमलाह्वमन्त्री
नाभेयचैत्यमरुपैत्तलमूलिबिम्बम् ।

आधत्त यत्र वसुदिग्गजदिगू १०८८ मितेऽब्दे
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ ११

अम्बां प्रसाद्य विमलः किल गोमुखस्य
संवीक्ष्य मूर्त्तिमुपचम्पकमात्तभूमिः ।
तीर्थं न्यवीविशत यत्र नगेऽपतृष्णः
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ १२

अग्रे युगादिजिनसद्मनि शिल्पिनैक-
रात्रेण यत्र घटितोऽश्ममयस्तुरङ्गः ।
रङ्गं तरङ्गयति सन्ततमन्तरङ्गं
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ १३

स्नात्रोत्सवं प्रथमतीर्थकरस्य जन्म-
कल्याणके बहुदिगागतभव्यलोकाः ।
तन्वन्ति यत्र दिविजा इव मेरुशैले
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ १४

श्रीनेमिमन्दिरमिदं वसुदन्तिभानु
वर्षे कषोपलमयप्रतिमाभिरामः ।
श्रीवस्तुपालसचिवस्तनुते स्म यत्र
श्रीमानसौ विजयतेऽर्बृदशैलराजः ॥ १५

चैत्येऽत्र लूणिगवसत्यभिधानके त्रि-
पञ्चाशता समधिकद्रविणस्य लक्षैः ।
कोटीर्विवेच सचिवस्त्रिगुणाश्चतस्रः
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ १६

यत्रोत्तरेण यदुपुङ्गवचैत्यमम्बा
प्रद्युम्नशाम्बरघा नेम्यवतारतीर्थान् ।
पश्यन्जनः स्मरति रैवतपर्वतस्य
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ १७

यस्याऽनुचैत्यमवलोक्य जिनौकसां द्वि-
पञ्चाशतं गुरुतरप्रतिमान्वितानाम् ।
नन्दीश्वरादऽतिशयं प्रवदन्ति सन्तः
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ १८

चैत्यानि यत्र भगवच्चरितैर्विचित्रैः
सङ्गीतकैर्नरसुरासुरमूर्त्तिभिश्च ।
सन्सूत्रधारघटितै र्रमयन्ति चेतः
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ १९

मैनाकमेतदनुजं कुलिशात्समुद्रः
संरक्षति स्म खलु येन पुनः समुद्रः ।
त्रातौ भवात्स विमलः स च वस्तुपालः
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ २०

नागाश्च विश्वमये जिनचैत्यमाद्यं
यत्रोद्धृतं महणसिंहजलल्लनाम्ना ।
श्रीचंडसिंहसुतपीथडकेन चान्यत्
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ २१

मोमश्चकार विशदारमयाऽत्फदार
नाभेयबिम्बरुचिरं जिनमन्दिरं प्राक् ।

सङ्घेन सम्प्रति तदुद्ध्रियते स्म यत्र
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ २२

श्रीमच्चुलुक्यकुलचन्द्रकुमारपाल-
निर्मापितं सुकृतिनां कृतनेत्रशैत्यम् ।
श्रीवीरचैत्यमवतंसति यस्य शीर्षं
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ २३

यत्रौरियासकपुरे प्रभुराचिरेयः
श्रीसङ्घनिर्मितनवीनविहारसंस्थः ।
सम्यग्दृशां प्रमदसम्पदमादधाति
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ २४

यत्रार्बुदाख्यभुजगस्तलसंस्थितः
षण्मासात्यये चलति तेन गिरेः प्रकम्पः ।
दैत्येषु तेन शिखराणि न कारितानि
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ २५

यत्राम्बिका प्रणतवाञ्छितकल्पवल्ली
क्षेत्राधिपश्च शमयत्फणसर्पवर्गम् ।
सङ्घस्य तीर्थनमनार्थमुपागतस्य
श्रीमानसौ विजयतेऽर्बुदशैलराजः ॥ २६

एवं श्रीवरसोमसुन्दरगुणं यः श्रीयुगादिप्रभुं
ध्यायन् जल्पति कल्पमर्बुदगिरेर्नैपुण्यराजन्मतिः ।
हर्षोत्कर्षवशप्ररूढपुलकः स्थानस्थितोऽपश्नुते
धन्योऽसौ परमार्थतः प्रतिकलं तत्तीर्थयात्राफलम् ॥ २७

पू.आ.श्री रत्नशेखरसूरिविरचितम्

## ३०. ॥ श्रीतीर्थद्वये जिनत्रयस्य स्तवनम् ॥

श्रीअर्बुदाद्रिमुकुट-श्रीजीरापल्लितीर्थसुप्रथितिम् ।
स्तौमि श्रीमत्पार्श्वं, जिनर्षभं श्रीशिवाङ्गभुवम् ॥ १

तव सद्वर्ण्यसुवर्ण-श्रीघनरोचिष्णुरोचिरङ्गलता ।
कल्पलतातोऽप्यधिकं, दत्ते दृष्टाऽप्यभीष्टानि ॥ २

जय नाभिभूत ! निःसम-सुसंविदां श्रीसमुद्रविजयभव ! ।
वामाङ्गज ! जयहेतो !, भवाऽब्धिसेतो ! दुरितकेतो ! ॥ ३

बिभ्रद् वृषभासनतां, निर्मलजलजाङ्कितांह्रिकमलश्च ।
भोगीन्द्रसेव्यमानः, प्रभो ! जय त्वं निरुपमानः ॥ ४

श्रीअर्बुदाद्रिविदित-श्रीजीरापल्लितीर्थपार्श्वजिन वृषभ ! ।
श्रेयः समुद्रनेमे !, देयाः श्रीसोमसुन्दर ! स्वपदम् ॥ (गीतिः)५

पू.आ.श्री जिनप्रभसूरिविरचितम्

## ३१. ॥ श्रीहस्तिनापुरतीर्थस्तवनम् ॥

(अनुष्टुप्)

अभिवन्द्य जगद्वन्द्यान् श्रीमतः शान्ति-कुन्थ्वरान् ।
स्तुत्यं वास्तोष्पतिस्तोमैः स्तौमि तीर्थं गजाह्वयम् ॥ १

शतपुत्र्यामभून् नाभिसूनोः सूनुः कुरुर्नृपः ।
कुरुक्षेत्रमिति ख्यातं राष्ट्रमेतत्तदाख्यया ॥ २

कुरोः पुत्रोऽभवद् हस्ती तदुपज्ञमिदं पुरम् ।
हस्तिनापुरमित्याहुरनेकाश्चर्यसेवधिम् ॥ ३

श्रीयुगादिप्रभोराद्या चोक्षैरिक्षुरसैरिह ।
श्रेयांसस्य गृहे पञ्चदिव्याढ्याऽजनि पारणा ॥ ४

जिनास्त्रयोऽत्राजायन्त शान्ति-कुन्थुररस्तथा ।
अत्रैव सार्वभौमर्द्धिं बुभुजुस्ते महीभुजः ॥ ५

मल्लिश्च समवासार्षीत्तेन चैत्यचतुष्टयी ।
अत्र निर्मापिता श्राद्धैर्वीक्ष्यते महिमाद्भुता ॥ ६

भासतेऽत्र जगन्नेत्रपवित्रीकारकारणम् ।
भवनं चाऽम्बिकादेव्या यात्रिकोपप्लवच्छिदः ॥ ७

जाह्नवी क्षालयत्येतच्चैत्यभित्तीः स्ववीचिभिः ।
कल्लोलोच्छालितैर्भूयो भक्त्या स्नात्रचिकीरिव ॥ ८

सनत्कुमारः सुभूमो महापद्मश्च चक्रिणः ।
अत्रासन् पाण्डवाः पञ्च मुक्तिश्रीजीवितेश्वराः ॥ ९

गङ्गदत्तः कार्तिकश्च श्रेष्ठिनौ सुव्रतप्रभोः ।
शिष्यावभूतां विष्णुश्च नमुचेरत्र शासिता ॥ १०

कलिदर्पद्रुहं स्फीतसङ्गीतां सद्वसुव्ययाम् ।
यात्रामासूत्रयन्त्यत्र भव्या निर्व्याजभक्त्यः ॥ ११

शान्तेः कुन्थोऽरव(रस्य) चतुष्कल्याणी चात्र पत्तने ।
जज्ञे जगज्जनानन्दा सम्मेताद्रौ च निर्वृतिः ॥ १२

भाद्रस्य सप्तमी श्यामा नभसो नवमी शितिः ।
द्वितीया फाल्गुनस्यान्त्या तिथ्योऽमूर्वो दिवश्च्युतेः ॥ १३

ज्येष्ठे त्रयोदशी कृष्णा माधवे च चतुर्दशी ।
मार्गे च दशमी शुक्ला तिथयो जनुषस्तु वः ॥ १४

शुक्रे चतुर्दशी श्यामा राधे बहुलपञ्चमी ।
महस्येकादशी शुभ्रा जज्ञुर्दीक्षादिनानि च ॥ १५

पौषस्य नवमी श्येनी तृतीया धवला मधोः ।
ऊर्जस्य द्वादशी श्वेता ज्ञानोत्पत्तेरहानि वः ॥ १६

शुक्रे त्रयोदशी कृष्णा वैशाखे पक्षतिः शितिः ।
मार्गे वलक्षा दशमी मुक्तेर्वस्तिथयः क्रमात् ॥ १७

भवादृशानां पुरुषरत्नानां जन्मभूरियम् ।
स्पृष्टाप्यनिष्टं शिष्टानां पिनष्टि किमुत स्तुता ॥ १८

तादृग्विधैरतिशयैः पुरुषप्रणीतै-
र्विभ्राजितं जिनपतित्रितयी महैश्च ।
भागीरथीसलिलसङ्गपवित्रमेत-
ज्जीयाच्चिरं गजपुरं भुवि तीर्थरत्नम् ॥ (वसन्ततिलका) १९

इत्थं पृषत्कविषयार्कमिते शकाब्दे
वैशाखमासशितिपक्षगषष्ठतिथ्याम् ।
यात्रोत्सवोपनतसङ्घयुतो यतीन्द्रः
स्तोत्रं व्यधाद् गजपुरस्य जिनप्रभाख्यः ॥(वसन्ततिलका) २०

पू.आ.श्री जिनप्रभसूरिविरचितः

## ३२. ॥ श्रीप्रतिष्ठानपत्तनकल्पः ॥

जीयाज्जैत्रं पत्तनं पूतमेतद् गोदावर्याः श्रीप्रतिष्ठानसञ्ज्ञम् ।
रत्नापीडं श्रीमहाराष्ट्रलक्ष्म्या
रम्यं हर्म्यैर्नेत्रशैत्यैश्च चैत्यैः ॥ (शालिनी) १

अष्टाषष्टिर्लौकिका अत्र तीर्था द्वापञ्चाशज्जज्ञिरे चात्र वीराः ।
पृथ्वीशानां न प्रवेशोऽत्र वीर-
क्षेत्रत्वेन प्रौढतेजोरवीणाम् ॥ (शालिनी) २

निश्यतीत्य पुटभेदनतोऽस्मात् षष्टियोजनमितं किल वर्त्म ।
बोधनाय भृगुकच्छमगच्छ-
द्वाजिनो जिनपतिः कमठाङ्कः ॥ (स्वागता) ३

अन्वितत्रिनवतेर्नवशत्या अत्ययेऽत्र शरदां जिनमोक्षात् ।
कालको व्यधित वार्षिकमार्यः
पर्व भाद्रपदशुक्लचतुर्थ्याम् ॥ (स्वागता) ४

तत्तदायतनपङ्क्तिवीक्षणादत्र मुञ्चति जनो विचक्षणः ।
तत्क्षणात्सुरविमानधोरणि
श्रीविलोकविषयं कुतूहलम् ॥ (रथोद्धता) ५

शातवाहनपुरस्सरा नृपाश्चित्रकारिचरिता इहाभवन् ।
दैवतैर्बहुविधैरधिष्ठिते
चात्र सत्रसदनान्यनेकशः ॥ (रथोद्धता) ६

कपिला त्रेय-बृहस्पति-पञ्चाला इह महीभृदुपरोधात् ।
न्यस्तस्वचतुर्लक्षग्रन्थार्थं श्लोकमेकमप्रथयन् ॥ ७

स चायं श्लोकः-(अनुष्टुप्)

जीर्णे भोजनमात्रेयः, कपिलः प्राणिनां दया ।
बृहस्पतिरविश्वासः, पञ्चालः स्त्रीषु मार्दवम् ॥ ८

इह जयति दृशोरमृतच्छटा सुदृग्बर्हिणां पयोदघटा ।
जीवत्स्वामिप्रतिमा श्रीमन्मुनिसुव्रतस्य लेप्यमयी ॥ ९

वर्षाणामेकादशलक्षाण्यष्टायुतानि सार्धानि ।
अष्टौ शतानि षट्पञ्चाशानीत्यजनि कालोऽस्याः ॥ १०

इह सुव्रतजिनचैत्ये यात्रामासूत्र्य विहितविविधमहाम् ।
भव्याश्चिन्वन्त्यैहिकपारत्रिकशर्मसम्पत्तीः ॥ ११

प्रासादेऽत्र श्रीजिनराजां चारु चकासति लेप्यमयानि ।
बिम्बान्यप्रतिबिम्बरुचीनि प्रीतिस्फीतिं वदति जनानाम् ॥१२

अम्बादेवी क्षेत्राधिपतिर्यक्षाधिपतिश्चापि कपर्दी ।
एते चैत्यं समधिवसन्तः श्रीसङ्घस्य घ्नन्त्युपसर्गान् ॥ १३

अत्र चैत्यश्रियः शेखरं सुव्रतः प्राणिपूगोपकारैकबद्धव्रतः ।
वन्द्यमानक्रमः स्वर्गिवर्गैर्मुदा सम्पनीपद्यतां श्रेयसे वः सदा ॥१४

श्रीप्रतिष्ठानतीर्थस्य श्रीजिनप्रभसूरयः ।
कल्पमेतं विरचयाम्बभूवुर्भूतये सताम् ॥ १५

पू.आ.श्री जिनप्रभसूरिविरचितः

## ३३. ॥ श्रीढिम्पुरीस्तवः ॥

उत्तुङ्गैर्विविधैर्नगैरुपलसच्छायैरभिभ्राजिता,
श्रीवीरप्रभुपार्श्व-सुव्रत-युगादीशादिबिम्बैर्युता ।
पल्ली भूतलविश्रुता नियमिनः श्रीवङ्कचूलस्य या,
सा भूत्या चिरमद्भुतां कलयतु प्रौढिं पुरी ढिम्पुरी ॥(शा.वि.)१

व्योमचुम्बिशिखरं मनोहरं रन्तिदेव तटिनीतटस्थितम् ।
अत्र चैत्यमवलोक्य यात्रिकाः
शैत्यमाशु ददति स्वचक्षुषोः ॥ (रथोद्धता) २

मूलनायक इहान्त्यजिनेन्द्रश्चारुलेपघटितोद्भटमूर्तिः ।
दक्षिणे जयति चेल्लणपार्श्वो
भात्युदक् तदपरः फणिकेतुः ॥ (स्वागता) ३

एकत आदिजिनो वृजिनो ऽतोऽन्यत्र पुनर्मुनिसुव्रतनाथः ।
एवमनेकजिनेश्वरमूर्तिः
स्फूर्तिमदभ्रचकास्ति जिनौकः ॥ (स्वागता) ४

अत्राम्बिका द्वारसमीपवर्तिनी श्रीक्षेत्रपालो भुजषट्कभास्वरः ।
सर्वज्ञपादाम्बुजसेवनाऽलिनौ
सङ्घस्य विघ्नौघमपोहतः क्षणात् ॥ (इन्द्रवंशा) ५

यात्रोत्सवानिह शितौ महसो दशम्या-
मालोक्य लोकसमवाय विधीयमानान् ।
सम्भावयन्ति भविकाः कलिकालगेहे-
प्राघूर्णकं कृतयुगं ध्रुवमभ्युपेतम् ॥ (वसन्ततिलका) ६

अमरमहितमेतत् तीर्थमाराध्य भक्त्या,
फलितसकलकामाः सर्वभीतीर्जयन्ति ।
बहलपरिमलाढ्यं चन्दनं प्राप्य यद्वा
क इव सहतु तापव्यापमालिङ्गिताङ्गम् ॥ (मालिनी) ७

वन्द्या नन्द्यादघहतिदृढा ढिम्पुरीतीर्थरत्नम्,
यामध्यास्ते सुरतरुरिव प्रार्थितार्थप्रदायी ।
पद्मावत्या भुजगपतिना चाविमुक्तांह्रिपार्श्वः,
कायोत्सर्गस्थितवपुरयं चेल्लणः पार्श्वनाथः ॥ (मन्दाक्रान्ता) ८

शशधरहृषीकाक्षिक्षोणीमिते (१२५१) शकवत्सरे,
गृहमणिमहे सङ्घान्वीता उपेत्य पुरीमिमाम् ।

मुदितमनसस्तीर्थस्यास्य प्रभावमहोदधे-
रिति विरचयां चक्रुः स्तोत्रं जिनप्रभसूरयः ॥ (हरिणी) ९

पू.आ.श्री जिनप्रभसूरिविरचितः

## ३४. ॥ श्रीव्याघ्रीकल्पः ॥

(अनुष्टुप्)

यः स्यादाराधको जन्तुः श्रेयस्तत्कीर्तनाद् ध्रुवम् ।
इत्यालोच्य हृदा किञ्चिद् व्याघ्रीकल्पं वदाम्यहम् ॥ १

श्रीशत्रुञ्जयनाभेयचैत्यवप्रस्य कर्हिचित् ।
प्रतोलीद्वारमावृत्य काचिद्व्याघ्री समास्थिता ॥ २

निरीक्ष्य निश्चलाङ्गीं तामातङ्कातुरमानसाः ।
जनाः श्राद्धा जिनं नन्तुं बहिस्तो न डुढौकिरे ॥ ३

राजन्यः साहसी कोऽपि तस्याः पार्श्वमुपासृपत् ।
सा तु तं प्रति नाकार्षीत् हिंसाचेष्टां मनागपि ॥ ४

विश्वस्य बाहुजस्तस्य कुतोऽप्यानीय तत्पुरः ।
आमिषं मुमुचे सा च दृशापि न तदस्पृशत् ॥ ५

अथ श्राद्धजनोऽप्येत्य त्यक्तभीस्तत्पुरः क्रमात् ।
तरसा सरसं भक्ष्यं पानीयं चोपनीतवान् ॥ ६

तदप्यनिच्छन्तीं दृष्ट्वा तां दध्यौ जनता हृदि ।
नूनं जातिस्मरैषाऽत्र तीर्थेऽनशनमाददे ॥ ७

श्लाघ्यस्तिर्यग्भवोऽप्यस्याश्चतुर्धाऽऽहारमुक्तितः ।
एकाग्रचक्षुषा चैषा देवमेव निरीक्ष्यते ॥ ८

अभ्यर्च्य गन्धपुष्पाद्यैः श्राद्धाः साधर्मिकीधिया ।
सम्भावयां बभूवुस्तां स्फीतसङ्गीतकोत्सवैः ॥ ९

निराकारं प्रत्याख्यातं तेऽथ तस्या अचीकरन् ।
मनसैव श्रद्दधाना सा स्वीचक्रे च तन्मुदा ॥ १०

इत्थं सा तीर्थमाहात्म्यात्समृद्ध्यच्छुद्धवासना ।
दिनानुपोष्य सप्ताष्टान्नष्टपापा ययौ दिवम् ॥ ११

चन्दनागरुभिस्तस्या वपुः संस्कार्य सञ्जिनः ।
प्रतोल्या दक्षिणे पक्षे शैलीं मूर्तिं न्यवीविशन् ॥ १२

तीर्थचूडामणिर्जीयात्सैष श्रीविमलाचलः ।
भवेयुर्यत्र तिर्यञ्चोऽप्येवमाराधिकाग्रिमाः ॥ १३

व्याघ्रीकल्पमिमं कृत्वा श्रीजिनप्रभसूरयः ।
पुण्यं यदार्जयंस्तेन श्रीसङ्घोऽस्तु सुखास्पदम् ॥ १४

पू.आ.श्री जिनप्रभसूरिकृतम्

## ३५. ॥ श्रीमथुरायात्रास्तोत्रम् ॥

(उपजाति)

सुराचलश्रीजिति देवनिर्मिते
स्तूपेऽभिरूपे वरदो(दे) कृतास्पदौ ।
सुवर्णनीलोपलकोमलच्छवी
सुपार्श्व-पार्श्वौ मुदित[:] स्तवीमि वाम् ॥ १

पृथ्वीसुतोऽपि त्रिजगज्जनानां क्षेमङ्करस्त्वं भगवान् सुपार्श्व ! ।
अपि प्रतिष्ठाङ्गरुहस्तमीश ! कथं च लोके जनितप्रतिष्ठः ॥२

पार्श्वप्रभो ! येऽत्र मनोभिरामत्वन्नाममन्त्रस्मरणैकतानाः ।
उच्चञ्चलच्चञ्चलतागुणाया भवन्ति ते मन्दिरमिन्दिरायाः ॥ ३

महीतलास्फालनघृष्टभालः सुपार्श्व ! सर्पत्पुलकैर्विशालः ।
कदा त्वदंह्रिप्रणिपातकर्म-
प्रमोदमेदस्विमना [नमा]मि ॥ (उपेन्द्रवज्रा) ४

यात्रोत्सवेषु प्रभुपार्श्व ! तेऽत्रागतस्य सङ्घस्य चतुर्विधस्य ।
उत्क्षिप्यमाणागुरुधूपधूमव्याजेन निर्यान्ति तमःसमूहाः ॥ ५

समुच्चरद्धूमशिखप्रदीपच्छलेन वां सेवितुमागता अमी ।
शिरश्चकाशन्मणयः फणाभृतो
निजं कृतार्थाः प्रतियान्ति मन्दिरम् ॥ ६

रुजा भुजङ्गार्णवदावदन्तिनो मृगाधिपस्तेन नरेन्द्रसंयुगाः ।
पिशाचशाकिन्यरयश्च तन्वतो
भियं न तस्य स्मरतीह यो युवाम् ॥ (वंशस्थ) ७

पादारविन्दं सुरवृन्दवन्द्यं वन्दारवो ये युवयोरनिन्द्यम् ।
देवी कुबेरा विपदस्तदीया समूलकाषं कषति प्रसन्ना ॥ ८

यौष्माकवीक्षारसमग्ननेत्रप्रसारिहर्षाश्रुभिराम्भसीकाः ।
ज्वलन्तमन्तर्निचिताघवह्निं निर्वापयन्ते जगतीह धन्याः ॥ ९

इति स्तुतिं श्रीमथुरापुरीस्थयोः पठन्ति ये वां शठतां विनाकृताः।
सुपार्श्वतीर्थेश्वर पार्श्वनाथ वा जिनप्रभद्रं पदमाप्नुवन्ति ते ॥१०
(वंशस्थ)

पू.आ. श्री सङ्गमसूरिकृतम्

## ३६. ॥ श्रीचैत्यपरिपाटीस्तवनम् ॥

(आर्या)

पञ्चानुत्तरशरणा ग्रैवेयककल्पतल्पगतसदनाः ।
ज्योतिष्कव्यन्तरभवनवासिनी जयति जिनवराली ॥ १

वैताढ्यकुलाचलनागदन्तवक्षारकूटशिखरेषु ।
ह्रद-कुण्ड-वर्ष-सागर-नदीषु जयताज्जिनवराली ॥ २

इषुकारमानुषोत्तरनन्दीश्वररुचककुण्डलनगेषु ।
सिद्धालयेषु जीयाज्जिनपद्धतिरिद्धतत्त्वासौ ॥ ३

यत्र बहुकोटिसङ्ख्याः सिद्धिमगुः पुण्डरीकमुख्यजिनाः ।
तीर्थानामादिपदं स जयति शत्रुञ्जयगिरीशः ॥ ४

अष्टापदाद्रिशिखरे निजनिजसंस्थानमानवर्णधराः ।
भरतेश्वरनृपरचिताः सद्रत्नमया जयन्तु जिनाः ॥ ५

विंशत्या तीर्थकरैरजिताद्यैर्यत् शिवपदं प्राप्तम् ।
देवकृतस्तूपगणः स जयति सम्मेतगिरिराजः ॥ ६

ऋषभजिनपदस्थाने बाहुबलिविनिर्मितं सहस्रारम् ।
रत्नमयधर्मचक्रं तक्षशिलापुरवरे जयति ॥ ७

मथुरापुरीप्रतिष्ठः सुपार्श्वजिनः कालसम्भवो जयति ।
अद्यापि सुराभ्यर्च्यः श्रीदेवविनिर्मितस्तूपः ॥ ८

ब्रह्मेन्द्रदशाननरामचन्द्रमुख्यैः प्रपूजितो जयति ।
अङ्गदिकानगरस्थे जिनबिम्बे दिव्यरत्नमये ॥ ९

यस्तिष्ठति वरवेश्मनि साद्‌र्धाभिर्द्रविणकोटिभिस्तिसृभिः ।
निर्मापितोऽ(ऽ)मराज्ञा गोपगिरौ जयति जिनवीरः ॥ १०

हरिवंशभूषणमणिर्भृगुकच्छे नर्मदासरित्तीरे ।
श्रीशकुनिकाविहारे मुनिसुव्रतजिनपतिर्जयति ॥ ११

नेमेः कल्याणकत्रिकमभवन्निष्क्रमणममरमुख्यकृतम् ।
यस्मिन्नसौ महात्मा रैवतकमहागिरिर्जयति ॥ १२

मोढेरपुरनिवासी ब्रह्मोपपदेन शान्तिना रचितः ।
स्वयमेव सप्तहस्तः श्रीवीरजिनेश्वरो जयति ॥ १३

श्रीवलभीपुरनिर्गतरथाधिरूढो जिनो महावीरः ।
अश्वयुजिपूर्णिमास्यां श्रीमालपुरस्थितो जयति ॥ १४

(उदधिजलमध्यलब्धं प्रवहणमानीतमतिशयसुरम्यम् ।
वटपद्रकनगरस्थं जिनबिम्बं नौमि रत्नमयम् ॥)
जयति सदतिशययुक्त स्तम्भनक निकेतनो जिनःपार्श्वः ।
पायात् प्रतिकृतिपूज्यो मुण्डस्थल संस्थितो वीरः ॥ १५

(अमरेन विनतचरणाः सकलाधिव्याधिदुरितशतहरणा ।
स्तम्भनकपुरवरस्थो श्रीपार्श्वजिनेश्वरो जयति ॥)
नमिविनमिकुलान्वयिभिर्विद्याधरनाथकालिकाचार्यैः ।
काशह्रदाख्ये नगरे प्रतिष्ठितो जयति जिनवृषभः ॥ १६

पाण्डवमात्रा कुन्त्या सञ्जाते श्रीयुधिष्ठिरे पुत्रे ।
श्रीचन्द्रप्रभनाथः प्रतिष्ठितो जयति नाशिक्ये ॥ १७

नागेन्द्र-चन्द्र-निर्वृति-विद्याधरसकलसङ्घमुख्येन ।
सोपारकप्रतिष्ठितो युगादिजिनपुङ्गवो जयति ॥ १८

विमलनरेन्द्रकृतस्तुतिऋषभोऽर्बुदनगविशेषको जयति ।
जयतीह जगति शान्तिः श्रीगोकुलवासि कृतपूजः ॥ १९

(अर्बुदशिखरे रम्ये श्रीऋषभजिनेश्वररम्य प्रतिबिम्बम् ।
विमलेन विमलमतिना जयति कृतं त्रिदशकृतपूजम् ॥)
(श्री जाबाल(लि)पुरस्थितकाञ्चनगिरिशिखरशीर्षमाणिक्यम् ।
सकलकलिकालेऽपि श्रीपार्श्वजिनेश्वरो जयति ॥)
कलिकुण्डकुक्कुटेश्वरः चम्पा-श्रावस्ति-गजपुरायोध्याः ।
वैभारगिरि-पावा-जयन्ति पुण्यानि तीर्थानि ॥ २०

ॐकारनगर-वायट-जाल्योधर-चित्रकूट-सत्यपुरे ।
ब्रह्माण-पल्लिकादिषु ऋषभादिजिना जयन्त्यनघाः ॥ २१

इत्येवमन्यदपि यत्तीर्था भुवनत्रयेऽपि तीर्थकृताम् ।
तद्बिम्बानि च वन्दे श्रीसङ्गमसूरिविनुतानि ॥ २२

पू.आ.श्री जिनेश्वरसूरि विरचितम्

## ३७. ॥ तीर्थयात्रास्तवनम् ॥

तीर्थयात्राप्रचलितसंघपादाब्जरेणुभिः ।
स्पृष्टैरपि पराप्येत, न स्पर्शो भवरक्षसा ॥ १

तीर्थेशवन्दनैः पापतसप्रशमचन्दनैः ।
प्राप्यते परमानन्दो, महानन्दोऽमरालयः ॥ २

शत्रुञ्जये नाभिसूनोरुज्जयन्ते च नेमिनः ।
ते धन्या ये प्रकुर्वन्ति, वन्दनार्थं मनोरथान् ॥ ३

कदा शत्रुञ्जये शैले, वन्दिष्ये प्रथमं जिनम् ।
येन दृष्टेन नश्यन्ति, पाप्मानः पूर्वजन्मनाम् ॥ ४

यथा सेफालिकापुष्पमालिका त्रुट्यति क्षणात् ।
चन्द्रोदये तथा यत्र, दृष्टे कर्म्मपरम्परा ॥ ५

तं नाभेर्नन्दनं देवं, मारुदेवं गुणास्पदम् ।
भरतेश्वरचक्रीशश्रीमद्बाहुबलिप्रभो ! (भुम्) ॥ ६

तथाऽष्टानवतिक्ष्मेशां (शान्), ब्राह्म्या ब्राह्म्या महाविदम् ।
सुन्दर्याः शीलसुन्दर्या, वप्रं वप्रं महाश्रियाम् ॥ ७

पञ्चचापशतीमानविग्रहं क्षिप्तविग्रहम् ।
प्राज्यं राज्यं परित्यज्य, कृतचारित्रसङ्ग्रहम् ॥ ८

शाक्कराङ्कं परिभ्राजं, स्वर्णश्रीपर्णरोचिषम् ।
आर्यानार्येषु देशेषु, सहस्त्रं शरदां क्षितौ ॥ ९

मौनेन विहृतं वर्षानाश्वासं कृतपारणम् ।
श्रेयांसस्य गृहे स्वादुरसैः पुण्ड्रद्रवैर्नवैः ॥ १०

न्यग्रोधस्य तले क्लृप्ताष्टमं योगीन्द्रसत्तमम् ।
घातिकर्म्मक्षयाज्जातकेवलं निर्मलं स्तुवे ॥ ११

सिद्धमष्टापदे शैले, शैलेशीमाप्य योगिनाम् ।
सहस्त्रैर्दशभिः शुक्रचक्रवर्त्तिस्तुतं श्रये ॥ १२

सम्मेते तीर्थकोटीरे, सुनाशीरेण संस्तुतान् ।
विंशतिं तीर्थपान् सिद्धान्, कदा वन्दे प्रमोदतः ? ॥ १३

वन्दे श्रीधातकीखण्डे, धातकीखण्डमण्डिते ।
पुष्करार्द्धे परार्द्धे च, जम्बूद्वीपे महर्द्धिके ॥ १४

भरतैरावतक्षेत्रपञ्चके श्रीप्रपञ्चके ।
ससत्यग्रं गुणैरग्र्यं, शतं तीर्थकृतां कदा ? ॥ १५

जम्बूद्वीपे महाद्वीपे, प्रदीपे तामसक्षितौ ।
पूर्वेषु श्रीविदेहषु, गेहेषु प्राज्यसम्पदाम् ॥ १६

श्रीमत्यां पुष्कलावत्यां, विजये विजयोत्तमे ।
वर्त्तमानं चिदम्लानं, सीमन्धरजिनेश्वरम् ॥ १७

प्राकारत्रयमध्यस्थं, मध्यस्थं सर्वजन्तुषु ।
रत्नसिंहासनारूढं, वीज्यमानं च चामरैः ॥ १८

चतुःषष्ट्यः सुराधीशैर्विष्णुना युगबाहुना ।
पूज्यमानं पञ्चचापशतीमानवपुर्लतम् ॥ १९

तथाऽपरविदेहेषु, तीर्थेन्द्रं श्रीयुगन्धरम् ।
श्रीमहाबाहुकृष्णेन, सेवितं वरपर्षदा ॥ २०

ललाटपट्टमास्फाल्य, पृथ्वीपीठे मुहुर्मुहुः ।
स्तुत्वाऽऽनन्देन वन्दित्वा, कदा विज्ञपयाम्यहम् ॥ २१

नाथ ! भीतो भवाम्भोधेर्बोधिलाभं प्रयच्छ मे ।
देहि दीक्षां महाशिक्षां, स्पर्शं मे कुरु मस्तके ॥ २२

स्वहस्तेन प्रशस्तेन, सर्वलक्षणराजिना ।
त्वां प्राप्य निर्वृतो भूत्वा, त्वदाज्ञां पालयाम्यहम् ॥ २३

कुर्वे मुक्तावलीं रत्नावलीं श्रीकनकावलीम् ।
सिंहनिःक्रीडिताभिख्यं, तपो लघु तथा महत् ॥ २४

सुदुष्करं गुणरत्नसंवत्सरमहातपः ।
आचाम्लवर्द्धमानं च, तपः षष्ठाष्टमादिकम् ॥ २५

सेवामि स्थावरं कल्पं, जिनकल्पं सुदुर्वहम् ।
अनल्पं प्रतिमाकल्पं, यथालन्दं सुदुःसहम् ॥ २६

कदा प्राप्य यथाख्यातं, चारित्रं मित्रमुत्तमम् ।
उत्पाद्य केवलज्ञानं, प्रबोध्य त्रिजगज्जनम् ॥ २७

अष्टभिः समयैः कृत्वा, समुद्घातं महागुणम् ।
प्राप्नोमि श्रीमहानन्दं, महानन्दं सुनिश्चलम् ? ॥ २८

न जरा जन्म नो यत्र, न मृत्युर्न च बन्धनम् ।
न देहो नैव च स्नेहो, नास्ति कर्म्मलवोऽपि च ॥ २९

केवलं केवलं यत्र, यत्र दर्शनमक्षयम् ।
अक्षयं च सुखं यत्र, वीर्यसम्यक्त्वमक्षयम् ॥ ३०

यथा तत्रैव तिष्ठामि, तीर्त्वा भवमहोदधिम् ।
प्रसद्य कुरु मे नाथ !, दृक्प्रसादं तथा शुभम् ॥ ३१

इत्थं सूरिजिनेश्वरेण विनुताः सर्वे सुपर्वेश्वर-
स्तुत्या नित्यसुखाः सुखानि सुदृशा ध्वस्तापदां सम्पदाम् ।
मह्यं रातु शिवास्पदं गतमदं प्रणिन्तुं सङ्घं जिना-
स्तेषां सर्वजगत्त्रयी रचयतात् कल्याणिकाद्युत्सवान् ॥ ३२

इति यात्रास्तवः सूरिश्रीजिनेश्वरविहितः ।

पू.उपाध्यायश्री क्षमाकल्याणगणिकृता

## ३८. ॥ श्रीजैनतीर्थावलीद्वात्रिंशिका ॥

तीर्थेश्वरश्रीयुतविद्यमान-सीमन्धरस्वामिवरस्वरूपम् ।
ध्यात्वा हृदन्तः प्रणतामनिन्द्यां,
स्तोष्यामि तीर्थावलिकां प्रसिद्धाम् ॥ (इन्द्रवज्रा) १

चैत्यं जिनेन्द्रस्य जिनेन्द्रतुल्य-
मित्यागमोक्तिं परिभाव्य सम्यक् ।
क्षेत्रे किलाऽस्मिन् जिनचैत्यमालां,
सद्भावतः स्तोतुमहं यतिष्ये ॥ २

(उपजाति)

सौराष्ट्रदेशे बहुसन्निवेशे, शत्रुञ्जयः शैलपतिर्विभाति ।
तच्छृङ्गरूपः पुनरुज्जयन्तो नगोत्तमः साधुसुदर्शनीयः ॥ ३

तत्राऽऽदिनाथप्रमुखा जिनेन्द्राः श्रीपुण्डरीकप्रमुखा मुनीन्द्राः ।
नेमीश्वराद्याः प्रणताः क्रमेण, स्वकृत्यसंसाधनतत्परेण ॥ ४

घोघापुरे श्रीनवखण्डपार्श्वं,, चैत्यं च भावान्नगरे जिनस्य ।
अनंसिषं श्रीभृगुकच्छसञ्ज्ञे, पुरे पुनः श्रीमुनिसुव्रतेशम् ॥ ५

हालार-कण्ठाल-सुगुर्जरत्ता-कच्छादिदेशस्य जिनालयेषु ।
नता जिनाः स्थम्भनपार्श्वदेवा-
दीन् विश्वपो नन्तुमनाः समस्मि ॥ ६

शङ्खेश्वरे सेवितपार्श्वदेवो, मरौ च देशे नवदुर्गभूमौ ।
गोडीपुरोद्भासकपार्श्वनाथ-मनंसिषं सत्यपुरे च वीरम् ॥ ७

नगेऽर्बुदाख्ये वरचैत्यवृन्दे, सीरोहिकायां च पुरि प्रधाने ।
पुनर्महेवादिपुरेऽथ वन्दे, जिनेश्वरान्, निर्वृतिकारिमूर्तीन् ॥ ८

फणासहस्रान्वितपार्श्वनाथा-दीन् पत्तने श्रीमति लोद्रवाख्ये ।
चिन्तामणिस्वामिमुखान् जिनेन्द्रान्
श्रीजेसलाद्रावनमं सुभक्त्या ॥ ९

बीकादिनेराख्यपुरे प्रधाने, श्रीनाभिराजाङ्गजमुख्यदेवान् ।
अवन्दिषि श्रीजिनशीतलेशं, रिणीपुरे नन्तुमनाः समस्मि ॥१०

पार्श्वादिसार्वान् फलवर्द्धिकादौ, श्रीगोढवाडस्थितपञ्चतीर्थीम् ।
मनोहरां राणपुरादिकं चाऽ-भजं प्रभूतार्हतचैत्ययुक्ताम् ॥ ११

श्रीमारुदेवाऽ-जितनाथदेवाऽ-भिनन्दन-श्रीसुमतीश्वराणाम् ।
अनन्तनाथस्य च जन्मभूमिं, पुरीमयोध्यामवलोक्य हृष्टः ॥१२

जिनेन्द्रचन्द्रप्रभपादपद्मे, श्रीचन्द्रपुर्यां प्रणते प्रमोदात् ।
वाराणसीतीर्थभुवि प्रकामं नमस्कृताः पार्श्व-सुपार्श्वदेवाः ॥१३

अथाङ्गदेशाश्रितभूमिभागे, चम्पानगर्यां वसुपूज्यसूनोः ।
जिनस्य चैत्यं प्रणिपत्य भक्त्या,
श्रीवासुपूज्येशमहं स्मरामि ॥ १४

श्रीबङ्गदेशे सुमनोहराणि, जिनेन्द्रचैत्यान्यभिवन्द्य मोदात् ।
सम्मेतशैले गिरिराज उच्चै-र्नताऽर्हतां विंशतिरात्मशुद्ध्यै ॥१५

देशे प्रधाने मगधाभिधानेऽ-भवत् पुरं राजगृहाभिधानम् ।
तत्पार्श्वदेशे वरपञ्चशैलीं,
समीक्ष्य चित्ते मुदितोऽस्मि सम्यक् ॥ १६

आद्यस्तु वैभारगिरिः प्रसिद्धो द्वितीयकः श्रीविपुलाचलाख्यः ।
रत्नाचल-स्वर्णगिरी ततो द्वौ,
ततस्ततः श्रीरुदयाभिधोऽद्रिः ॥ १७

नगेषु चैतेषु पुनर्नगर्यां, श्रीवीरनाथप्रमुखान् जिनेन्द्रान् ।
श्रीगौतमादीन् गणधारिणश्च,
नत्वाऽन्यसाधूनभवं सुपुण्यः ॥ (त्रिभिः सम्बन्धः) १८

पावापुरीमध्यगतं मनोज्ञं, विमानरूपं चरमेशचैत्यम् ।
द्वितीयकं वारिगतं च सम्यग्
निरीक्ष्य नत्वा च मुदा भृतोऽस्मि ॥ १९

चैत्यं वडग्रामगतं प्रणम्य, मनोरमे क्षत्रियकुण्डघाटे ।
गिरौ च चन्द्रप्रभ-वीरमुख्यान्,
चैत्येषु भक्त्या नतवानहं तान् ॥ २०

काकन्दिकायां च पुरे विहारे, जिनेन्द्रचैत्यानि मयाऽभिवन्द्य ।
ग्रामेऽभिरामे फतूआभिधाने,
नमस्कृता कुन्थुजिनेन्द्रमूर्तिः ॥ २१

श्रीपत्तने पाटलिपुत्रनाम्नि, विशालनाथप्रभृतीन् जिनेन्द्रान् ।
सुदर्शनं श्रेष्ठिमुनिं च सिद्ध-मनंसिषं शुद्धगुणाप्तिहेतोः ॥ २२

वैताढ्यशृङ्गादिषु तानि भास्व-ज्जिनेन्द्रचैत्यानि च शाश्वतानि ।
अष्टापदे चाऽऽर्षभिकारितानि,
समस्म्यहं तानपि नन्तुकामः ॥ २३

(शालिनी)

ग्रामेऽरण्ये वा पुरे वा गिरौ वा, शुद्धाचार्यस्थापितानीह यानि ।
देहेऽत्यन्तं गूढगुह्यप्रदेशा-न्याकारेण प्राज्यसौन्दर्यभाञ्जि ॥ २४

मिथ्यादृग्भिर्नाऽपि च स्वीकृतानि, सम्यग्दृग्भिर्भावतः सेवितानि ।
अर्हच्चैत्यान्यत्र देशे स्थितोऽहं,
वन्दे भक्त्या तानि सर्वाणि नित्यम् ॥ (यु.) २५

अस्मिन् काले लेशतो विद्यमानः, काम्यः श्रीमज्जैनवाणीप्रकाशः ।
आधारोऽसावेककः प्राणभाजां,
यत्सम्पर्कात् प्राप्यते शुद्धमार्गः ॥ २६

अस्त्याऽऽधारोऽर्हत्प्रतिच्छन्द एष सौम्याकारो
निर्विकारोऽद्वितीयः ।
सद्भावाप्तिर्दर्शनाद् यस्य पुंसां
सञ्जायेत प्रायशो दोषनाशः ॥ २७

दृष्टात्मानः केचिदैदंयुगीना लोकाः पापोद्भूतमिथ्यात्वयोगात् ।
नो मन्यन्ते स्थापनां विश्वभर्तु-
र्दुष्टैर्वाक्यैर्ये तु निन्दन्ति पूज्याम् ॥ २८

जैनाभासास्ते हताशाः स्वकृत्ये, स्वेच्छोत्सूत्रालापिनः पापचित्ताः ।
संसारेऽस्मिन् दुर्गतौ गन्तुकामाः,
सन्त्येतेषां दुर्दशां तर्कयामि ॥ (यु.) २९

(स्रग्विणी)

भावतीर्थेशितुर्दशनं सर्वदे-च्छामि संसारनिस्तारकारि ध्रुवम् ।
भावनिक्षेपमाधाय चित्ते स्वयं,
स्थापना-द्रव्य-नामाख्यनिक्षेपकान् ३०

नन्तुमिच्छामि वन्दे भजामि त्रिधा, भावनैषैव मे सर्वदा सुस्थिरा।
अस्तु नो यावता वीतरागादिता,
स्यादिति प्रार्थये वर्द्धमानेशितुः ॥ (यु.) ३१

इत्थं गणीशामृतधर्मशिष्य-क्षमादिकल्याणविशारदेन ।
श्रीजैनतीर्थावलिका स्तुतेयं भव्यात्मशुद्ध्यै भवतादजस्रम् ॥३२

पू.पं. साधुमेरुगणिविरचिता

## ३९. ॥ यात्रा सप्ततिका ॥

(शार्दूलविक्रीडित)

वन्दित्वा रचिताञ्जलिर्भगवतामर्च्याः चतुर्विंशतिं,
मुग्धानुग्रहहेतवे पुनरपि श्रीधर्मलाभेच्छया ।
पूज्योपासनया श्रुताच्च किमपि ज्ञात्वा प्रयत्नाद् मना-
गद्रिश्रीविमलादितीर्थविषयं यात्राविचारं ब्रुवे ॥ १

मोहव्यूहदवाशुशुक्षणिशिखाकादम्बिनीसन्निभा,
भव्याभीष्टपरम्परावितरणे सङ्कल्पवल्लीसमा ।
श्रीतीर्थङ्करशासनोज्ज्वलतरप्रासादकेतूपमा,
सा यात्रा स्वकुटुम्ब-सङ्घसहितैः कार्या बुधैरुत्सुकैः ॥ २

ये सप्ताधिकषष्टिभेदविदितं निर्याणयाने रथं,
सम्यक्त्वं परिपालयन्ति कृतिनश्चन्द्रप्रभानिर्मलम् ।
भार्या-यौवन-गेहकार्यनिकरानालीढचित्ता दृढा
आत्मानं जिनयात्रया सरभसं सम्यक् पुनन्त्युत्तमाः ॥ ३

न्यायोपात्तधनं व्ययन्ति वपुषा कष्टं सहन्ते घनं,
दुर्मोचं भवनापणादि सकलं मुञ्चन्ति पुण्यार्थिनः ।
भोगाभोगपराङ्मुखाः सगुरवः शत्रुञ्जये रैवते,
यात्रां कर्मविनाशिनीं सुपरिणा धन्या नराः कुर्वते ॥ ४

आजन्मार्जितसर्वकल्मषहरी यात्रा विशुद्धा कृता,
तस्यै मत्सरमुख्यदोषहरणात् स्वं येन नोज्ज्वालितम् ।
कोटिस्तेन वराटिकालवकृते हा ! हारिताऽनार्यया,
बुद्ध्या बाटिकयाऽरघट्टकवरो विक्रीत एवाऽसता ॥ ५

मज्जाजैनमहाजनैर्बहुविपत्संसारकारागृह-
वासोद्विग्नमनोभिरुद्यमपरैर्न्यायात्तवित्तव्ययैः ।
श्रीशत्रुञ्जयभूधरेश्वरमहत्तीर्थादियात्रोत्सवाः,
कर्त्तव्याः किल रामणीयककला-कल्याण-कीर्तिप्रदाः ॥ ६

मुक्ता-शुक्ति-सुवर्ण-रूप्यखनयो वज्राकरो रोहणो,
द्राक्षा-चम्पक-नालिकेर-कदली-गोशीर्षमुख्या यथा ।

स्वाभाव्येन शुभा इमे वसुमतीमध्ये पदार्थास्तथा,
सिद्धक्षेत्रमिदं भवेऽर्हदुदितं जानीत पुण्यात्मकम् ॥ ७

अज्ञातोपनिषद्भिरद्भुतगुणे श्रीतीर्थयात्राविधौ,
बाह्याडम्बरकीर्त्तिपात्रनिपुणैः स्वं मन्यमानैः परम् ।
मुग्धैर्गड्डुरिकाप्रवाहपतितैः कष्टं कियत् सह्यते ?,
सम्यक् तत्त्वमिहोपलक्ष्य सुधियस्तस्मादुपक्राम्यताम् ॥ ८

श्रीअर्हद्-गुरुभक्तिभावितमनाः साधर्मिकप्राञ्जलो,
दीना-नाथदयामयो मधुरवाक् धीरश्च वीरो नयी ।
सर्वस्योचितकृद् वदान्य-विनयी दुष्टस्य शिक्षाप्रदः,
सौम्यः सङ्घपतिः सुधीर्विजयते गाम्भीर्यसर्वंसहः ॥ ९

भव्या-भव्य-विषा-मृता-घ-सुकृतोद्योता-न्धकारौषध-
व्याधि-स्व-नरक-प्रकीर्ति-कुयशो - रत्ना-श्ममुख्या यथा ।
रम्या-रम्यतया निसर्गत इमे श्रीजैनतीर्थे पर-
तीर्थे सर्षप-मेरुवद् गुरु तथा ज्ञेयं बुधैरन्तरम् ॥ १०

शक्ति-क्षान्तिबहुक्षमो गुरुतया मानार्हमानप्रदः,
सारां सर्वजने करोति विनयी देवे गुरौ भक्तिमान् ।
सर्वत्राऽपि च सावधानहृदयो यात्रां विधत्ते सुधी-
स्तस्यैवैहिक-पारलौकिकसुखश्रेणी भवेन्निश्चला ॥ ११

श्रीमत्सम्यक्त्वधारी जिनवचनरतो ब्रह्मचारी विशुद्धो
भूसंस्तारी सचेताः सकरुणहृदयः पादचारी ससत्त्वः ।
सारम्भाहार-वस्तुव्रजरसपरिहारी रसज्ञाक्षजेता
एकाहारी निरीहो विमलगिरिपथे याति धन्यः स एकः ॥१२

(स्रग्ध.)

श्वासो यावदिहाऽस्ति तावदतनुः शोषो गृहारम्भिणा -
मत्वैवं क्षणभङ्गुरं जगदिदं मोहव्यपोहान्नरैः ।
वीवाहा-पण - कर्षणादि सकलं मुक्त्वैवमेवोद्यनै-
र्यात्रा यैः क्रियते यथेष्टफलदा दक्षास्त एव क्षितौ ॥ १३

अथ क्रियाविधिः

पेयं प्रासुकवारि सारयतनापाल्या(:) सशील(लं?) व्रताः,
प्रत्याख्यान-परोपकारकरणे कार्यं तथाऽऽवश्यकम् ।
वक्तव्यं विगताभिमानमनिशं सप्रश्रयं वर्त्मनि,
रेकारादिककट्वसभ्यवचनं त्याज्यं पुनश्चापलम् ॥ १४

अथ दुर्वाक्यरिः

दस्यो ! काहलिकश्च शाकिनिक ! रे कारागृहक्षेपण-
योग्यो लम्पट ! मांसकारिवचनोच्छिष्टो बकध्यानिकः ।
दासो मारय कारणेन महताऽप्युग्रं शठो निर्दयो,
घ्रा(घा)तस्तीर्थपथे सुधीरिति वदेद् वाक्यं न मर्मश्रयम् ॥१५

अथ मर्मोक्तिः

हत्याकारक रे ! परस्वममितं पार्श्वे तवाऽस्ति स्थितं,
पङ्क्ति नाऽर्हसि रेऽमुकोऽपरिमितो मन्तुः कृतोऽस्ति त्वया ।
न स्वं वेत्सि धृतस्तदा नटविटान्तःस्थश्चरन् विक्रिया-
-मीदृक्षं कलहेऽपि तीर्थपथिकैर्वाच्यं न मर्माश्रयम् ॥ १६

पुनर्गालिः

अक्षिस्फोट भुवास हा हत लपत् तुण्डोऽन्त्यजः कीदृशः,
शूल्यामस्य मुखे पुरीष-रजसी क्षिप्त्वाऽर्द्धचन्द्रं कुरु ।

कुष्टिन् ! पद्दक ! गर्दभान्ध ! बधिरो भङ्क्ष्यामि वक्त्रं पदौ,
हस्तौ दन्तचयं म्रियस्व निपुणैर्वाच्यं न तीर्थाध्वनि ॥ १७

शूली-सूचनात् - शूलीक्षेपणार्हः । तथा ॥ १५-१७
काव्ययोर्गाली(लि)पद्धतिः सूचिता । नोक्तियुक्तिर्विलोक्या ।
एकेनाऽपि पुरा नृशंसवचसा प्रोक्तेन शोश्रूयते,
जन्माऽवाप्य भवान्तरे शुभकुले पुत्रेण मात्राऽपि च ।
शूलीक्षेपण-हस्तकर्त्तनविपत् प्राप्ता महादारुणा,
धर्मिष्ठेन नरेण कर्णकटुका गालिर्न देया ततः ॥ १८

पापारम्भपराः सुशीलविकला अप्रासुकाहारिणो,
दुर्दान्ताः कुटिलाः कुतूहलरता लोकप्रवाहेरिताः ।
ये सप्तव्यसनाभिभूतमनसस्तीर्थाध्वसञ्चारिणः,
स्तोकास्तोकतृणाद्यदत्तहरणास्ते दीर्घसंसारिणः ॥ १९

पैशुन्यं व्यवसायकेलिपरता पाश्चात्यचिन्ता हठा-
ऽहङ्कारेण परापवादवदनं मौढ्यं परद्रोहणम् ।
रौद्रध्यान-परोपहासकरणं सावज्ञनिर्भर्त्सनं,
यात्रायामिति वर्जनीयमपरं प्रायः प्रमीलादिकम् ॥ तथा- २०

स्वस्थाने जिनगेह-पौषधगृहे कारापणं किञ्चन-
पूर्वं तत्सकलं विधेयमचलं यात्रास्थितिं जानता ।
पश्चान्मारिनिवारणं वितनुते जीवावनं शौनिकात्
प्रस्थानं कृतमङ्गलः सुशकुनैः कुर्यात् पुनः सद्दिने ॥ २१

देव-ज्ञान-धनस्य साधिकृतिना स्वस्मिन् परस्मिन्नृणं,
त्याज्यं यन्(द्) नरकार्त्तिकारणमिदं स्नात्रं च देवालये ।

निर्माप्योरुमुदा वरध्वजपटो देयो विरोधी पुनः,
क्षन्तव्यो बहुलक्षमागुणभृता यात्रा ततस्तन्यते ॥ २२

यात्रारम्भदिने प्रलेहलवणं त्याज्यं पयो भोजने,
सन्तोष्यः, स्वजनव्रजः सुवचनैर्दानैश्च वर्ज्यः कलिः ।
पत्नी पुष्पवती द्विसूतकदिनं नभ्राडकालोऽधमो
हृष्टः सृष्टवरासनः कृतजिनाद्यर्च्य(र्च)-प्रणामश्चरेत् ॥ २३

सिक्प्रक्षालन-केलिनिर्मिति-नखोत्तारादि मेधाविना
स्नानं तैलखलिप्लुतं च शिरसः सन्दर्भणं मैथुनं,
नक्षत्र-ग्रहयोग-वार-तिथिमच्चन्द्रोदयादिक्रमान्(द)
नानाशुद्धियुते मुहूर्तदिवसे त्याज्यं प्रयत्नात् पुनः ॥ २४

भुक्त्वा क्षिप्रमथीति तैलसहितं पिण्याकमेवाऽथवा,
गन्तव्यं विमलाचले शुभधिया द्रव्यं न चेत् पुष्कलम् ।
विज्ञेयो गृहमेधिनां तनुधियां गर्भस्य मासोऽन्यथा,
सङ्क्षेपेण सविस्तरेण यदि वा यात्रा विधेया ततः ॥ २५

तिर्यग्नारकयोर्गतिद्वय-विपद्व्राते र्भवी मुच्यते,
श्रीसिद्धाचलयात्रया फलमिदं प्रायेण साधारणम् ।
ये त्वत्यन्तविवेकिनो जप-तपो - दानादिधर्मे रता-
स्तीर्थेऽस्मिन् सुखमाप्स्यतेऽतिविपुलं तैर्वेत्ति तद् बोधिदः ॥२६

अर्हद्भक्तिरतोत्तमर्णबलिना प्राप्ताऽधमर्णान्तिके,
लभ्यं बह्वपि तीर्थवर्त्मनि बलाद् याच्यं न भूयो रिपुम् ।
दृष्ट्वा जातु न दुष्टधीरपि तदा कार्या तथा द्रोहकः,
क्षन्तव्यो ग्रहवान् क्वचिच्च न भवेदाऽऽयव्ययालोकनात् ॥२७

दुःसाधर्मिक-हीन-दीन-गुणकृत् प्राग् जीर्णचैत्योद्धृता-
वुद्योगो(द्युक्तो)ऽपि च बन्द(न्दि)मोचनचणः स्मेराननः कार्यकृत्।
मार्गे धामनि धाम्नि देवभवने स्नात्र-ध्वजारोपणात्
पञ्चातोद्यसुशब्द ताण्डवमहोत्साहात् कृती सञ्चरेत् ॥ २८

इक्षूणां ग्रहणं प्रविश्य कणशादानं परक्षेत्रके,
कुर्युर्दण्डकमोटनं च चणकोत्पाटं कणाम्बाग्रहम् ।
ये कालिङ्ग-मतीर-नागलतिका-माकन्द-राजादनी-
मुख्यं चौरिकयेति लान्ति कुधियस्तेषां हि यात्रा वृथा ॥ २९

मूलं गृञ्जन - भृङ्ग-बेर-बदरी वृक्षोद्भवं माक्षिकं,
ये जिह्वाविवशास्तथाऽन्यदपि यत् खादन्त्यखाद्यव्रजम् ।
निश्यश्नन्ति पिबन्त्यपेयमपि ये तोयं पटाशोधितं,
वस्त्राङ्गे क्षिपयन्ति मुत्कलजले तद्यात्रया किं फलम् ? ॥३०

(अन्यच्च)

गच्छन्तः शकटव्रजे स्वशकटं मध्ये क्षिपेयुर्बलाद्,
ये निस्त्रिंशमनोरपारकलहं पश्चान् मिथः कुर्वते ।
तेषां क्लिष्टहृदां सुतीर्थगमनं वैफल्यमापद्यते,
भूयः प्रत्युत पातकं बहुभवैर्दुर्वेद्यमास्कन्दति ॥ ३१

[अथ दुष्कलत्रोक्तिः (?)]

पुत्र्याः सम्प्रति पाणिपीडनमहः कार्योऽस्ति नोर्जस्वला
यूयं गो-महिषी-स्नुषाप्रसवनं द्रव्यव्ययो नः कुतः ? ।
नग्नीभूय ददाति देवभवने को वैजयन्तीं बहि-
र्धर्मेणैव च दच्छ(?) गाः स्वसदने बाला म्रियन्ते क्षुधा ॥३२

मार्गश्चाऽपि मलिम्लुचादिभयकृद् यात्राक्षणः कोऽधुना ?
भिन्तेऽन्तः करपत्रवद् वहति चौकोर्त्तिमिहाऽऽसारिणीम् (?) ।
उच्चाटैर्मधुजालवत् परिवृता निष्कालखण्डा अहो !
पत्न्येत्थं विविधप्रकारवचसा गच्छन् नरो वार्यते ॥ ३३

तथा - सुतस्य लेखशालाकरणं, सुतायाः सीमन्तसमयः, पुत्रार्थे वैवाहिका आगन्तार, ऋणसम्बन्धिनः पीडयन्तः सन्ति, दायादा वणिक् पुत्राश्च निरङ्कुशाः स्वच्छन्दं गृहसूत्रं विनाशयिष्यन्ति, ग्रन्थिकां च करिष्यन्ति, अग्रेऽपि छुटितैः पट्टलैरागम्यमानमस्ति दन्तलालैर्ढिङ्कलत्ताभ्यां सन्ति दिना नीयमानाः कथमपि कथमपि दन्तानापीड्य कालोऽस्ति गृह्यमाणः मत्तो वणिक्(ग) इति कर्चरीपर्पटिकां कुर्वाणाऽस्ति कुत्राऽप्यऽस्य न क्षात्रं फावितं इति पिशुनप्रवेशो भविष्यति, युष्माकं स्मरति यात्रा, इत्यादि बहुधा युक्तिभिर्यात्रानिषेधकर्त्री कुकलत्रोक्तिः ।

अतः-पूर्वं तावदगारबन्धनमयं हातुं न शाशक्यते ,
यात्रार्थं यदि साहसेन महता तत्याज तत् तत् तदा ।
अज्ञैः कृत्रिमकीर्त्तिहर्षधरणान् मूल्यातिगं दुर्लभं,
तत् पुण्यं बटु-भट्टचाटुवचनैर्हा ! किं मुधा हार्यते ॥ ३४

पूर्वं श्रीभरतेश-चक्रिसगरौ श्रीनैषधो रामराट्,
पुण्यश्लोक युधिष्ठिरो नरपतिः श्रीश्रेणिकः सम्प्रति- ।
कीर्त्तिः स्फूर्तिमती निगर्वविदुषा स्वश्रेयसे विक्रमा-
-दित्यक्ष्माप - कुमारपालनृपती एषां पुनः कार्यते ॥ ३५

श्रेयांसाख्यकुमाररत्न- मदना आनन्द-कामादयः,
श्राद्धा जावडि(ड)-साजणाभडवराः सान्तू(न्तुः) तथा वाग्भटः।

आभू-आम्बड-वस्तुपाल-समराः सारङ्ग - साचाभिधौ,
भीमः सालिग-पेथडाख्य जगडू एषां यशः ख्यायते ॥ ३६

सञ्ज्ञावान् हृदि कोऽपि सश्रुतिशिराः श्रीवन्द्यसद्देशनां,
कामं श्रोष्यति चेत् तदा जिनवरादिष्टं गरिष्ठं गुणैः ।
श्रीशत्रुञ्जय-रैवताचलयुगं तीर्थोत्तमं ज्ञास्यति,
संसारागमरोधकं प्रति सतोऽस्त्यन्यत् पुनर्नेदृशम् ॥ ३७

ये कुर्वन्ति निरङ्कुशा अतिमदोन्मत्ताश्च तीर्थे पर-
स्त्रीणां वक्षसि हस्त-वाहन-वपुःसंश्लेषजा विक्रियाः ।
तेषां पातकिनां कुलक्षणवतां स्वच्छन्दसञ्चारिणां
कल्पान्तेऽपि सुनिन्द्यदुर्गतिगमादुद्वर्त्तनं दूरतः ॥ ३८

सङ्घं वर्त्मनि ये तुदन्ति मलिना रात्रौ तथा छद्मना,
तस्याऽऽछिद्य बलेन चोरचरटाः कुप्यादि गृह्णन्ति ये ।
पच्यन्ते सुचिरं घनाघनिचिता अत्यन्तपीडासहाः,
कुम्भीपाकगताः कुकर्मवशगास्ते शोचनीया बुधैः ॥ ३९

शेषांहःकणतः - शुभाः सगरजाः सार्थेन सर्वे मृता
हा हा ! षष्टिसहस्त्रकाः कटुरसो दुष्कर्मणां कीदृशः ? ।
यैः शत्रुञ्जयतीर्थवर्त्मनि पुरा सङ्घश्चलन् लुण्टित-
स्तत्पापेन चिरोप[भु]क्तमशुभं वाचां न यद् गोचरम् ॥ ४०

कर्त्रेदं न यथा तथा शुचिधिया धर्मार्थिनाऽङ्गीठकं,
बह्वर्थे यदि तत्करोति [च] तदा शुद्धिर्विधेयैधसाम् ।
कीटोद्भेदि निकादिजन्तुनिलयं काष्ठादि न ज्वालयेद्,
भाव्यं बादर-सूक्ष्मसर्वभविनां रक्षापरेणाऽध्वनि ॥ ४१

तथा-वेश्यादर्शनमात्रतो बत नृणां स्नानेन शुद्धिर्मता,
जल्पन्तीति कुलिङ्गिनोऽपि दमिनां वाक्येषु किं भण्यते ? ।
तस्मात् तीर्थपथे त्यजन्तु भविका वाराङ्गनानर्त्तनं,
चित्तं मन्मथमिश्रितं भवति तद् यात्राफलं हन्यते ॥ ४२

जन्तू रज्यति रूपदर्शनरसाद् जागर्ति कामः पुनः
पुंश्चिह्नं श्रवति क्रमादशुचिता सङ्गीतकालोकनात् ।
इत्येनः प्रसरीसरीति विविधं प्रायेण धर्मच्छलात्,
सङ्घे वारवधूनिमन्त्रणमहो ! तस्माद्(न्)न युक्तं खलु ॥ ४३

कार्यं नैव निजप्रियादिभिरपि स्त्रीभिश्च काभिः समं,
हास्यं मोहविवर्द्धनं समदृशा यात्राविधिं तन्वता ।
स्थातव्यं स्थिरमुद्रया चपलतात्यागेन पुण्यात्मना,
तीर्थस्योत्कलिकापरायणधिया सिद्धिं परामिच्छता ॥ ४४

आदिशब्दात् - 'प्रजावती'- मातुलपत्नी 'श्याली'-श्यालकपत्नीप्रभृति-ग्रहणम् । तथा ऽन्याभिः सुरूप-नवयौवनोन्मदाभिः साद्भुतशृङ्गाराभिर्विलासिनीभि-र्बालरण्डाभिः, कुलटादिभिः सार्द्धम् ।

आरम्भत्यजनेन पर्वदिवसे कार्यं न साधर्मिक-
वात्सल्यं यदवारितान्नपचनं नाऽधित्यकायां शुभम् ।
वस्त्रापूतजलेन धावनमिदं वस्त्रव्रजस्योचितं,
यात्रायां त्रसजन्तुवारिणि पयःपानं न चोक्षां वरम् ॥ ४५

ये तीर्थे मल-मूत्र-मैथुनरताः स्तब्धा मिथो द्वेषिण-
स्तानाश्लिष्यति वज्रलेपसदृशं पापं महादुःखदम् ।

तेनैनोभरभीरुणा यतनया त्याज्या दुराशातना,
यस्माद् वाञ्छितशर्मसन्ततिरसास्वादो भवेत् सर्वदा ॥ ४६

वस्त्रापूतजले नदीप्रभृतिके स्नानां-शुकक्षालनाद्
वर्षाचङ्क्रमणेन जन्तुनिवहारम्भेण नानाविधम् ।
मिथ्याधर्ममतिः प्रभूतदुरितं चक्रेऽन्यतीर्थे जनः,
सर्वं शुद्ध्यति तद् यथोक्तविधिना जैनेन्द्रतीर्थे रयात् ॥ ४७

कृत्वा पाण्डुसुताः स्वगोत्रकदनं तीर्थस्य माहात्म्यतः,
सिध्यन्ति स्म तपो विधाय नचिरात् शत्रुञ्जये सव्रताः ।
अत्राऽन्येऽपि च कण्डुराट् प्रभृतयः सिद्धाः महत्पातकाद्,
ब्रूमस्तस्य कियत् स्वरूपमपरं तीर्थाधिपस्याऽऽश्रयात् ॥ ४८

बाल-स्त्री-वधबन्धनादिजनितं कर्माऽशुभं चिक्कणं,
प्राप्नोति प्रलयं जले लवणवत् तीर्थस्य सेवावशात् ।
दुष्टं चाक्रिकपोतकश्मलनिभं तीर्थेऽत्र यद् यत् कृतं,
चीडीभूय लगेत् तदुत्थविपदां भूयश्चिकित्सा न हि ॥ ४९

धन्योऽसौ धनपालपण्डितवरः श्रीब्रह्मवंशोद्भवः,
श्राद्धत्वेन न यस्य कोऽपि करणिः श्रीभोजराज्येऽभवत् ।
प्रान्ते येन कृता चिरं गिरिवरे सेवा तथा यत्कृता-
ऽद्यापि श्रीऋषभार्हतो निरुपमा पञ्चाशिका वर्त्तते ॥ ५०

प्राग् नन्दीअकधाम्नि नन्दिवद्र्धननृपप्रासादजीर्णोद्धृतिं,
यश्चक्रे किल मञ्जरीं तिलकतश्चम्पूकथां सप्रथाम् ।
जिग्ये येन च नास्तिको गुरुयतः(तिः) खण्डप्रशस्तौ यश-
स्तत्त्वज्ञं धनपालपण्डितपतिं तं वर्णयामः कियत् ॥ ५१

सिद्धान्तश्रुतिजागरूकहृदयः श्रीशासनोद्योतकः,
शुद्धध्यानपरो यथाविधि बुधः श्रीसिद्धक्षेत्रं प्रति ।
सङ्घं सङ्घपतिः प्रकाशयति यो विश्वत्रयाह्लादकं,
सोऽर्हत्त्वं लभते नरामरमहद्राज्येन्दिरापूर्वकम् ॥ ५२

अथ सुकलत्रोक्तिः-
निन्द्यैर्भोगसुखैर्विपाककटुभिस्त्वं केन लोलुभ्यसे,
सन्तानादिसमस्तवस्तुनिचयं स्वप्नेन्द्रजालोपमम् ।
मत्वा कल्मषघातिनीं प्रिय ! कथं यात्रां न तंतन्यसे,
इत्येवं सविवेकिनी सहचरी भर्त्तारमुत्साहयेत् ॥ ५३

तीर्थं पुष्पवती जडा स्पृशति चेत् तस्या महत्पातकं,
नित्यक्षेमकृते सुधीः शुचिवपुस्तीर्थं समारोहति ।
अन्तःशल्यचयं कृती प्रकटयेद् यत्र प्रियालोरध-
स्तीर्थाशातनभीरुणोपरि चितादाहो न कार्यः कदा ॥ ५४

मन्यन्ते क्षुरकर्मणा स्वमधिकं ये मानयन्ति स्वयं,
भोगाद्यैहिककार्यसाधनकृते गृह्णन्ति चाऽभिग्रहम् ।
संस्कारं मृतकस्य चाऽस्त्रनयनं कुर्वन्ति तीर्थेऽर्हतां,
मिथ्यात्वं तदनेकधातिविषमं लोकोत्तरं त्यज्यताम् ॥ ५५

कुव्यापारि-कुठक्कुरा अकरुणा ये देवलोकादयो,
देवार्थानुपजीवयन्त्यनयतः सङ्घातिरैग्राहकाः ।
पापाः शश्वदभक्ष्यभक्षणरता उन्मार्गगास्तेन वै,
ते वारान् कति दुर्गतिप्रणयिनो जानाति तत् केवली ॥ ५६

क्षुत्-तृट्बाधितखिन्नसाधु-श्रमणी-सत्क्षुल्लक-क्षुल्लिका-
शुश्रूषां विदधत् कुटुम्बनिचये निःसारसारां पुनः ।

गव्य-श्वा-वृष-सेरभी-करभकस्तोमस्य चिन्तां वहन्
सङ्क्लेशश्चलतीति तीर्थगमने दक्षः स यद् गीयते ॥ ५७

ये दामोदर-कालमेघ-शरभू-सोमेश्वरः- द्वारका
तीर्थं फल्गु सरस्वतीप्रभृतिकं कुर्वन्ति मिथ्यादृशः ।
केचिद् यक्षकपर्दिपूजनरताः श्रीअम्बिकायास्तथा,
नेत्थं शाश्वतसम्पदे विधिरयं श्रीजैनयात्रार्थिनाम् ॥ ५८

वासो मोदकसिंहकेसरवरेषूच्चैश्चतुर्जातकैः
सद्दुग्धे तव राजवर्य ! सितया रत्नैर्यथा काञ्चने ।
तद्वत् पुण्यभरेण वित्तनिचये योगः प्रशस्तोऽङ्गिना-
मेवं तीर्थवरे विशेषसुकृतं श्रीसर्ववित्पूजया ॥ ५९

कोऽहं ? कस्य कलत्र-पुत्र-सदनं ? कस्येन्दिराविस्तरो ?,
जीवानां मृगतृष्णिकेव सकला भ्रान्तिर्विदित्वेति यः ।
श्रीतीर्थद्वितयादि-नेमिजिनपौ देवौ ववन्दे नहि,
दग्धः सोऽपि करे गतोऽपि पृथुको हाहा ! मुधा तज्जनुः ॥६०

सद्वाचंयमपञ्चकोटिसहितश्चैत्रीयराकातिथौ,
प्राक् सिद्धोऽजनि पुण्डरीकगणभृत् ख्यातस्ततोऽयं गिरिः ।
नाम्ना पर्वतपुण्डरीक इति यस्तत्रोपवासं तदा,
निष्पानं विदधाति शुद्धमनसा त्याज्यः स उग्रैनसा ॥ ६१

निष्पानानि गुरोर्गिरा परिहृते स(आ?) हार-नि(नी)हारयोः,
स्पष्टः षष्टतपांसि सप्त कुरुते शत्रुञ्जयस्योपरि ।
धर्मध्यानपरोऽष्टमाष्टमयुतान्येतन्महातीर्थभू-
माहात्म्येन तृतीयजन्मनि कृती स प्राप्नुयान्(द्) निर्वृतिम् ॥६२

भो भो ! भव्याश्चेत् संसारात् पन्तातङ्कादुद्विग्ना
भूयो नित्योद्योते नित्याह्लादे मोक्षे संविग्नाः ।
तर्हीदानीं व्यापद्हत्रीं(त्रीं) सद्रीत्या सान्द्रामोदाः,
श्रेयः कर्त्रीं श्रीसिद्धक्षेत्रे यात्रां कुर्वन्तु द्राक् ॥(कामक्रीडाः)६३

उत्तुङ्गभृङ्गचटुलध्वजशोभितेषु, देवालयेषु जिनबिम्बविभूषितेषु।
सुस्यन्दनेषु वरचामरवीजितेषु सिद्धाचले चलति सङ्घपतिः
ससङ्घः (वसन्तः) ॥ ६४

स्थाने स्थाने स्नात्रविस्तारकारी वाद्यध्वानैर्गीतगानैश्च नित्यम् ।
मार्गे शोभां शासनस्य प्रकुर्वन्, सङ्घाध्यक्षो याति पारं भवस्य ॥
(शालिनी) ६५

वात्सल्य-सङ्घपरिधापनिके विधत्ते,
मानोचितं च जिनशासनगायनानाम् ।
चन्द्रावतंसनृप-कार्त्तिकश्रेष्ठितुल्यः,
श्राद्धो भवेत् सुगुरुशिक्षितसद्विवेकः ॥ (वसन्तः) ६६

ज्ञात्वा सङ्घं चलन्तं तदनु सरभसा धाविता धाविता ये,
धाटीवाहा इवाऽज्ञा विकशि(सि)तवदना यान्ति यात्रामिषेण ।
दीक्षातत्त्वानभिज्ञा विविधजनसमूहप्रवाहे वहन्तः,
साध्वाभासाश्चिरं ते भवजलधिगता दुःखभाजो भवन्ति ॥ ६७
(स्रग्धरा)

रात्रौ चङ्क्रमणं तुषार-महिका-प्रोज्झेहिकानां हरित्-
कायानां च विराधना घनघना स्पर्शस्तरूणां बहुः ।

ताः पञ्चाऽपि विराधिताः समितयः स्युर्गुप्तयस्ता अपि,
साधूनां न चरित्रपालनमिदं सङ्घस्य सार्थे तथा ॥ ६८

वेलायां प्रतिलेखना न विधिना नाऽऽवश्यकं तादृशं,
शुद्धिः क्वाऽपि न चाऽन्नपानविषया नोपाश्रयः शुद्धिमान् ।
स्त्रीसङ्घट्टपरम्परोपकरणादेर्मोचनं वाहने,
बीजादिक्रमणं प्रसून-फल-पत्रा-ऽऽमान्न पूर्णेऽनसि ॥ ६९

इत्थं दोषशतोद्भवेन यतिनां पिण्डोंऽहसा भार्यते,
तेनाऽऽद्यं व्रतिनां मतं भगवती दीक्षैव तीर्थं गुरु ।
बाह्याडम्बरमोहिता मदमिताः प्रायो घनाः साम्प्रतं,
हा हूता बहुभिक्षवः कृशधियस्तेषां क्व यात्राफलम् ? ॥ ७०

लुब्धाः स्तब्धा लिङ्गिनस्तीर्थशृङ्गे,
पूज्यां(जां) मिथ्या स्वस्य ये स्वापतेयैः ।
पूर्वाचार्याकारितां कारयेयु-
रात्मानं ते दुर्गतिं ही नयन्ति ॥ (शालिनी) ७१

पात्रीभूय गृहस्थतारणमिषाद् दानं न तीर्थोपरि,
ग्राह्यं संयमिनाऽतिदुर्जरमिदं पानान्नवस्त्रादिकम् ।
यात्रैषा विशदा कृता गुरुतरश्रेयःप्रदात्री ततो,
राग-द्वेषं(ष)जयाद् यथाविधि जना अस्यां त्वरन्तां मुदा ॥७२

आचाम्लादितपःक्रियापरतया श्रीहेमसूरिर्यथा,
यात्रायां किल सिद्धराजनृपतेः सार्थे चचालाऽऽग्रहात् ।
इत्थं कार्यविशेषतो यदि मुनिः सङ्घे चरेज्जातुचिद्,
यात्रा सैव तु पारलौकिकफला तन्निर्जरायै मता ॥ ७३

अक्षो–दञ्चक कम्बलो–र्णवसन–प्रत्यग्रपात्रादिक–
मूर्च्छा–मेलन–लोभ–हास्य–विकथा–चापल्यमुक्तो यतिः ।
सत्कारादिगुरुत्वगारवजयी धर्मोपदेशोद्यतः,
क्षुत् तृष्णा तप शीतकष्टसहनः सङ्घे निरीहश्चरेत् ॥ ७४

यात्रातो निजगेहमागतवता श्राद्धेन साधर्मिक–
वात्सल्यं जिन–साधुपूजनविधिः कार्यः स्वशक्त्या पुनः ।
निर्ग्रन्थस्य यथा तपः प्रविततं मुख्यं तथा गेहिनो,
दानं मुख्यतया जगाद भगवानित्थं विभाव्यं सता ॥ ७५

इत्थं शुद्धपरोपकारमतिना मार्गानुसारान्मया,
श्रीशत्रुञ्जय–रैवताचलमहत्तीर्थद्वयोल्लासिनी ।
यात्रासप्ततिका विवेकि–सरलप्राणिप्रिया भाषिता,
भाषा–ग्ला–विषु–भूसमासु रचिता भूयात् सतां प्रीतये ॥ ७६

साधुमेरुगणिपण्डितमिश्रा दूरतः कृतकुमार्गतमिश्राः ।
उक्तवन्त इति तीर्थविचारं, भावतो हृदि विदन्तु विनेयाः ॥७७
(उपचित्रा)

राजगच्छीयधर्मघोषवंशीय श्रीहरिकलशयतिविरचिता

## ४०. ॥ श्रीमेदपाटदेश-तीर्थमाला ॥

चतुर्विंशतिं तीर्थनाथान् प्रणम्य, स्वयं दृष्टतीर्थस्मृतेर्जातहर्षात् ।
विचिन्त्य स्वचित्ते महापुण्यलाभं,
स्तुवे तीर्थमालां विशालां रसालाम् ॥ (भुजङ्गप्रयात) १

सश्रीदै(कै?)रसुरैः सेव्यः सवासवसुरैर्नरैः ।
स मे यच्छतु नैर्मल्यं संयमाराधने जिनाः ॥ (अनुष्टुप्) २

आदौ सम्प्रति राजकीर्तननथो (मथो) नागहृदेशार्चितं
स्वप्नात् श्रीनवखण्डनामविदितं श्रीपार्श्वनाथं जिनम् ।
वाग्देवीं वच जिनेन्द्रदिव्यभवनेष्वेकादशस्वन्वहं,
शान्त्यादीश्वरवीरमुख्यजिनपान् वन्दे त्रिकालं त्रिधा ॥ ३

श्रीमद्देवकुलादिवा(पा?)टकपुरे रम्ये चतुर्विंशति-
प्रासादैर्वरहेमदण्डकलशैः सद्बिम्बपूर्णान्तरैः ।
श्रीवीरम् ऋषभादिकान् जिनवरांस्तीर्थावतारानपि,
श्रीशान्तिं गुरुधर्मसूरिविनुतं वन्दे सदा सुप्रभम् ॥ ४

आघाटे जलकुण्डमण्डितपदे विद्याविलासास्पदे,
माकन्दालि-प्रियाल-चम्पक-जपा-सत्पाटलासङ्कुले ।
वामेयादिजिनालयेषु दशसु श्रीआदिदेवादिकान्,
वीरान्तान् जिननायकाननुदिनं नौमि त्रिसन्ध्यं मुदा ॥ ५

....शताद् विक्रमवत्सरे स्थितं,
श्रीईशपल्लीपुरभिश्चेलासेनं (? चेलासनम्) ।
श्रीआदिदेवं बहुभिश्चिरन्तनै-
र्बिम्बैः समेतं प्रणमामि सन्ततम् ॥ (इन्द्रवंशा) ६

मज्जापद्रे विषमगिरिभिर्दुर्गमे ग्रामवर्ये
द्वापञ्चाशद्वरजिनगृहैर्वेष्टिते चारुचैत्ये ।
श्रीवामेयं प्रमुदितमना नौमि सर्वैर्जिनेन्द्रैः
श्रीमत्शान्तिं बहुजिनयुतं ग्रामके खागहड्याम् ॥(मन्दाक्रान्ता)७

ग्रामे पद्राटकाह्वे वरजिनभवने स्वामिनं वर्द्धमानं,
स्वर्णाभं पार्श्वदेवं त्रिगुणवसुजिनै–२४र्मण्डितं तोरणस्थैः ।
नत्वा चान्यैर्जिनेन्द्रैः परिधिपरिगतैः शोभमानं सुभक्त्या
नित्यं चैत्ये द्वितीये जिनततिसहितं पार्श्वनाथं नवीमि ॥ ८
(स्रग्धरा)

मत्स्येन्द्रपुरे पार्श्वं शान्त्यादीशादि बहुजिनान् वन्दे ।
पंकिल डभरशामलदलोपम...........तुरे ? वीरम् (?) ॥ ९
(आर्या)

गिर्यन्तरे कपिलवाटकराजधान्यां,
प्रोद्भासिराजभवनोत्सवशोभितायाम् ।
प्रोत्तुङ्ग–पञ्च–जिनवेश्मसु नेमिपार्श्व–
मुख्यान् जिनान् प्रतिदिनं प्रणमामि सर्वान् ॥(वसन्तति.) १०

वैराटापरनाम्नि वर्धनपुरे तुङ्गाद्रिपुण्यार्हतां,
सैकद्वादशदेवमन्दिरमहैर्विभ्राजिते नित्यशः ।
श्रीआदीशजिनादिबिम्बनिवहं, वन्दामि भक्त्या ततो,
मन्दारी खदुरोतुदेवसदने वामेयमुख्यान् जिनान् ॥(शा.वि.)११

पुरे पञ्चदेवालयश्रीजिनेन्द्रान्
सदा नौमि नेमीश–मुख्यानशेषान् ।

पुरे माण्डिलग्रामवासं जिनौघं
सरूपाष्टहस्तोन्नतं शान्तिदेवम् ॥ (भुजङ्गप्रयात) १२

प्रज्ञाराजिमण्डलकरे दुर्गरम्ये
युगादीश-चन्द्रप्रभौ शान्ति-पार्श्वम् ।
महावीरमुख्यार्हतो नौमि सर्वान्
एव स्नात्रदृश्व जिनं विन्ध्यपल्याम् (?) ॥(भुजङ्गप्रयात) १३

दुर्गे श्रीचित्रकूटे वनविपिनझरन्निर्झराद्युच्चशाले,
कीर्तिस्तम्भाम्बुकुण्डद्रुमसरलसरोनिम्नगासेतुरम्ये ।
पार्श्वं श्रीसोमचिन्तामणिमपरजिनान्नौमि नाभेयमुख्या-
नेवं द्वाविंशतौ श्रीजिनपतिभवनेष्वेकचित्तः समग्रान् ॥ १४
(स्रग्धरा)

स्थाने श्रीकरहेटके जिनगृहे श्रीसम्प्रतीये पुरा,
विस्तीर्णे वसुवेददेवकुलिकाकीर्णे त्रिभूमण्डपे ।
रम्ये गर्भगृहालयस्थजिनपै२४र्वेदद्विसंख्यैः सदा,
वामेयं सहितं द्विसप्ततिजिनैरेवं मुदा नौम्यहम् ॥(शा. वि.)१५

सालेर-जाजपुर-मण्डल-चित्रकूट-
दुर्गेषु वारिपुर-थाणक-चङ्गिकासु ।
वि(वै)राटदुर्ग-वणहेडक-घांसकादौ
संस्थापितान् जिनवरान् गुरुभिः प्रणौमि ॥ (वसन्तति.) १६

प्रमोदास्पदं मुक्तिदं नाथमेकं, प्रजाभासि दर्भौकसि ग्रामरम्ये ।
प्रणम्रामरेशं युगादिं जिनेशं, प्रमादापहं भावतोऽहं नमामि ॥१७
(भुजङ्गप्रयात)

अणीहृदे शान्तरसामृतं हृदं, पार्श्वं जिनं पार्श्वसुरेण सेवितम् ।
हरिप्रपूज्यं हरिनीलदेहकं,
नित्यं स्तुवे नित्यपदे निवासिनम् ॥ (उपजाति) १८

नाम्नार्थेन च यापुरे वसुनौ(?) श्रीवर्धमानोदये,
देवार्यं वरपित्तलापरिकरं सत्तोरणोद्भासितम् ।
श्रीचन्द्रप्रभ(वासुपूज्य-वृषभ)श्रीशान्तिमुख्यानहं,
सप्त श्रीजिनमन्दिरेषु सततं संस्तौमि सर्वार्हतः ॥(शा.वि.)१९

अथ च डुङ्गहपुरादजयदुर्गावके,
शैलवलये स्तुवे घट्टसीमां जिनान् ।
ऋषभमीडरपुरे कुमरजिनमन्दिरे,
नौमि तलहट्टिकासर्वचैत्यानि च ॥ २०

तारणेऽजितजिनं कुमरचैत्ये स्थिरं
स्थापिते धर्मसूरिभिरहं संस्तुवे ।
एवमारास-पौसीन-देवेरिका-
चैत्रभावाद्रिचङ्गापुरादौ जिनान् ॥ २१

देशेऽस्मिन् मेदपाटे गिरिवरनिकटैः सङ्कुले मध्यभागे,
ग्रामे-ग्रामे विशाला बहुजिनकलिताः सन्ति मुख्या विहाराः ।
बाह्येप्येवं प्रभूता ध्वजकलशयुता भान्ति सर्वेषु तेषु,
दृष्टाऽदृष्टेषु नित्यं सकलजिनपतीन्नौम्यहं बोधिवृद्ध्यै ॥ २२
(स्रग्धरा)

देशे देशे नगर-नगरे ग्राम-ग्रामेऽचलादौ,
प्रासादा ये नयनपथगास्तेषु चान्येषु नित्यम् ।

अर्चाः सर्वा गुरुलघुतराः स्तौमि तीर्थेश्वराणां,
त्रैलोक्यस्था सुरनरनताः शाश्वताऽशाश्वताश्च ॥(मन्दाक्रान्ता)२३

इत्थं श्रीराजगच्छोदयगिरितरणेर्धर्मघोषस्य सूरे-
र्वंशे जातः सुभक्त्या हरिकलशयतिस्तीर्थयात्रां विधाय ।
नित्यं स्मृत्यै जिनानां विपुलतरलसद्भावपूर्णान्तरात्मा,
काङ्क्षन् पुण्यस्य वृद्धिं प्रमुदित-
मनसा तीर्थमालां स्तवीति ॥ (शार्दूलविक्रीडित) २४

पू.मु.श्री कल्याणसागरविजयविरचिता

## ४१. ॥ श्रीतीर्थवन्दना ॥

(स्रग्धरा)

सद्भक्त्या देवलोके, रविशशिभवने, व्यन्तराणां निकाये,
नक्षत्राणां निवासे, ग्रहगणपटले तारकाणां विमाने ।
पाताले पन्नगेन्द्र-स्फुटमणिकिरण-ध्वस्तसान्द्रान्धकारे,
श्रीमत् तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥ १

वैताढ्ये मेरुशृङ्गे रुचकगिरिवरे कुण्डले हस्तिदन्ते,
वक्खारे कूटनन्दीश्वरकनकगिरौ, नैषधे नीलवन्ते ।
चित्रे शैले विचित्रे यमकगिरिवरे, चक्रवाले हिमाद्रौ,
श्रीमत् तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥ २

श्रीशैले विन्ध्यशृङ्गे विमलगिरिवरे, ह्यर्बुदे पावके वा,
सम्मेते तारके वा, कुलगिरिशिखरेऽष्टापदे स्वर्णशैले ।
सह्याद्रौ वैजयन्ते, विपुलगिरिवरे गूर्जरे रोहणाद्रौ,
श्रीमत् तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥ ३

आघाटे मेदपाटे, क्षितितटमुकुटे, चित्रकूटे त्रिकूटे,
लाटे नाटे च घाटे, विटपिघनतटे, देवकूटे विराटे ।
कर्णाटे हेमकूटे विकट-तरकटे, चक्रकूटे च भोटे,
श्रीमत् तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥ ४

श्रीमाले मालवे वा, मलयिनि निषधे, मेखले पिच्छले वा,
नेपाले नाहले वा, कुवलयतिलके, सिंहले केरले वा ।
डाहाले कोशले वा, विगलितसलिले, जङ्गले वा तमाले,
श्रीमत् तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥ ५

अङ्गे वङ्गे कलिङ्गे सुगतजनपदे सत्प्रयागे तिलङ्गे,
गौडे चौडे मुरण्डे वरतरद्रविडे, उद्रियाणे च पुन्द्रे ।
आद्रे माद्रे पुलिन्द्रे, द्रविडकुवलये, कान्यकुब्जे सुराष्ट्रे,
श्रीमत् तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥ ६

चम्पायां चन्द्रमुख्यां, गजपुरमथुरा-पत्तने चोज्जयिन्यां,
कौशाम्ब्यां कौशलायां कनकपुरवरे देवगिर्यां च काश्याम् ।
नाशिक्ये राजगेहे, दशपुरनगरे भद्दिले ताम्रलिप्त्यां,
श्रीमत् तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥ ७

स्वर्गे मर्त्येऽन्तरिक्षे, गिरिशिखरद्रहे, स्वर्नदी नीरतीरे,
शैलाग्रे नागलोके, जलनिधिपुलिने, भूरुहाणां निकुञ्जे ।
ग्राम्येऽरण्ये वने वा, स्थलजलविषमे, दुर्गमध्ये त्रिसन्ध्यं,
श्रीमत् तीर्थङ्कराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे ॥ ८

श्रीमन्मेरौ कुलाद्रौ, रुचकनगवरे, शाल्मलौ जम्बूवृक्षे,
चौज्जान्ये चैत्यनन्दे रतिकररुचके कौण्डले मानुषाङ्के ।

इक्षुकारे जिनाद्रौ, दधिमुखे च गिरौ, व्यन्तरे स्वर्गलोके,
ज्योतिर्लोके भवन्ति, त्रिभुवनवलये यानि चैत्यालयानि ॥ ९

इत्थं श्रीजैनचैत्य-स्तवनमनुदिनं, ये पठन्ति प्रवीणाः,
प्रोद्यत्कल्याणहेतुं कलिमलहरणं भक्तिभाजस्त्रिसन्ध्यम् ।
तेषां श्रीतीर्थयात्रा-फलमतुलमलं, जायते मानवानां,
कार्याणां सिद्धिरुच्चैः, प्रमुदितमनसां, चित्तमानन्दकारी ॥१०

पू.मु.श्री मेदचन्द्रविजयविरचितम्

## ४२. ॥ श्रीशिखरगिर्यष्टकम् ॥

(उपजाति)

नगाधिराजं सुरराजसेवितं, शिवैकमार्गं सुखसन्ततिप्रदम् ।
अघेभमालाहरणे मृगाधिपं, सम्मेतशैलं प्रणमामि भक्तितः ॥१

जगत्त्रयीपावनकारकं सदा, सन्तापदावानलवारिवाहकम् ।
अनेकवृक्षावलिभिर्विराजितं, सम्मेतशैलं प्रणमामि भक्तितः॥२

भव्याङ्गिनां सातसमूहदायकं, सद्वर्णतो निर्जितमेघमालकम् ।
सत्पुष्पजालेन सुगन्धभूतकं सम्मेतशैलं प्रणमामि भक्तितः ॥३

जिनेन्द्रसद्विंशतिशसंयुतं वरं, समाश्रितं साधुजनैः सुखावहम्।
उत्तुङ्गताव्योमगणावलम्बिनं, सम्मेतशैलं प्रणमामि भक्तितः ॥४

नरेन्द्रवृन्दैर्बहुधा सुपूजितं, तीर्थेषु वर्यं महिमालयं शुभम् ।
भावारिसङ्घातविनाशनक्षमं, सम्मेतशैलं प्रणामि भक्तितः ॥५

सर्वार्थसंसाधनकल्पपादपं, सुभूरिचिन्ताहरणे मणिप्रभम् ।
भवाब्धिसन्तारणयानपात्रकं, सम्मेतशैलं प्रणमामि भक्तितः ॥६

प्रचण्डसिंहादिभयान्तकारकं, नद्यादिसंशोभितपार्श्वमण्डलम् ।
पदे-पदे निर्जरपङ्क्तिशोभितं, सम्मेतशैलं प्रणमामि भक्तितः॥

सुशर्मदं सिद्धिकरं यशस्विनं, गुणाकरं भव्यविकाशकारकम् ।
अमोघशक्तिं सकलार्थभाजनं, सम्मेतशैलं प्रणमामि भक्तितः॥ ८

(अनुष्टुप्)

नन्दर्षिवसुचन्द्राब्दे(१८७९), माघे कृष्णदले शुभे ।
सप्तमीकर्मवाट्यां च, स्तुतः सम्मेतपर्वतः ॥ ९

वाचनाचार्यवर्यस्य, रामचन्द्रजितः सदा ।
शिष्यज्ञो मेदचन्द्रेण, श्रीसङ्घेण समं मुदा ॥ १०

## ४३. ॥ श्रीसम्मेतशिखरगिरिचैत्यवन्दनम् ॥

सद्विंशतिः श्रीजिननायकानां, सम्मेतशैले प्रवरे गिरीन्द्रे ।
निर्वाणमार्गं जगदुत्तमं वै,
शुद्धात्मनामाश्रयमग्र्यभूतम् ॥ (इन्द्रवज्रा) १

सुनेमिनाभेयसुवर्धमानसुवासुपूज्यं च विनैव लेभे ।
सुपूज्यसौभाग्यगणाधिपैर्या,
सुवन्दिता सा वरभक्तिभाग्भिः ॥ (उपेन्द्रवज्रा) २

*प्रतिसनु (?) पदे दत्ते, जातो मे हर्षनिर्झरः ।*
तं च जानाति सर्वज्ञो, नान्यो वेदयितुं क्षमः ॥ (अनुष्टुप्) ३

## ४४. ॥ श्रीसम्मेतशिखरगिरितीर्थपतीनां स्तुतिः ॥

(शार्दूलविक्रीडित)

स्मृत्वाऽहं शिखरेऽजितं गुणमितं तूर्यं सदा पञ्चमं,
षष्ठं सत्तमसप्तमाऽष्टमजिनं श्रीपुष्पदन्ताभिधम् ।
वर्य्यं श्रीदशमं गणाधिपसमं बर्हिःककुत्सम्मितं,
चाऽनन्तं दशपञ्चमं जिनवरं श्रीशान्तिनाथं मुदा ॥ १

श्रीकुन्थुं जगदुत्तमाऽरकपतिं श्रीमल्लिनाथं वरं,
वल्गुश्रीमुनिसुव्रतं नमिजिनं श्रीपार्श्ववामाङ्गजम् ।
ईडे देवनरेन्द्रवृन्दमहितं सत्साधुभिः सेवितं,
चेत्थं विंशतिमर्हतां प्रतिदिनं श्रेयस्करीं सर्वदा ॥ २

## ४५. ॥ श्रीअपापापुरीकल्पः ॥

(स्रग्धरा)

सिद्धार्थोक्त्या वनान्ते खरकसुभिषजाभ्यञ्जनद्रोणिभाजः,
शल्ये निष्क्रि(ष्कृ?)ष्यमाणे श्रुतियुगविवरात्तीव्रपीडार्दितस्य ।
यस्या अभ्यर्णभागेऽन्तिमजिनमुकुटस्योद्यदाश्चर्यमुच्चै-
श्चञ्चच्चीत्काररावस्फुटित गिरिदरी दृश्यतेऽद्यापि पूरः ॥ १

चक्रे तीर्थप्रवृत्तिं चरमजिनपतिर्यत्र वैशाखशुक्लै-
कादश्यामेत्य रात्रौ वनमनु महसेनाह्वयं जृम्भिकातः ।
सच्छात्रास्तत्र चैकादशगणपतयो दीक्षिता गौतमाद्या,
जग्रन्थुर्द्वादशाङ्गीं भवजलधितरीं ते निषद्यात्रयेण ॥ २

यस्यां श्रीवर्धमानो द्व्यहमनशनकृद्देशनावृष्टिमन्त्यां,
कृत्वा श्रीहस्तिपालाभिधधरणिभुजोऽधिष्ठितः शुल्कशालाम् ।

स्वातावूर्जस्य दर्शे शिवमसमसुखश्रीनिशान्तं निशान्ते,
प्रापत्पापास्तपापान् विरचयतु जनान् सा पुरीणां धुरीणा ॥ ३

नागा अद्यापि यस्यां प्रतिकृतिनिलया दर्शयन्ति प्रभावं,
निस्तैले नीरपूर्णे ज्वलति गृहमणिः कौशिके यन्निशासु ।
भूयिष्ठाश्चर्यभूमिश्चरमजिनवरस्तूपरम्यस्वरूपा,
साऽपापा मध्यमादिर्भवतु वरपुरी भूतये यात्रिकेभ्यः ॥ ४

## ४६. ॥ श्रीसहस्रकूटस्तोत्रम् ॥

(इन्द्रवज्रा)

उत्कृष्टकाले विजयेष्वभूवन्, षष्ठ्युत्तराश्चन्द्रशतारिहन्ताः ।
दिक्क्षेत्रजाः कालत्रिकेण गुण्या,
विंशत्यधिकानि शतानि सप्त ॥ १

सीमन्धराद्या विहरन्ति ये च, विदेहजा विंशतितीर्थनाथाः ।
कल्याणकानि वृषभादिकानां, विंशत्यथाग्रैकशतानि चात्र ॥ २

(उपजाति)

श्रीवारिषेणो वृषभाननश्च चन्द्राननार्हत्प्रभुवर्द्धमानः ।
एतच्चतुः शाश्वतमूर्त्तयश्च, सन्त्युर्द्धलोकादिषु ताः स्तवीमि ॥ ३

एतज्जिनव्यूहमनन्तरोक्तं, शत्रुञ्जयाद्रेस्तु सहस्रकूटे ।
न्यस्तं स्तुतं तत्प्रददातु नित्यं, ज्ञानं समाध्युद्यममुत्तमं मे ॥ ४

# ४७. ॥ श्रीतीर्थमालाचैत्यवन्दनम् ॥

(शार्दूलविक्रीडित)

श्रीशत्रुञ्जयरैवताद्रिशिखरे द्वीपे भृगोः पत्तने
सिंहद्वीपधनेरमङ्गलपुरे चाज्जाहरे श्रीपुरे ।
कोडीनारकमन्त्रिदाहडपुरे श्रीमण्डपे चार्बुदे
जीरापल्लिफलर्दि्धपारकनगे शैरीसशङ्खेश्वरे ॥ १

चम्पानेरकधर्मचक्रमथुरायोध्याप्रतिष्ठानके
वन्दे स्वर्णगिरौ तथा सुरगिरौ श्रीदेवकीपत्तने ।
हस्तोडीपुरपाडलादशपुरे चारूपपञ्चासरे
वन्दे श्रीकरणावतीशिवपुरे नागद्रहे नाणके ॥ २

मेरौ कुण्डलमानुषे च रुचके वैताढ्यनन्दीश्वरे
वन्देऽष्टापदगुण्डरे गजपदे सम्मेतशैलाभिधे ।
विन्ध्यस्थम्भनशीट्टुमीट्टुनगरे राजद्रहे श्रीनगे
कुन्तीपल्लविहारतारणगढे सोपारकारासणे ॥ ३

द्वारावत्यपरे गढे मढगिरौ श्रीजीर्णवप्रे तथा
थारापद्रपुरे च वाविहपुरे कासद्रहे चेडरे ।
श्रीतेजल्लविहारनिम्बतटके चन्द्रे च दर्भावते
वन्दे सत्यपुरे च बाहडपुरे राडद्रहे वायडे ॥ ४

वन्दे नन्दसमे समीधवलके मर्ज्जादमुण्डस्थले
मोढेरे दधिपद्रकर्करपुरे ग्रामादिचैत्यालये ।
ज्योतिर्व्यन्तरकल्पवासिनिलये भौमेषु वा भूतले
ते सर्व्वेऽपि हि शाश्वतेतरजिनाः कुर्व्वन्तु वो मङ्गलम् ॥ ५

पू.आ. श्री तरुणप्रभसूरिविरचितम्

षडावश्यकबालावबोधवृत्ति–अन्तर्गतम्

# ४८. ॥ श्रीत्रैलोक्यशाश्वतजिनप्रतिमा–प्रमाण स्तोत्रम् ॥

(आर्या)

श्री ऋषभवद्‌र्धमानकचन्द्राननवारिषेण्यजिनचन्द्रान् ।
तद्भवनबिम्बमानानुकीर्त्तनेनैष संस्तौमि ॥ १

भवनपतिवानमन्तरतारकवैमानिकालयेषु वराः ।
त्रिद्वाराः श्रुतभणिताः प्रत्येकं पञ्चपञ्चसभाः ॥ २

जन्माभिषेकभूषा व्यवसिति सौधर्मनामिकास्तास्तु ।
मुखमण्डपादि मण्डपमणिपीठस्तूपवद्वाराः ॥ ३

स्तूपे स्तूपे दिशि दिशि प्रतिमैकैकास्तिस्तदनु पीठगतौ ।
धर्मध्वजचैत्यतरू प्रवरजला तदनु पुष्करिणी ॥ ४

भवनपतीनां मध्ये मणितोरणकलसकेतनछत्रैः ।
चैत्यानि सन्ति कोट्यः सप्तद्वासप्ततिर्लक्षाः ॥ ५

त्रिद्वाराणि सुरत्नस्तम्भसहस्रोच्छ्रितानि चैत्यानि ।
एषु मुखमण्डपाद्यं सभावदुक्तं श्रुते सर्वम् ॥ ६

द्वात्रिंशदुच्चभावे पञ्चाशद्योजनानि दीर्घत्वे ।
प्रथिम्नि च पञ्चविंशतिरेतेषां मानमसुरेषु ॥ ७

तन्नेमिप्रमितानि तु नागादिषु नवसु तानि भणितानि ।
तन्मध्ये प्रत्येकं प्रतिमा अष्टोत्तरं च शतम् ॥ ८

षष्टिः सभासु पञ्चसु विंशं शतमस्ति जिनगृहेष्वेवम् ।
भवने भवने वन्दे प्रतिमानां शतमशीत्यधिकम् ॥ ९

त्र्यधिकानि च दशकोटी शतानि सैकोननवति कोटीनि ।
लक्षाणि षष्टिमेवं नमामि भवनेषु बिम्बानाम् ॥ १०

क्रोशाधिक षड्योजन पृथूनि तद्विगुणितायतानि तथा ।
नवयोजनोन्नतानि व्यन्तरनगरेषु चैत्यानि ॥ ११

त्रिमुखान्यमितानि पुनर्वदन्ति चैत्यानि पूर्वमुनिवृषभाः ।
ज्योतिर्व्यन्तरकाणां सुराजधानीषु चेदृंशि ॥ १२

ज्योतिष्केषु विसंख्या जिनालयास्त्रिदशमालया महिताः ।
तेष्वप्यसंख्यसंख्याः संख्यावद्भिः स्तुताः प्रतिमाः ॥ १३

दशकल्पनिवासीन्द्राश्चत्वारिंशच्च लोकपालसुराः ।
शक्रेशानमहिष्यः षोडश तद्राजधानीषु ॥ १४

द्विर्दश भवनपतीन्द्रास्तद्देव्योष्टादशोत्तरं च शतम् ।
तदशीति लोकपालास्तेषामपि राजधानीषु ॥ १५

नन्दीश्वररुचकादिषु शतद्वयं चतुरशीति संयुक्तम् ।
स्वविमानभुवनजिनगृहसमानमञ्चामि चैत्यानाम् ॥ १६

नन्दीश्वरे द्विपञ्चाशद्रुचके कुण्डले च चत्वारि ।
योजनशतपञ्चाशद्द्वासप्तति दीर्घपृथुलोच्चाः ॥ १७

जिनभुवनषष्टिरेषा चतुर्मुखा तदपरे त्रिमुखा ।
उभयत्र प्रतिवक्त्रं मुखमण्डप मुख्यषट्कं च ॥ १८

त्रिमुखे चतुर्मुखेपि च चैत्ये वन्देऽष्टशतमिताः प्रमिताः ।
स्तूपाश्रितास्तु वक्त्रे द्वादशषोडश यथासंख्यम् ॥ १९

प्राच्यां सप्तविंशतिरर्च्चा ऋषभस्य चान्यतीर्थेशाम् ।
अन्यदिशासु क्रमतस्तथैकशः स्तूपगाः प्रतिमाः ॥ २०

मेरुष्वशीतिरेका वक्षस्कारेष्वशीतिरपरा च ।
वर्षनगेषु त्रिंशद्विंशतिरिभदन्तकेषु तथा ॥ २१

चत्वारि चेषुकारा चलेषु मनुजोत्तरे च चत्वारि ।
द्विशतीमष्टादश वा नमामि चैतानि चैत्यानि ॥ २२

एतेषामिदमुक्तं प्रमाणमिह योजनानि षट्त्रिंशत् ।
पञ्चाशदद्र्धपञ्चाशदुच्छ्रया यामपृथुतासु ॥ २३

दिग्गजचत्वारिंशत्सु मेरुचूलासु पञ्चसु दीर्घेषु ।
वैताढ्येषु च सप्ततिशतं च जम्बूतरावेकम् ॥ २४

तत्परिवेषे जम्बूशिखरिष्वष्टोत्तरं शतं च तथा ।
तद्बाह्ये वनषण्डे चाष्टौ दिग्विदिगवस्थानात् ॥ २५

अन्येषु नवसु चैतच्छाल्मलिमुख्येषु निखिलमवसेयम् ।
सप्तत्यधिकैकादशशतानि चैत्यानि कुरु दशके ॥ २६

काञ्चनगिरिषु सहस्रं त्रिशती साशीतिरस्ति कुण्डगता ।
विंशतिरिह यमकस्था सुवृत्तवैताढ्यगा सैव ॥ २७

पद्मादिषु वाशीतिर्गङ्गादिषु सप्ततिश्च चैत्यानि ।
स्थानकदशकस्थान्यपि समानि मानेन चेमानि ॥ २८

चत्वारिंशत्समधिकधनुश्चतुः पूर्वदशशतसमुच्चाः ।
क्रोशायामाक्रोशाद्र्धं पृथुला चैत्यमालेयम् ॥ २९

पञ्चशती त्रिसहस्री चैत्यानां सप्तदशयुता भूमौ ।
द्वाविंशतिः सहस्रा लक्षचतुष्कं शतद्वितयम् ॥ ३०

साशीति च बिम्बानां तिर्यग्लोके मयार्च्यते भक्त्या ।
कल्पेषु जिनावासा नन्दीश्वरचैत्यसमतुल्याः ॥ ३१

सप्तनवतिः सहस्राश्चैत्यानां चतुरशीतिलक्षाश्च ।
त्रियुक्तविंशित्यधिकाः सुरलोके तेषु बिम्बानाम् ॥ ३२

कोटीशतं द्विपञ्चाशत्कोट्यो लक्षकाश्चतुर्नवतिः ।
स सहस्रचतुश्चत्वारिंशत्षष्ट्यधिकसप्तशती ॥ ३३

कोट्योष्ट सप्तपञ्चाशल्लक्षाः पञ्चकं शतानां च ।
चत्वारिंशत्सहितं त्रिभुवनचैत्यावलिं वन्दे ॥ ३४

कनकमयी तनुयष्टिः करचरणनखादिकाः परेऽवयवाः ।
शाश्वतजिनबिम्बानां रक्तादिकवर्णरत्नमयाः ॥ ३५

मणिपीठोपरि देवच्छन्दः सिंहासनं च तस्योर्ध्वम् ।
पर्यङ्कासनसंस्था ऋषभसमाः शाश्वतप्रतिमाः ॥ ३६

पृष्ठे च्छत्रधराच्र्वा पाश्र्वे द्वे चामरग्रहे प्रतिमे ।
नागौ भूतौ यक्षौ कुण्डधरौ द्वौ प्रतिप्रतिमम् ॥ ३७

कोटिशतपञ्चदशकं द्विकचत्वारिंशतामिताः कोट्यः ।
लक्षाष्टा पञ्चाशत्साहस्री सप्तषष्टिश्च ॥ ३८

चत्वारिंशत्कलिता त्रैलोक्ये शाश्वतीरिमाः प्रतिमाः ।
नित्यं नमामि भक्त्या पराणि तीर्थान्यपि प्रमदात् ॥ ३९

प्रातः प्रमोदपुलकाङ्कित काययष्टि-
स्तोषास्रुवाहविमलीकृतहृष्टदृष्टिः ।
यः स्तोष्यते सकलशाश्वततीर्थराज-
स्तोमं गमिष्यति रमां स जिनाधिराजः ॥(वसन्ततिलका) ४०

इत्थं स्तुताः श्रुतसमाहितशान्तचित्तै-
र्विद्याधरैर्गणधरैरसुरैः सुरैश्च ।
त्रैलोक्यशाश्वतजिनप्रतिमाः समस्ता
मह्यं दिशन्तु तरुणप्रभयादृशं स्वाम् ॥ (वसन्ततिलका) ४१

पू.आ.श्री तरुणप्रभसूरिविरचितम्
षडावश्यकबालावबोधवृत्ति-अन्तर्गतम् ।

# ४९. ॥ श्रीशाश्वतजिनबिम्बस्वरूपनिरूपकं स्तोत्रम् ॥

(वसन्ततिलका)

तीर्थाधिनाथमृषभं विभु वर्द्धमानं,
चन्द्राननं समभिनम्य च वारिषेण्यम् ।
तेषां सनातनजिनायतनेषु बिम्ब-
रूपस्वरूपपरिकीर्त्तनमादधामि ॥ १

बिम्बानि पञ्चशतचापमितानि तेषा-
मुत्कर्षवन्ति विमलानि सुसंस्थितानि ।
पर्यङ्कमासनमितानि पराणि सप्त-
हस्तोच्छ्रितानि मुदितस्तदहं स्तुवानि ॥ २

तन्मूलगात्रलतिका कनकात्मिकास्ति
मौलेर्घटी प्रवरवज्रमयी चकास्ति ।
केशावनी कनककाम्यमयी प्रशस्ता
केशावरिष्टतररिष्टमयाः समस्ताः ॥ ३

भ्रूतारिकाक्षिपुटिकाः कलिरिष्टमय्यः
शोणास्ममिश्रकनकाणुमयी च नासा ।
स्वच्छात्मकस्फटिकरत्नमयाश्च दन्ता
दन्तच्छदाः परमविद्रुमरम्यरूपाः ॥ ४

स्मश्रूणि रिष्टमणिमर्म्मयानि जिह्वा-
श्रीवत्सतालुतलचूचकनाभिदेशाः ।

हस्तक्रमाम्बुजतलावलयश्च दीप्रा
जात्यप्रतप्ततपनीयमयाश्च तेषाम् ॥ ५

कामाङ्कुशा ललितलोहितलोहिताक्ष-
संगर्भिताङ्कमणिगर्भमयाः शुभन्ति ।
रोमावली वपुषि रिष्टमयी वरिष्ठा
विभ्राजते भगवतां सुषमा गरिष्ठा ॥ ६

पृष्ठे समस्ति कलितातपवारणार्च्वा
द्वे पार्श्वयोर्विमलचामरधारिके ते ।
द्वे स्वर्णकुण्डधरयोः करिणोरपि द्वे
द्वे यक्षयोश्च पुरतो वरभूतयोर्द्वे ॥ ७

इत्थं शाश्वतचैत्यबिम्बपटलीरूपस्वरूपं मया
सूत्रे साधुमतल्लिकाभिरभितः संकीर्तितं कीर्तितम् ।
येऽदः श्रद्दधते सदाभिदधते तेषां भवत्यन्तिके
तूर्णं श्रीतरुणप्रभाभिरुचितं श्रेयः परमुत्पुरम् ॥ (शा.वि.) ८

॥ इति शाश्वतजिनबिम्बस्वरूपनिरूपकं स्तवनं समाप्तमिति ॥

श्री नन्दीश्वरद्वीपसमेता श्रीत्रिभुवनस्थिता

## ५०. ॥ श्रीशाश्वतजिनप्रतिमास्तुतिः ॥

(विषमवृत्तम्)

त्रिदशपतिमुकुटतटगतमणिगणकरनिकरसलिलधाराधौतक्रम।
कमलयुगलजिनपतिरुचिरचिरबिम्बविलयविरहितनिलयान् ॥१

निलयानहमिह महसां सहसाप्रणिपतनपूर्वमवनौम्यवनौ ।
त्रय्या त्रय्या शुद्ध्या निसर्गशुद्धाण्विशुद्धये घनरजसाम् ॥ २

भावनसुरभवनेषु द्वासप्ततिशतसहस्रसंख्याऽभ्यधिकाः ।
कोट्यः सप्त प्रोक्ता भवनानां भूरितेजसां भुवनानाम् ॥ ३

त्रिभुवनभूतविभूनां संख्यातीतान्यसंख्यगुणयुक्तानि ।
त्रिभुवनजन-नयन-नमः प्रियाणि
भवनानि भौमविबुधनुतानि ॥ ४

यावन्ति सन्ति कान्तज्योतिर्लोकाधिदेवताभिनुतानि ।
कल्पेऽनेकविकल्पे कल्पातीतेऽहमिन्द्रकल्पानल्पे ॥ ५

विंशतिरथ त्रिसहिता सहस्रगुणिता च सप्तनवति प्रोक्ता ।
चतुरधिकाशीतिरतः पञ्चकशून्येन विनिहतान्यनघानि ॥ ६

अष्टापञ्चाशदतश्चतुःशतानीह मानुषे च क्षेत्रे ।
लोकालोकविभागप्रलोकनालोकसंयुजां जयभाजाम् ॥ ७

नवनवचतुःशतानि च सप्त च नवतिः सहस्रगुणिताः षट् च ।
पञ्चाशत्पञ्चवियत्प्रहताः पुनरत्र कोट्योऽष्टौ प्रोक्ताः ॥ ८

एतावन्त्येव सतामकृत्रिमाण्यथ जिनेशिनां भवनानि ।
भुवनत्रितये त्रिभुवनसुरसमितिसमर्च्यमानसत्प्रतिमानि ॥ ९

वक्षाररुचककुण्डलरौप्यनगोत्तरकुलेषुकारनगेषु ।
कुरुषु च जिनभवनानि त्रिंशदान्यधिकानि तानि षड्विंशत्या॥१०

नन्दीश्वरसद्द्वीपे नन्दीश्वरजलधिपरिवृते धृतशोभे ।
चन्द्रकरनिकरसंनिभरुन्द्रयशोविततदिङ्महीमण्डलके ॥ ११

तत्रत्याञ्जनदधिमुखरतिकरपुरुनगवराख्यपर्वतमुख्याः ।
प्रतिदिशमेषामुपरि त्रयोदशेन्द्रार्चितानि जिनभवनानि ॥ १२

आषाढकार्तिकाख्ये फाल्गुनमासे च शुक्लपक्षेऽष्टम्याः ।
आरभ्याष्टदिनेषु च सौधर्मप्रमुखविबुधपतयो भक्त्या ॥ १३

तेषु महामहमुचितं प्रचुराक्षतगन्धपुष्पधूपैर्दिव्यैः ।
सर्वज्ञप्रतिमानामप्रतिमानां प्रकुर्वते सर्वहितम् ॥ १४

भेदेन वर्णना का सौधर्मः स्नपनकर्तुतामापन्नः ।
परिचारकभावमिताः शेषेन्द्रा रुन्द्रचन्द्रनिर्मलयशसः ॥ १५

मङ्गलपात्राणि पुनस्तद्देव्यो बिभ्रति स्म शुभ्रगुणाढ्याः ।
अप्सरसो नर्तक्यः शेषसुरास्तत्र लोकनाव्यग्रधियः ॥ १६

वाचस्पतिवाचामपि गोचरतां संव्यतीत्य यत्क्रममाणम् ।
विबुधपतिविहितविभवं मानुषमात्रस्य कस्य शक्तिः स्तोतुम्॥१७

निष्ठापितजिनपूजाश्चूर्णस्नपनेन दृष्टविकृतविशेषाः ।
सुरपतयो नन्दीश्वरजिनभवनानि प्रदक्षिणीकृत्य पुनः ॥ १८

पञ्चसु मन्दरगिरिषु श्रीभद्रशालनन्दसौमनसम् ।
पाण्डुकवनमिति तेषु प्रत्येकं जिनगृहाणि चत्वार्येव ॥ १९

तान्यथ परीत्य तानि च नमसित्वा कृतसुपूजनास्तत्रापि ।
स्वास्पदमीयुः सर्वे स्वास्पदमूल्यं स्वचेष्टया संगृह्य ॥ २०

सहतोरणसद्वेदीपरीतवनयागवृक्षमानस्तम्भ- ।
ध्वजपङ्क्तिदशकगोपुरचतुष्टयत्रितयशालमण्डपवर्यैः ॥ २१

अभिषेकप्रेक्षणिका क्रीडनसंगीतनाटकालोकगृहैः ।
शिल्पिविकल्पितकल्पनसंकल्पातीतकल्पनैः समुपेतैः ॥ २२

वापीसत्पुष्करिणीसुदीर्घिकाद्यम्बुसंश्रितैः समुपेतैः ।
विकसितजलरुहकुसुमैर्नभस्यमानैः शशिग्रहर्क्षैः शरदि ॥ २३

भृङ्गाराद्वककलशाद्युपकरणैरष्टशतकपरिसंख्यानैः ।
प्रत्येकं चित्रगुणैः कृतझणझणनिनदवितघण्टाजालैः ॥ २४

प्रविवाञ्छत नित्यं हिरण्यमयानीश्वेरेशिना भवनानि ।
गन्धकुटीगतमृगपतिविष्टररुचिराणि विविधविभवयुतानि ॥२५

येषु जिनानां प्रतिमाः पञ्चशतशरासनोच्छ्रिताः सत्प्रतिमाः ।
मणिकनकरजतविकृता दिनकरकोटिप्रभाधिकप्रभदेहाः ॥ २६

तानि सदा वन्देऽहं भानुप्रतिमानि यानि कानि च तानि ।
यशसां महसां प्रतिदिशमतिशयशोभाविभञ्जि पापविभञ्जि ॥२७

मुनिप्रवर श्री विनयहंसगणिविरचितम्

## ५१. ॥ श्रीशाश्वतजिननामस्तोत्रम् ॥

जयकारसुपदमृषभं चन्द्राननवारिषेणयुगलमलम् ।
सन्न्यस्य वर्द्धमानं शाश्वतजिननामसन्नुतिं कुर्वे ॥(गीतिरियम्)१

( स्रग्धरा)

पातालावाससंस्थैर्भवनपतिसुरव्यन्तरैर्ज्योतिरीशैः,
स्वर्गोद्ध्वस्थानतिर्यग्ह्रदगिरिनगरद्वीपसुस्थैः सुराद्यैः ।
पूज्यन्ते यानि बिम्बान्यनुपमविधिना वर्द्धमानर्षभाद्यै,-
र्नित्यैर्दिग्मेयगोत्रैस्त्रिजगति मुदितैरर्हतां तानि वन्दे ॥ २

(स्रग्विणी)

शाश्वताह्वोदितं वर्द्धमानं जिनं सर्षभं वारिषेणं च चन्द्राननम् ।
आगमोक्त्यैकवर्णप्रतीकाकृतिं देवविद्याधरेन्द्रादिपूज्यं भजे ॥३

वर्द्धमानं चतुःसम्पदानन्त्यतः सर्षभं वारिषेणं सुधुर्यत्वतः ।
मन्दचन्द्राननं पापतापापहाप्यायकास्येक्षणात् सान्वयस्वाह्वयम्॥४

(स्वागता)

वारिषेणमुखशाश्वतनामध्येयपूज्यजिनमण्डितमूर्त्तीः ।
पूजयन्ति विधिना मुदिता ये ते जयन्तु विभवा भवितोऽमी ॥५

वर्द्धमानमृषभं जिनचन्द्रं वारिषेणमिति शाश्वतनाम्ना ।
स्तौति पूजयति संस्मरतीशं यः सदा स लभतेऽभिमताभाम् ॥६

(रथोद्धता)

वारिषेणमथ सैन्यवारिणां वर्द्धमानमखिलर्द्धिवृद्धिदम् ।
शस्तशस्तमृषभं श्रियः पदं सार्वचन्द्रमभितः श्रये भृशम् ॥ ७

(शिखरिणी)

महीखण्डे खण्डे घटितघटितानामघहृतां,
जिनानां मूर्त्तीनामपरभुवनस्थानसजुषाम् ।
पुनर्नित्यावस्थापरममहसां पूज्यपदवी,-
पदस्थानां तासां नवनमहनं चारु कुरुवे ॥ ८

शमाकाराः साराः किमिह सकलानन्दसदनो,-
दया किं साक्षात् किं शिवसुखरसास्वादनिधयः ।
त्रिलोक्यां श्रीअर्हत्प्रतिमिततितीः प्रेक्ष्य सुधियां,
निजप्रासादस्थामतिविततिरुत्प्रेक्षत इति ॥ ९

(मन्दाक्रान्ता)

मूर्त्तिस्फूर्त्तिं त्रिभुवनगतोत्तुङ्गचैत्यप्रतिष्ठां,
सर्वज्ञानां भवभयभिदां शाश्वताशाश्वतां ताम् ।

दृष्ट्वा के के चरणकरणज्ञानसद्दर्शनानां
लब्धिं लब्ध्वा शिवपदसुखाः सङ्गिनः स्युर्न भव्याः ॥ १०

भव्याभव्यप्रकृतिनिकषानन्दखेदोदयेन,
प्रोच्चैश्चिन्ताविषमविषयव्यापतापापहर्त्री ।
श्रीसम्यक्त्वप्रभवविभवोद्दीपिनीयं त्रिलोक्यां,
बिम्बश्रेणी जयतु जगदानन्दकन्दोज्झितानाम् ॥ ११

(हरिणी)

त्रिजगति ततामूर्त्तिस्फूर्त्तिर्जिनस्थितिसम्मता,
प्रबलबहुलक्लेशश्रेणीनिवारणकारणम् ।
भवभवभयाऽपाराकूपारतारणतत्परा,
प्रवहणमिवाविर्भूतं दीप्यते भुवनाद्भुतम् ॥ १२

त्रिभुवनजुषां बिम्बानामर्हतां सति दर्शने,
सकलकुशलं स्वाङ्गच्छयोदयत्यनुवासरम् ।
धृतिमतिविभुत्वाद्यं सर्वं परिच्छदतीहितं,
तदिदमिह किं चित्रं येनार्हतं सुखदं पदम् ॥ १३

(तोटकम्)

ऋषभादिकशाश्वतनाममहार्हतरूपविधेयसमस्तगुणम् ।
हृदये नु विधाय जिनप्रतिमा-
स्मरणाल्लभतेऽभिमतार्थपदम् ॥ १४

भुवनत्रयचैत्यजिनप्रतिमामहनस्मरणस्तवनप्रवणम् ।
भविकं भविकावलिकासकला
श्रयति प्रसभं भुवनाभ्युदितम् ॥ १५

(शालिनी)

विद्यातत्त्वं वर्द्धमानस्वरूपं श्रीणां सौधं चर्षभं वारिषेणम् ।
विश्वाभीष्टश्रेयसामेकबीजं ध्यायामीशं चन्द्रमानन्दकन्दम् ॥१६

श्रेयःश्रेणीवल्लयः संफलन्त्यानन्त्योपेतैः सत्फलैरुल्लसद्भिः ।
तेषां येषां शाश्वतश्रीजिनाह्वा-
ह्वानध्यानं दीप्यते दीप्तिदीप्रम् ॥ १७

एवं शाश्वतसार्वनाममहिमस्तोत्रं पवित्रं मुदा,
कृत्वा तत्त्वसतत्त्वबोधिविधिदं याचे तथा तत्पुरः ।
विद्यानन्दविवेकहर्षविनयश्रीसूरितोजा यथा,
त्रैलोक्योदितधर्महंसललताभोगो भवेयं वरम् ॥ १८

पू.मु.श्री देवविजयगणिविरचितम्

## ५२. ॥ श्रीशाश्वतजिनस्तोत्रम् ॥

(अनुष्टुप्)

श्रीमज्जिनर्षभाऽपारराजमानयशोभर ! ।
जगत्त्रयजनाधार ! विजयस्व क्षमाधर ! ॥ १

जय चन्द्राननाऽमार ! यतीन्द्रगुणभासुर ! ।
सूक्तसन्मण्यकूपार ! रिक्तदोष ! गुणाकर ! ॥ २

विद्वारिषेण ! सद्वीर ! नेतर्नतसुराऽसुर ! ।
यतेन्द्रिय ! महःसार ! पङ्कजाक्ष ! समुद्धर ॥ ३

देवेन्द्रनतकोटीर ! वद्र्धमान ! जिनेश्वर ! ।
विद्वत्श्रेणिशिरोहीर ! जय त्वं परमेश्वर ! ॥ ४

यशस्विन् ! पुण्यसम्भार ! कृत्योज्झित ! जयाऽजर ! ।
तनूकृतस्वकर्मार ! परब्रह्मकृतादर ! ॥ ५

रोषपञ्चकपूत्कारपटीयः ! कामशङ्कर ! ।
कायरुग्जितखर्जूर ! राजप्रणतगोहिर ! ॥ ६

यजमानसुधाहार ! चरित्रमुदितामर ! ।
रिक्तमोहादिकर्मार ! तत्त्वदानं समाचर ! ॥ ७

कौसुमस्रक्सुगन्धोरः ! तेजोभृतदिगन्तर ! ।
यादःपतिसुगम्भीर ! नामाऽस्मरमनश्वर ! ॥ ८

## ५३. ॥ श्रीशाश्वताऽशाश्वताजिनस्तवनम् ॥

(भुजङ्गप्रयात)

चतुर्विंशतीहार्हता वन्दिताश्चा-,
धुना संस्तविष्ये त्रिलोके विलोकाः ।
चतुर्धाभिधाः सद्गुणालङ्कृतेभ्यो,
नमामि मुदा शाश्वताऽशाश्वतेभ्यः ॥ १

सुधर्मादिके ताविषे चैत्यमाला,
तथा चान्तिमेनुत्तरेऽर्हद्विशाला ।
वसुर्वेद नन्दर्षि खद्वित्रिकेभ्यो... नमामि ॥ २

गभस्त्यालये शीतरश्मेर्निवासे,
ग्रहे तारके चोडुनी चैत्यगेहाः ।
असंख्या जिनेन्द्रावितेन्द्रा कृतेभ्यो...नमामि ॥ ३

वसुद्विकृते व्यन्तरेऽसंख्य चैत्येऽ-
सुराद्या र्दशानां जिनौकाः स्मृताश्च ।
ग्रहाङ्कमिताः पारगाः संति तेभ्यो... नमामि ॥ ४

सुराद्रौ नगे नैषधे नीलवन्ते,
गिरौ कुण्डले रुचके नागदन्ते
हिमाद्रौ च वैताढ्यग्राम्यार्चितेभ्यो... नमामि ॥ ५

तरौ शाल्मली जम्बू नन्दीश्वरेषु,
वखारे विचित्रे त्रिकूटे च कूटे ।
मुकूटे क्षितौ चक्रवालांतरेभ्यो... नमामि ॥ ६

स्थिते चित्रकूटेऽर्बूदे सिद्धक्षेत्रे,
समेतोज्जयन्ता-चलाऽष्टापदेषु ।
कुलाद्रौ च विन्ध्याचले रौहणेभ्यो... नमामि ॥ ७

विराटे अघाटे कुरौ मेदपाटे,
श्रिमाले च भोटे स्थिता चक्रकोटे ।
द्रहे देवकूटे द्रविडेऽर्चितेभ्यो... नमामि ॥ ८

तिलङ्गे कलिङ्गे प्रयागे च बोधे,
सुराष्ट्राङ्गबङ्गाद्र गङ्गापगासु ।
जनैः कान्यकुब्जे तमालेऽर्चितेभ्यो... नमामि ॥ ९

जले कौशले नाहले जङ्गले वा,
स्थले पल्लिदेशे वने सिंहले वा ।
नगर्युज्जयिन्यादिकास्वन्तरेभ्यो... नमामि ॥ १०

अनेनैवसंध्यत्ववन्ध्यं त्रिसंध्यं,
जिनाः संस्तुवन्ति चतुर्मासि घस्त्रे ।
भवेत्तीर्थयात्रा गृहे तिष्ठतेभ्यो... नमामि ॥ ११

इति शाश्वतमुख्यविभोः स्तवनं,
रचितं लचितं सुगुणैः प्रवरम् ।
परिरञ्जितदक्ष सभानिकरं,
कुरुतां शुभवीर सुखं सखरम् ॥ (तोटक) १२

पू.आ.श्री हीरविजयसूरिशिष्यविरचितम्

## ५४. ॥ "श्रीसिद्धाद्रिस्तोत्रम्" ॥

(वसन्ततिलका)

श्री पुण्डरीकगणभृत्प्रथमं प्रपेदे
यं पुण्डरीकमिवमञ्जुलचञ्चरीकः ।
यं स्तौति पुण्डरीकिणीनगरीस्थसार्वः
तं पुण्डरीकगिरिनाथमहं नमामि ॥ १

यत्राऽभवन् जिनगणेश्वर साधुसाध्व्यः
सङ्घाः प्रशान्तदुरिता बहुकोटि सङ्ख्याः ।
तेनेदमास्पदमहो विमलं प्रसिद्धं
युक्ताह्वयं विमलशैलमहं स्तुवे तम् ॥ २

पापं व्यपोहति करोति समृद्धिभावं,
दुक्खं छिनत्ति विपुलां श्रियमातनोति ।
पुण्यं दधाति वितनोति समीहितानि
दृष्टोप्यसौ गिरिपतिः शुभदर्शनेन ॥ ३

तस्योपरि प्रवरतीर्थपतिवृषाङ्को
मुख्यो जिनेषु स यथागिरिषु प्रसिद्धः ।
तत्पादपूजनपरा भुवि ये नरा स्युः
तेषां क्रमौ त्रिभुवनान्यपि पूजयन्ति ॥ ४

नो व्याधिराधिरपि दुष्टभुजङ्गमा नो,
नो शाकिनी न परमेर्चिगणो न चाम्भः ।
नो वैरिणो न च नृपाः परितापयन्ति
सिद्धाद्रिमण्डनयुगादिजिनप्रसादात् ॥ ५

चिन्तामणिः सुरतरूः सुरधेनुकाम-
कुम्भौ सुराश्च निखिला मयि सुप्रसन्नाः ।
जाताः स्वयं प्रबलसाधनयन्त्रिता वा,
त्वद् दर्शनेन भवसन्ततिदुर्लभेन ॥ ६

अस्मिन् भवे परभवे निखिलेऽपि देव !
पापानि यानि विहितान्यहितप्रदानि ।
वाक्कायमानसभवानि मयातिमौढ्यात्
त्वद् दर्शनेन विरलानि भवन्तु तानि ॥ ७

सूरीशहीरविजयस्य गुरोः प्रसादा-
दित्थं स्तुतः सुविनयेन युगादिदेवः ।
शत्रुञ्जयाद्रिशिखरे मुकुटोपमानो
देयादसौ विपुलमञ्जुलमङ्गलालीः ॥ ८

पूज्यपाददेवनन्दीकृता

## ५५. ॥ श्रीनिर्वाणभूमिस्तुतिः ॥

(वसन्ततिलका)

यत्रार्हतां गणभृतां श्रुतपारगाणां
निर्वाणभूमिरिह भारतवर्षजानाम् ।
तामद्य शुद्धमनसा क्रियया वचोभिः
संस्तोतुमुद्यतमतिः परिणौमि भक्त्या ॥ १

कैलासशैलशिखरे परिनिर्वृतोऽसौ
शैलेशिभावमुपपद्यवृषो महात्मा ।
चम्पापुरे च वसुपूज्यसुतः सुधीमान्
सिद्धिं परामुपगतो गतरागबन्धः ॥ २

यत्प्रार्थ्यते शिवमयं विबुधेश्वराद्यैः
पाखण्डिभिश्च परमार्थगवेषशीलैः ।
नष्टाष्टकर्मसमये तदरिष्टनेमिः
सम्प्राप्तवान् क्षितिधरे बृहदुज्जयन्ते ॥ ३

पावापुरस्य बहिरुन्नतभूमिदेशे
पद्मोत्पलाकुलवतां सरसां हि मध्ये ।
श्रीवर्द्धमानजिनदेव इति प्रतीतो
निर्वाणमाप भगवान्प्रविधूतपाप्मा ॥ ४

शेषास्तु ते जिनवरा जितमोहमल्ला
ज्ञानार्कभूरिकिरणैरवभास्य लोकान् ।
स्थानं परं निरवधारितसौख्यनिष्ठं
सम्मेदपर्वततले समवापुरीशाः ॥ ५

आद्यश्चतुर्दशदिनैर्विनिवृत्तयोगः
षष्ठेन निष्ठितकृतिर्जिनवर्द्धमानः ।
शेषा विधूतघनकर्मनिबद्धपाशाः
मासेन ते यतिवरास्त्वभवन्वियोगाः ॥ ६

माल्यानि वाक्स्तुतिमयैः कुसुमैः सदृब्धा-
न्यादाय मानसकरैरभितः किरन्तः ।
पर्येम आदृतियुता भगवन्निषद्याः
सम्प्रार्थिता वयमिमे परमां गतिं ताः ॥ ७

शत्रुञ्जये नगवरे दमितारिपक्षाः
पाण्डोः सुताः परमनिर्वृतिमभ्युपेताः ।
तुङ्ग्यां तु संगरहितो बलभद्रनामा
नद्यास्तटे जितरिपुश्च सुवर्णभद्रः ॥ ८

द्रोणीमति प्रबलकुण्डलमेण्ढ्रके च
वैभारपर्वततले वरसिद्धकूटे ।
ऋष्याद्रिके च विपुलाद्रिबलाहके च
विन्ध्ये च पोदनपुरे वृषदीपके च ॥ ९

सह्याचले च हिमवत्यपि सुप्रतिष्ठे
दण्डात्मके गजपथे पृथुसारयष्टौ ।
ये साधवो हतमलाः सुगतिं प्रयाताः
स्थानानि तानि जगति प्रथितान्यभूवन् ॥ १०

इक्षोर्विकाररसपृक्तगुणेन लोके
पिष्टोऽधिकां मधुरतामुपयाति यद्वत् ।

तद्वच्च पुण्यपुरुषैरुषितानि नित्यं
स्थानानि तानि जगतामिह पावनानि ॥ ११

इत्यर्हतां शमवतां च महामुनीनां
प्रोक्ता मयात्र परिनिर्वृतिभूमिदेशाः ।
ते मे जिना जितभया मुनयश्च शान्ताः
दिश्यासुराशु सुगतिं निरवद्यसौख्यम् ॥ १२

## ५६. ॥ श्रीजिननिर्वाणभूमिस्तुतिः ॥

(विषमवृत्तम्)

सप्तत्यधिकशतप्रियधर्मक्षेत्रगततीर्थकरवरवृषभान् ।
भूतभविष्यत्सम्प्रतिकालभवान्भवविहानये विनतोऽस्मि ॥ १

अस्यामवसर्पिण्यां वृषभजिनः प्रथमतीर्थकर्ता भर्ता ।
अष्टापदगिरिमस्तकगतस्थितो मुक्तिमाप पापान्मुक्तः ॥ २

श्रीवासुपूज्यभगवान् शिवासु पूजासु पूजितस्त्रिदशानां ।
चम्पायां दुरितहरः परमपदं प्रापदापदामन्तगतः ॥ ३

मुदितमतिबलमुरारिप्रपूजितो जितकषायरिपुरथ जातः ।
बृहदूर्जयन्तशिखरे शिखामणिस्त्रिभुवनस्य नेमिर्भगवान् ॥ ४

पावापुरवरसरसां मध्यगतः सिद्धिवृद्धितपसां महसां ।
वीरो नीरदनादो भूरिगुणश्चारुशोभमास्पदमगमत् ॥ ५

सम्मदकरिवनपरिवृत-सम्मेद-गिरीन्द्रमस्तके विस्तीर्णे ।
शेषा ये तीर्थकराः कीर्तिभृतः प्रार्थितार्थसिद्धिमवापन् ॥ ६

शेषाणां केवलिनामशेषमतवेदिगणभृतां साधूनाम् ।
गिरितलविवरदरीसरिदुपवनतरु-विटपिजलधिदेहशिखासु ॥७

मोक्षगतिहेतुभूतस्थानानि सुरेन्द्ररुन्द्रभक्तिनुतानि ।
मङ्गलभूतान्येतान्यङ्गीकृतधर्मकर्मणामस्माकम् ॥ ८

## ५७. ॥ श्रीसमवसरण-स्तोत्रम् ॥

(उपजाति)

सत्केवलज्ञानमहाप्रभाभिः,
प्रकाशिताशेषजगत्स्वरूपम् ।
स्तवीमि तं वीरजिनं सुरौघा,
यद्देशनासद्मनि चक्रुरेवम् ॥ १

आयोजनं भूमितलस्य सन्मा-
र्जनं व्यधुः वायुकुमारदेवाः ।
तस्यैव गन्धोदकवर्षणेन,
रजःप्रशान्तिं विदधुश्च मेघाः ॥ २

सद्रत्नमाणिक्यशिलाभिरिद्धं,
विधाय तत्राऽचलपीठबन्धम् ।
किरन्ति पुष्पाणि विचित्रवर्णा-
न्यस्योपरि व्यन्तरराजवर्याः ॥ ३

वैमानिका ज्योतिषिकाश्च तत्र,
सद्भक्तिभाजो भुवनाधिपाश्च ।
वप्रत्रयं रत्नसुवर्णरूप्य-
मयं विचक्रुर्द्युतिभासिताऽऽशम् ॥ ४

आभ्यन्तरे रत्नमये विशाले,
साले विरेजुः कपिशीर्षकाणि ।
सुरैः प्रक्लृप्तानि मणीमयानि,
सद्दर्पणाः किं ननु धर्मलक्ष्म्याः ॥ ५

विमध्यमे रत्नमयानि तानि
हैमानि चामूनि बहिस्थवप्रे ।
गव्यूतमेकं धनुषां शतानि,
षडेव तेषामियमन्तरुर्वी ॥ ६

बाहुल्यमेषां धनुषां त्रयस्त्रि-
शदेक[श्च]हस्तोऽङ्गुलकानि चाष्टौ ।
लसच्चतुर्द्वारविराजितानां,
तथोच्चता पंचधनुःशतानि ॥ ७

भूमेः सहस्राणि दशैव गत्वा,
सोपानकानां प्रथमोऽत्र वप्रः ।
धनूंषि पंचाशदतः समा भूः,
सोपानकानां हि ततोऽयुतार्द्धे ॥ ८

द्वितीयवप्रोऽत्र तदन्तरेऽभूत्,
विधिस्तु पूर्वोदित एव सर्वः ।
ततस्तृतीयोऽपि बभूव वप्र-
स्तदन्तरं वा मणिपीठबंधात् ॥ ९

इत्थं सहस्रा दश पञ्च पञ्च ।
क्रमेण शालत्रयसंगतानाम् ।

सोपानकानां प्रमितिस्त्वमीषां,
करैकमानोन्नति-विस्तराभ्याम् ॥ १०

प्रमाणमेतत् सकलं विबोध्यं,
निजैर्निजैरेव करैर्जिनानाम् ।
देहादिवैचित्र्यत एव तेषां,
न चान्यथा सङ्गतिमङ्गतीदम् ॥ ११

भूमितलादूर्ध्वमथार्द्धयुक्त-
गव्यूतयुग्मं परितोऽधिरुह्य ।
तृतीयवप्रे बहुमध्यदेशे,
ज्योतिर्जटालं मणिपीठमासीत् ॥ १२

विष्कम्भतश्चापशतद्वयं त-
दौन्नत्यतः श्रीजिनदेहमानम् ।
विरेजुरस्योपरि चारुसिंहा-
सनानि चत्वारि मणीमयानि ॥ १३

मणीमयच्छन्दकसङ्गतानि
चाऽशोकवृक्षं परितः स्थितानि ।
छत्रत्रयेणोर्ध्वगतेन चन्द्र-
प्रभासमानद्युतिना युतानि ॥ १४

सुपर्वसञ्चारितपङ्कजेषु,
न्यासं दधानः क्रमपङ्कजानाम् ।
सिंहासनं स्वामिवरोऽथ भेजे,
पूर्वामुखं पूर्वगिरिं यथांशुः ॥ १५

ततो व्यधीयन्त च शेषदिक्षु,
सद्व्यन्तरैस्तत् प्रतिरूपकाणि ।
चतुर्मुखस्तैर्भगवान् विरेजे,
चतुर्विधं धर्ममिवोपदेष्टुम् ॥ १६

तत् पार्श्वयोर्यक्षवरा बभूवुः,
करे धरन्तो वरचामराणि ।
अभ्रंलिहाः स्वामिपुरो विरेजु-
र्महाध्वजा रत्नमयोच्चदण्डाः ॥ १७

पुरो जिनेन्द्रस्य च धर्मचक्र-
चतुष्टयी चारुरुचिर्बभासे ।
प्रख्यापयन्ती भविनां मनस्सु,
सद्धर्मचक्रित्वमपूर्वमस्य ॥ १८

आग्नेयका मुख्य विदिक्षुः तिस्रः,
प्रत्येकमस्थुश्च सभाः क्रमेण ।
सुसाधवः कल्पसुराङ्गनाश्च,
साध्व्यश्च धर्मश्रवणैक-निष्णाः ॥ १९

ज्योतिःपतीनां भुवनाधिपानां,
सद्व्यन्तराणां च विलासवत्यः ।
त्रयोऽपि ते देववरास्ततोऽपि,
वैमानिका मर्त्यवराः स्त्रियश्च ॥ २०

तिर्यग्वराः सिंहमृगाहिबभ्रु-
मुख्याः प्रशान्ता द्वितीयेऽथ वप्रे ।

सन्त्यक्तवैरा भगवद्वचांसि,
पपुः कणेहत्य कृतोर्ध्ववक्त्राः ॥ २१

यानानि वप्रे तृतीये बभूवु-
र्नियंत्रणा नो विकथा भयं न ।
न मत्सरस्तत्र परस्परेणाऽ-
भवज्जिनेन्द्रस्य कटप्रभावः ॥ २२

आसन् प्रतिद्वारमिहावलम्बि,
ध्वजानि चञ्चन्मणितोरणानि ।
पञ्चालिका मङ्गलकानि चाष्टौ,
सत्पूर्णकुम्भा वरधूपघट्यः ॥ २३

माणिक्यवप्रे प्रतिहाररूपः,
सौधर्मनाथो वनजाधिपश्च ।
द्वारेऽवतस्थे भुवनाधिपोऽथ,
ज्योतिःपतिस्ते तु विचित्रवर्णाः ॥ २४

सौवर्णवप्रे विजया जया च,
जिताभिधानाऽप्यपराजिता च ।
द्वारस्थिताः शस्त्रकरास्तथैताः,
दौवारिकत्वं विदधुर्जिनस्य ॥ २५

वप्रे बहिस्तुम्बरुनामदेवः,
खट्वाङ्गनामा पुरुषोऽस्ति माली ।
एते प्रतिद्वारमुदात्तदण्डाः,
क्रमाज्जटामण्डितमौलयोऽस्थुः ॥ २६

मणीमयच्छन्दक एव आसी-
दीशानकोणे जिनविश्रमाय ।
माणिक्यवप्रस्य बहिः सुरौघै-
र्विनिर्मितः किं नु निजैर्महोभिः ॥ २७

सद्देशनासद्मनि वृत्तरूपे,
बहिस्थवप्रस्य किल प्रदेशे ।
द्वे द्वे भवेतां वरपुष्करिण्यौ,
कोणेषु चैका चतुरस्रके स्यात् ॥ २८

गायन्ति नृत्यन्ति च देवसङ्घा,
जिनेन्द्रसन्दर्शनतोऽतिहृष्टाः ।
प्रमोदमन्तःस्थमनासवन्तो,
धर्तुं विमुञ्चन्ति च सिंहनादान् ॥ २९

इन्द्रादिकः कोपि महर्द्धिकोऽथ,
समेति देवो यदि भक्तियुक्तः ।
सर्वं तदैकः कुरुते स यद्वा
भक्तेः प्रभुत्वस्य च किं न साध्यम् ? ॥ ३०

अजातपूर्वः किल यत्र यत्र,
महर्द्धिकः कोपि समेति देवः ।
इदं पुनस्तत्र भवेदवश्यं,
सुप्रातिहार्याणि निरन्तरं स्युः ॥ ३१

जगच्चमत्कारकरैश्चतुस्त्रि-
शताभिरामातिशयैः समग्रैः ।

निर्वाणमार्गं प्रथयन् जनानां,
चिरं जगत्यां जयतात् जिनेन्द्रः ॥ ३२

स सर्वभाषानुगया जिनेन्द्रः,
सद्भाषया योजनविस्तरिण्या ।
सम्प्रीणयामास समग्रलोकं,
कोकं यथाऽहर्पतिरस्तशोकम् ॥ ३३

इत्थं श्रीजिनराजवीर ! भवतः सम्यग् विधाय स्तवं ।
यत्पुण्यं समुपार्जितं किल मया भावस्य नैर्मल्यतः ।
तेनाऽयं सकलोऽपि भव्यनिवहस्त्वच्छासने भक्तिमान्,
भूत्वा भद्रशतान्यवाप्य च परामालम्ब्य तां निर्वृतिम् ॥ ३४

(शा.वि.)

पू.आ. श्री सिद्धसेनसूरिविरचितम्

# ५८. ॥ श्रीसकल-तीर्थ-स्तोत्रम् ॥

(आर्या)

संसार-तारयाणं तियसासुर-खयर-वंदिय-कमाणं ।
तित्थयराणं तिहुयण-चेइय-भवणे नमंसामि ॥ १

बत्तीस-सय-सहस्सा जिणभवणाणं नमामि सोहम्मे ।
अट्ठावीसं लक्खा वंदे ईसाणकप्पम्मि ॥ २

बारस सणंकुमारे लक्खा वंदामि अट्ठ माहिंदे ।
चत्तारि बंभलोए सासय-जिणनाह-भवणाइं ॥ ३

पण्णास-सहस्साइं लंतयकप्पम्मि भावओ वंदे ।
चत्तालीसं सुक्के छच्च सहस्सा सहस्सारे ॥ ४

आणय-पाणयकप्पे दोसु वि दो दो सयाइं वंदामि ।
आरण-अच्चुयकप्पे सयं दिवड्ढं दिवड्ढं तु ॥ ५

एगारसुत्तर-सयं हिट्ठिम-गेविज्जगेसु वंदामि ।
सत्तुत्तरं च मज्झे सयमेगं उवरिमे वंदे ॥ ६

पंचेव अणुत्तराइं एवं वंदामि उड्ढ-लोगम्मि ।
तेवीस सत्तनउइ-सहसा चुलसी य लक्खाइं ॥ ७

भवणवईणं मज्झे असुरकुमारेसु लक्ख चउसट्ठी ।
चुलसीइ सय-सहस्सा नागकुमारेसु वंदामि ॥ ८

बावत्तरिं च लक्खा जिण-भवणाणं सुवण्ण-भवणेसु ।
छण्णवइ-सय-सहस्सा वायुकुमारेसु वंदामि ॥ ९

दीव-दिसा-उदहीणं विज्जुकुमारिंद-थणिय-अग्गीणं ।
छावत्तरि छावत्तरि लक्खा छण्णं पि वंदामि ॥ १०

एवमहोलोए य भवणिंद-नमंसियाइं भावेणं ।
बावत्तरि-लक्ख-जुआ कोडीओ सत्त वंदामि ॥ ११

सासय-जिण-भवणाइं वंदे नंदीसरम्मि दीवम्मि ।
बावन्न मणहराइं तियसासुर-खयर-नमियाइं ॥ १२

जोयण-सय-दीहाइं पण्णासं विच्छडाइं विउलाइं ।
बावत्तरि-उच्चाइं वंदामि जिणिंद-भवणाइं ॥ १३

पंच धणुस्स य कंचण परमट्ठसएहिं परम-रम्माइं ।
पत्तेयं वंदामि बत्तीस सुरिदं-महियाइं ॥ १४

चउरो कुंडल-वलए चउरो वंदामि रुयग-वलयम्मि ।
चत्तारि माणुसोत्तर-वलए वंदामि जिण-भवणे ॥ १५

इसुयार-पव्वएसु वंदे चत्तारि चेइयहराइं ।
मेरुसिहरेसु पंचसु अ(पण?)सीइं वंदामि भावेणं ॥ १६

जिण-निलयाणं वीसं वंदे गयदंतसेल-सिहरेसु ।
दस (दुसु)कुरुदुमेसु वंदे तीसं वासहर सेल-सिहरेसु ॥ १७

वंदे असीइ-जिण-मंदिराइं वक्खार-पव्वय-वरेसु ।
सत्तरि-सयं च पुण्णं वेयड्ढ-नगेसु वंदामि ॥ १८

एवं च तिरिय-मज्झे अट्ठावन्नं सयाइं चत्तारि ।
जोइस-वंतरियाणं संखाइयाइं य वंदामि ॥ १९

सत्ताणवइ सहस्सा लक्ख छप्पन्न य अट्ठ कोडीओ ।
चउ-सय-बियासि तिय लोए चेइयं वंदे ॥ २०

सिरि-भरह-चक्कवइणा अट्ठावय-पव्वयस्स सिहरम्मि ।
कारवियं अइ-रम्मं चउविस-जिणालयं वंदे ॥ २१

सम्मेयसेल–सेतुंज्ज–उज्जिंते अब्बुयम्मि चित्तउडे ।
जालउरे रणथंभे गोवालगिरिम्मि वंदामि ॥ २२

सिरि–पासणाह–सहियं रम्मं सिरि–निम्मियं महाथूभं ।
कलिकाले वि सुतित्थं महुरानयरीसु वंदामि ॥ २३

रायगिह–चंप–पावा–अउज्झ–कंपिल्ल–हत्थिणपुरेसु ।
भद्दिलपुर–सोरीपुर–अंगइया–कण्णउज्जेसु ॥ २४

सावत्थि–दुग्गमाइसु वाणारसि–पमुह पुव्व–देसेसु ।
कम्मग–सिरोहमाइसु भयाण–देसम्मि वंदामि ॥ २५

रज्जउर–कुंडणीसु य वंदे गज्जउर–पंचवाडेसु ।
तलवाड–देवराउर उत्तर–देसम्मि वंदामि ॥ २६

खंडिल–डिडुआणय–नराण–हरसउर–खट्ट–मेडत्ते ।
नागउर–सुद्धदंतिसु संभरि–देसम्मि वंदामि ॥ २७

पल्लि–संडेरय–नाणएसु कोरंट भिन्नमालेसु ।
वंदे गुज्जर–देसे आहाडाईसु मेवाडे ॥ २८

उवएस–किराडउए विजयपुराईसु मरुम्मि देसम्मि ।
सच्चउर–कुंड(गुड्ड)राइसु पच्छिम–देसम्मि वंदामि ॥ २९

थारावद्दय–वायड–जालोहर–नगर–खेड–मोढेरे ।
अणहिल्लवाडनयरे वड्डावल्लीसु बंभाणे ॥ ३०

निहय–कलिकाल–मल्लं साइसयं सयल–वाहि थंभणयं ।
थंभणयपुर–निवासं पासं वंदामि भत्तीए ॥ ३१

कच्छे भरुयच्छम्मि य सोरट्ठ–मरहट्ठ–कुंकणथलीसु ।
कलिकुंड–माणखेडे दक्खिण–देसेसु वंदामि ॥ ३२

धारा–उज्जेणीसु य मालवदेसम्मि पारियत्ते य ।
वंदामि मणुअ–विहिए जिण–भवणे सव्व–देसेसु ॥ ३३

इय पंचसु भरहेसुं एरवएसुं महाविदेहेसु ।
संखिज्ज–जिणहराइं मणुएहिं कयाहिं य वंदामि ॥ ३४

कित्तिम–अकित्तिमा वि य तित्थयरा वंदिया मए सव्वे ।
जिण–भवण–सन्निविट्ठा साहारण–भत्तिराएणं ॥ ३५

भरहम्मि मणुअ–विहिया महिया मोहारि–दप्प–माहप्पा ।
सिरि–सिद्धसेणसूरिहिं संथुआ सिव–सुहं दिंतु ॥ ३६

पू.आ. श्री मुनिप्रभसूरिकृता

## ५९. ॥ श्रीअष्टोत्तरीतीर्थमाला ॥

जे जग बंधण(व) तिहुयण ताया, तीह जिणेसर पणमीय पाया,
काया करिस पवित्त ।
तित्थ जि महि मंडलि विक्खाया, पणमइं सुरनर किन्नर राया
भुणिसु बंधि ते थुत्त ॥ १

पहिलउ रिसह नमुं विमलाचलि, नंदीवद्र्धन भंजइ भव भलि,
बीजउ भवण पईवउ ।
बिंहु मूरति गणहरि संजुत्तउ, पुण्य कणक श्रीकलश निरुत्तउ,
पेखि अमीय रस पीवउ ॥ २

भुवन तिलउ कोइलापुरि पामी, सोपारइ सिरि जीवित सामी,
गूडरु गुपितु जुहारइं ।
तिहूअण मंगल कलसु जि पामइं, कासद्रिहि भाविहिं सिर
नामइं, दुग्गइ गमणु निवारइं ॥ ३

अवझ नयरि सक्किहिं अवतारिय, तक्षशिला बाहूबलि कारिउ,
बडइ नगरि भरतेसि ।
माणिक सामि मदोअरि थापिउ, नगरकोटि अंबाइं आपिउ,
राय सुसरमा रेसि ॥ ४

जूनइगढि जिणु मेइणि मुकुटो, उग्रसेणि थापिउ प्रभु प्रगटो,
नंदीवद्‌र्धन विमले ।
अवरवि तित्थ पमुह जे गोमटि, रिसहि अलंकीय ते मन
ऊलटि, कवि पणमउं सिर कमले ॥ ५

अमीय कुंड जो जीवित सामी, संति जिणह सित्तुंजि सिर नामी
सफलउ जनमु करेसो ।
कक्किंधां लंका हत्थिणाउरि, नमीउ संति गामिहि रयणाउरि,
दूष जलंजलि देसो ॥ ६

ऊजलगिरि सिरि नेमि जिणंदह, मदन मूरति सोहग तरु कंदह,
सुरनर गाअइं गीत ।
कणय बलाणइ नामि अमियनिहि, पांपागढि आठइ पुन्नह
निहि, नमीसराइ अतीत ॥ ७

खंभनयरि पायालह लिंगो, अरिठनेमि अणहिलपुर रंगो,
आरासणि अवतारो ।
महुर नयरि सोरीपुर मंडणु, पाडलि पींपलि छइ दुह खंडणु,
बारवइं भवतारो ॥ ८

तित्थ अलंकिय जे प्रभु पासिहिं, ते हिव भणिसु चित्त उल्हासिहिं,
नामि सहीय पुण केवि ।
थंभण पासनाहु भव भयहरु, करहेड़इ सामी उवसगहरु,
चरचिसु चंदण लेवि ॥ ९

विश्व कप्पतरु सामी फलवधि, नमउ नामि अज्जाहरि नवनिधि,
बेटिहिं घृतकल्लोलो ।
मंगलपुर नमिवउ नवपल्लवु, सोवनगिरि समरी सफलउ भवु,
करिवउ कूंकूं लोलो ॥ १०

नवखंडु नामि सामि वेलाउरि, तिहुयण नउडु पासु जीराउलि,
सामिणिपुरि चारूपे ।
संखेसरि सेरीसे लोडणु, आरासणि अखइं दुह मोडणु,
तेन पड़इं भव कूपे ॥ ११

वींझ गिरिहिं पणमउ सिरि गुपतो, महिंद गिरिहिं छाया फण सपता, हिमगिरि मंत्रह राओ ।
घंटाकर्ण्णु वीरश्री परबति, महिंद कालु पायालह चक्रवति,
ढीलीं रावण राओ ॥ १२

ॐकार गिरिहिं सहसप्फणु, कुकुडेसरु मोहइ जग गरु मणु,
कलि गिरि सिरि कलिकुंडो ।
अहिछत्ता छइ तिहुयण भाणुं, अंतरीखु श्रीपुरि वरकाणुउं,
नागद्रहि नवखंडो ॥ १३

डाकुलि गामि नमउ भीमेसरु, वाणारसि पुष्करु परमेसरु
चंपां नामि असोगो ।

महुराउरि कप्पदुम ठाओ, पाटणि पंचासर नउ राओ,
फेड़इ पावह रोगो ॥ १४

भणिसु तित्थ हिव वीरह केई, जीवंतइं प्रभि थाप्या चेई,
कहीइ जीवितसामि ।
देवाहिवु हूउ पाटणि वेभइ, कुगति तणा जे षइ बेभय,
मालवि भाइल सामि ॥ १५

महण खत्ती कुंडह गामिहिं, राजग्रहि पावापुरि ठामिहि,
देवगिरिहिं गोवाले ।
महुअइ मूंडथलइ मड्डाहड़ि मोढरइ, ब्रह्माणिहि वायड़ि,
संडेरइ श्रीमाले ॥ १६

पंचासरि सिरि पालीतांणइ, कोरंटइ नादीयइ दीआणइ,
ऊएसे जिणु वीरो ।
चेत्रे हाथउंडी हरसउरिहिं, बीजापुरि वांदउं साचउरिहिं,
जिणि जीतउ हम रो ॥ १७

रिसहु संति सिरि नेमि कुमारो, पासुवीरु जाणइ संसारो,
पंचइ तीरथ सार ।
पांचइ पंचेन्द्रिय वसि कार, पंचइ पंच महव्वय धार,
पंचमगति दातार ॥ १८

अवर जिणह बहु तित्थ न जाणउ, एकेक.... प्रमाणुं,
कहीउ करिसु आणंदो ।
तारणगढि प्रभु अजिय जिणेसरु, सावत्थी संभवु परमेसरु
.....मती अभिनंदो ॥ १९

सिंहलदीपि सुमति जे पूजइं, पउमप्पह भइतग सवि धूजइ,
कोसंबी अवतारो ।
महुरा नयरि थूभु सुपासह, चंदप्पहु जिणु खेव प्रभासह,
मंडणु ससिहर सारो ॥ २०

पुष्पदंतु कायंदी मागिहिं, सीतल सामि नमउ सुप्रयागिहिं,
मलयाचलि सेयंसो ।
वासुपुज्ज नमउं सिर कमलो, चंपा कपिलपुर सिरि विमलो,
अणंतु अवझ अवयंसो ॥ २१

रयणवाह पुरि सामिउ धम्मो, गजपुर नयरि कुंथुं जिण जम्मो,
नागउरिहिं अरनाहो ।
मिथिला नयरि मल्लि जिणु नंदइ, मुणिसुव्वउ भरुयच्छि छिंदइ,
अवझा नमि भव दाहो ॥ २२

तित्थ सहीय इय जिण इगुणीस, चउवीसइ हुइं पंचिहिं मीस,
पूरइ जगह जगीस ।
सम्मेतहगिरि सिरि छइं वीस, अट्ठावइं वंदउं चउवीस, जिम हुइ
सहला दीस ॥ २३

चउवीसहं जिण रईय रसाल, अट्ठोतर सय तित्थहं माल,
मुनिप्रभसूरि सुढाल ।
धरइं जि धरमी कंठि त्रिकाल, सोनइं रूपइं रयणि ज्ञमाल,
लहइंति लच्छि विसाल ॥ २४

पू.आ.श्री कीर्तिरत्नसूरिविरचिताः

## ६०. ॥ चत्तारि–अट्ठ–दस षडर्थाः ॥

चत्तारि जिणवीसं ठाणेसु सिद्धसंगमणुपत्ता ।
अट्ठ दो समिलिया वीसे वंदामि सम्मेए ॥ १

रिसहाणणाह सासय चत्तारि सासउ वंदे ।
अट्ठ दस दोइ वीसं गए(य) दंतट्ठिएसु वंदामि ॥ २

चउ गुरु अट्ठ अडयाला दस दो बारस तहा सिट्ठी ।
एवं चउमुह जिण चेइएसु वंदामि जिण नयरं ॥ ३

अट्ठ दस दोइ वीसे, ठाणे आराहिऊण मे सिद्धा ।
नामाइ जिण चउरो तेसिं वंदामि भत्तीए ॥ ४

चत्तारि सासयउ पडिमा वंदामि तिव्व ।
अट्ठ दस दोइ वीसं वट्ट वेयड्ढेसु चेइसु ॥ ५

अट्ठ दस दोइ वीसे ते चउगुणिया सवे असी संखा ।
एवं जिण भवणाइं वंदेहं पंच मेरूसु ॥ ६

सुसहर कय नव अत्था, तदुवरि सिरिकित्तिरयणसूरीहिं ।
रइआ इमेत्थ अत्था, खरतरगणजलधिरयणेण ॥ ७

पू. आ. श्रीदेवेन्द्रसूरिविरचितः

## ६१. ॥ 'चत्तारिअट्ठदस 'विवरणसूचकः स्तवः॥

चत्तारि अट्ठ दस दो अ अट्ठावयस्स सिहरम्मि ।
भरहविणम्मियपासायसंठिए जिणवरे वंदे ॥ १

चउवीसं परिमाणं अट्ठावयमेहलासु वंदामि ।
चत्तारि १ अट्ठ २ दस दो अ ३ उवरिममज्झिमेसु हिट्ठेसु ॥ २

दाहिणदारे चउरो पच्छिमए अट्ठ उत्तरे दस य ।
पुव्वे दो चउवीसं अट्ठावयपव्वए वंदे ॥ ३

अण्णे भणंति-उवरिममेहलाए चत्तारि मज्झिमाए ।
अट्ठ हिट्ठिमाए दस दो अ मेलिआ चउव्वीसं ॥ ४

चउ अट्ठगुणा बत्तीसगा य दस दुगुण हुंति वीसा य ।
एवं जिणबावन्नं वंदे नंदीसरे दीवे ॥ ५

चत्ता अरओ जेहिं 'चत्तारि' पयस्स होइ अत्थो अ ।
अट्ठ दस दो अ मिलिआ समेअसिहरम्मि वंदामि ॥ ६

चत्ता अरओ जेहिं 'चत्तारि' पयस्स होइ अत्थो अ ।
अट्ठ दस दो अ मिलिआ जहन्नपय वीस वंदामि ॥ ७

चत्तारि जहापुव्विं दस अट्ठगुणा असी हवइ एवं ।
पुण वि असी दोगुणिआ सट्ठिसयं नमह विजएसुं ॥ ८

चउअट्ठ भवे बारस ते दसगुणिआ सयं भवे वीसं ।
ते दोहिं गुणिज्जंता दुन्नि सया हुंति चालीसा ॥ ९

भरहेरवएसु जिणा चउदसवीसी उ वट्टमाणा उ ।
मणवयकाएण तिहा तेसिं पणमामि भत्तीए ॥ १०

चत्तारि जहापुव्विं अट्ठ दस (य) दो हवंति अट्ठार ।
वीसस्स य चउभागो तेवीसं विमलगिरि वंदे ॥ ११

चउ उड्ढलोअपडिमाऽणुत्तर १ गेविज्ज २ कप्प ३ जोइसए ।
अट्ठेव वंतरेसुं ८ दस पडिमा भवणवासीसुं १० ॥ १२

धरणियलम्मि दुन्नि अ सासयरूवा असासया ते ऊ ।
इअ चउव्वीसं पडिमा वंदे तिअलोअमज्झम्मि ॥ १३

अट्ठ दस दो वि अट्ठार १८ चउग्गुणा ते बहुत्तरी होइ ।
भूअभविस्सा संपइ तिअ चउवीसीण वंदामि ॥ १४

चत्तारि ४ य पढमपए अट्ठट्ठगुणा य हुंति चउसट्ठी ६४ ।
दस दसगुणिया य सयं १००
दो जुअ सव्वेवि सत्तरिसयं १७० ॥ १५

उक्किट्ठकालसमए भरहेरवयमहाविदेहेसुं ।
पन्नरसकम्मभूमिसु समकालुप्पण्णं वंदामि ॥ १६

जो एवं तिक्कालं वंदइ देविंदवंदिअजिणिंदे ।
सो पावइ णिच्चसुहं निव्वाणं जगगुरू बिंति ॥ १७

पू.आ. श्री देवेन्दसूरिविरचितः

## ६२. ॥ श्रीशाश्वतचैत्यस्तवः ॥

सिरिउसहवद्धमाणं चंदाणणवारिसेणजिणचंदं ।
नमिउं सासयजिणभवणसंखपरिकित्तणं काहं ॥ १

जोइवणेसु असंखा सगकोडि बिसयरिलक्खभवणेसु ।
चुलसीलक्ख सगनवइसहस्स तेवीसुवरिलोए ॥ २

बावन्ना नंदीसरम्मि चउचउर कुंडले रुयगे ।
इअ सट्ठी चउबारा तिदुबारा सेसजिणभवणा ॥ ३

पत्तेयं बारेसु अ मुहमंडव-रंगमंडवे तत्तो ।
मणिमयपीढं तदुवरि थूभे चउदिसिसु चउ पडिमा ॥ ४

तत्तो मणिपीढजुगे असोग-धम्मज्झओ य पुक्खरिणी ।
पइभवणं पडिमाणं मज्झे अट्ठुत्तरसयं च ॥ ५

पडिमा पुण गरुआओ पणधणुसय लहुय सत्तहत्थाओ ।
मणिपीढे देवच्छंदयम्मि सीहासणनिसन्ना ॥ ६

जिणपिट्ठे छत्तधरा पडिमा जिणभिमुह दुन्नि चमरधरा ।
नागा भूआ जक्खा कुंडधरा जिणमुहा दो दो ॥ ७

सिरिवच्छनाभिचुच्चुअ पय-कर-केस-महि-जीह-तालुरुणा ।
अंकमया नह अच्छी अंतो रत्ता तहा नासा ॥ ८

ताराइरोमराई अच्छिदला केसभमुहरिट्ठमया ।
फलिहमया दसण वयरमय सीस विद्दुममया उट्ठा ॥ ९

कणगमयजाणु जंघा तणुजट्ठी नाससवणभालोरू ।
पलिअंकनिसण्णाणं इय पडिमाणं भवे वण्णो ॥ १०

भवणवणकप्पजोइस उववायभिसेय तह अलंकारा ।
ववसायसुहम्मसहा मुहमंडवमाइ छक्कजुआ ॥ ११

तिदुआरा पत्तेअं तो पण सम थूम सट्ठि बिंबेहिं ।
चेइयबिंबेहि समं पइभवणं बिंब असीइसयं ॥ १२

जोयण सयं च पन्ना बिसयरि दीहत्त पिहुलउच्चत्तं ।
वेमाणिय नंदीसर कुंडल रुअगे भवणमाणं ॥ १३

तीस कुलगिरिसु दस कुरु मेरुवण असीय वीस गयदंते ।
वक्खारेसुं असीई चउ चउ इसुयार मणुयनगे ॥ १४

एयाइं असुरभवणट्ठिआइं पुव्वुत्तमाणअद्धाइं ।
दलमित्तो नागाई नवसु वणेसु इओ अद्धं ॥ १५

दिग्गयगिरीसु चत्ता दहे असी कंचणेसु इगसहस्सो ।
सत्तरि महानईसुं सत्तरिसयं दीहवेयड्ढे ॥ १६

कुंडेसु तिसय असिआ वीसं जमगेसु पंच चूलासु ।
इक्कारस सयसत्तरि जंबूपमुहेसु दस तरुसु ॥ १७

वट्टवियड्ढे वीसा कोसतयद्धं च दीहवित्थारा ।
चउदस धणु सयचालीस अहियं उच्चत्तणे सव्वो ॥ १८

अडदिसि विदिसि सोलस सुहुमीसाणग्गदेवनगरीसु ।
एवं बत्तीससया गुणसट्ठिजुआ तिरिअलोए ॥ १९

एवं तिहुयणमज्झे अडकोडी सत्तवण्ण लक्खा य ।
दो य सया बासिया सासय जिणभवण वंदामि ॥ २०

सट्ठी लक्खा गुणनवइ कोडि तेरकोडि सय बिंब भवणेसु ।
तियसय विंसति इगनवइ सहस्स लक्खतिगं तिरिए ॥ २१

एगं कोडिसयं खलु बावन्ना कोडि चउनवइ लक्खा ।
चउ चत्तसहस सगसय सट्ठी वेमाणिबिंबाणि ॥ २२

पनरस कोडि सयाई दुचत्तकोडी अडवन्नलक्खा य ।
छत्तीस सहस असीआ तिहुयणबिंबाणि पणमामि ॥ २३

सिरिभरहनिवइपमुहेहि जाइं अन्नाइं इत्थ विहिआइं ।
देविंदमुणिंदथुआइं दितु भवियाण सिद्धिसुहं ॥ २४

पू.आ.श्री हरिभद्रसूरिकृतम्

## ६३. ॥ श्रीशाश्वतजिनप्रतिमास्तोत्रम् ॥

नमिउणं सव्वजिणे, सिद्धे सूरी तहा उवज्झाए ।
साहू अ जुगप्पवरे, वुच्छं जिण किलहं भत्तो ॥ १

चुलसिलक्खसहसा, सगनवइतिवीसऊड्ढलोगम्मि ।
कोडीओ सत्तलक्खा, बावत्तरि भवणवासीसु ॥ २

मेरुसु असी जिणाला, वक्खारेसु य असीय दसकुरुसु ।
वीसं गयदंतेसु, जयंति तीसं कुलगिरीसु ॥ ३

वेयड्ढेसु सत्तरिसयं च नंदीसरम्मि बावण्णा ।
उसुयरे माणुसुत्तर, कुंडल रुअगेसु चउचउरो ॥ ४

एवं सव्वग्गेणं, चउसयअडवण्णतिरिय लोगम्मि ।
वंतरजोइसमज्झे, जिणाण भवणा असंखिज्जा ॥ ५

अण्णाइं कित्तिमाइं, नगनगरपुरेसु गामगामेसु ।
विहिणा जिणभवणाइं, भत्तीए वंदिमो ताइं ॥ ६

इअ जिणहराणनिअरं, संखेवेणं मए समक्खायं ।
भावेण भणिज्जं तं, भवविरहं कुणउ भव्वाणं ॥ ७

## ६४. ॥ श्रीशाश्वतजिनस्तोत्रम् ॥

कल्लाणवल्लिजलहर पणमिय अरहंतसिद्धआयरिया ।
उवज्झायसाहु चउविह अरहंताणं थुणिस्सामि ॥ १

वंदामि उसभमजियं संभवमभिनंदणं च स(सु)मयं च ।
पउमप्पहं सुपासं जिणं च चंदप्पहं वंदे ॥ २

सुविहं च पुप्फदंतं सीयलसिज्जंस वासपुज्जं च ।
विमलमणंतं च जिणं धम्मं संतिं च पणमामि ॥ ३

कुंथुं पणमामि अरं मल्लिं मुणिसुव्वयं नमिं वि नमो ।
नेमिं सिरिपासजिणं वंदे सिरिवद्धमाणं च ॥ ४

वंदामि अणंतजिणे अईयकालम्मि जे गया सिद्धं(द्धिं) ।
ते विय वंदामि अहं तित्थयरा जे भविस्संति ॥ ५

जंबूदीव विदेहे पुक्खलविजयंमि नाहु तुज्झ नमो ।
सिरिसीमंधरजिणवर दिणयर भवियाण कल्लाण ॥ ६

तुह नाह नाममंतेण विहिचेईयभुवणसंठियाणंदं ।
उल्हसइ पुन्नरासी तुट्टंतु कम्म निगडाइं ॥ ७

सामीय तुह पयकमलं हीयइसरे संठियं सया हुज्जा ।
मुहकमले पण तुह नाह नाममहामंत परिवसउ ॥ ८

तुज्झ नमो तुज्झ नमो (तुज्झ नमो)सामिपायकमलाणं ।
वंदेइ जिणजुगंधर बाहु सुबाहुं च पणमामि ॥ ९

धाईसंडविदेहे सुजातसयंपहं नमामि अहं ।
रिसहाणंतविरीयं, भावेण नमामि तिक्कालं ॥ १०

सूरप्पहं विसालं नमामि तित्थेसरं च वज्जधरं ।
सिरि चंदाणणनामं वंदामि जिणं सयाकालं ॥ ११

पुक्खरअद्धविदेहे वंदे सिरिचंदबाहु भुजंगजिणं ।
ईसरजिण नेमिपहं सिरसा पणमामि भावेण ॥ १२

सिरिवज्जसेनमहभद्ददेवेसरजिणवरं जसरिद्धिं ।
पावमलहरणसलिलं नमामि जिणनाहपयकमलं ॥ १३

सत्तावन्नं कोडी सोहम्मे सट्ठिलक्ख जिणपडिमा ।
पंचासकोडि चालीसलक्खा वंदामि ईसाणे ॥ १४

इगवीसकोडि सट्ठीलक्खा पणमामि तईयकप्पंमि ।
कोडीचउदस चालीसलक्खा माहिंदकप्पंमि ॥ १५

बंभम्मि सत्तकोडी पणमामी वीसलक्खपडिमाणं ।
नऊएलक्खा एवं जिण पडिमं लंतके कप्पे ॥ १६

वंदे लक्खचहुत्तरि सत्तमकप्पंमि तहा सहस्सारे ।
लक्खदस असीयसहस्स जिणपडिमा सासया वंदे ॥ १७

आणइपाणइकप्पे बहुत्तरिसहस नमुं जिणपडिमा ।
आरणअच्चूकप्पे चउवन्न सहस पणमामि ॥ १८

हिठमगेविज्जतिगे दस तिन्नि सहस्स तिन्नि सयवीसा ।
बार[स]सहस्स उवरिमगेविज्जतिगम्मि............ ॥ १९

....................................अणुत्तरविमाणे ।
पंचसु पडिमा सयच्छच्च वंदामि अणंतसिद्धे य ॥ २०

सउ कोडिकोडि बावन्न चउणवइलक्ख सहसचउचत्ता ।
सत्तसय सट्ठि वंदामि जिणपडिमा उड्ढलोगंमि ॥ २१

कोडीसउ पनरकोडी वीसइलक्खाउ असुरभवणेसु ।
नागेसु वीसलखा कोडिइगवन्न कोडिसयं ॥ २२

छत्तीसकोडिसयं कोडि असीइलक्खा विज्जकुमारे सउ ।
कोडि सउइगुणवीसं सट्ठी लक्खा सुवन्ने सो ॥ २३

सउ कोडिकोडि छत्तीस अगणिकुमारेसु लक्खअसीयं च ।
बाहुत्तरि कोडिसयं लक्खा असीयं च वाएसु ॥ २४

थणीयकुमारेसु दहीदीवकुमारे दिसा कुमारेसु ।
पत्तेयं कोडिसयं छत्तीसं[ल]क्ख असीयं च ॥ २५

तिक्कालमहोलोए तेरहसयकोडिकोडि गुणनवई ।
सासयजिणवरपडिमा सट्ठीलक्खा उ वंदामि ॥ २६

चउत्तरिसय चालीस नंदीसररुयगकुंडले पडिमा ।
पणमामि पंचमेरुसु पडिमा दससहस दुन्नि सया ॥ २७

नवसहस छसय पडिमा वक्खारे असी जिणहरे [वं]दे ।
वासहर तीस चेइय छत्तीससयाइ पडिमाओ ॥ २८

इषुकारमाणसुत्तर चउ चउ भवणेसु नवसया सट्ठ ।
गयदंत वीस भवु(व)णेसु वंदे चउवीससयपडिमा ॥ २९

सत्तरिसउ वेयड्ढे सयचउरो वीससहस पडिमाओ ।
अडयालीससयाइं दिगाइचालीसभवणेसु ॥ ३०

कंचणगिरीसुवन्ने पडिमा इगुलक्ख वीससहस्सा य ।
कुरुदसगे इगलक्खं चालीससहस्स चारि सया ॥ ३१

तिन्नसइ असीय कुंडेसु पणयालसहस छसय वंदामि ।
वट्टवेयड्ढजमगेसु चउवीससयाइ पत्तेयं ॥ ३२

छन्नवइ दहनईसु चुलसी य सया य सत्तरि नईसु ।
चउतीससहस असीया वंदामि रायहाणीसु ॥ ३३

तिसहस पणसइ सत्तरस भूयगयभवणेसु ससइजिणाणं ।
चउलक्ख सहस बावीस दो सइ असीयाइ बिंबाइं ॥ ३४

जोइ सीया वाणविंतर असंखभवणेसु रायहाणीसु ।
सासय जिणवर पडिमा असंखकोडि य वंदामि ॥ ३५

अट्ठावइ चउवीसं वीसं समियसिहर वंदामि ।
सित्तुज रिसहनाहं नेमिं पणमामि उज्जंते ॥ ३६

सिरिरिसहनेमि अबूय वंदे तारंगि अजियजिणनाहं ।
मुणिसुवयं च भरुवच्छि पट्टणे देवचंदपहं ॥ ३७

स(सि)री(ख)संखेसर सेरीसय थंभणि जीराउली य नागदहे ।
फलवद्धीय तित्थेसो(सं) पासं पणमामि भावेण ॥ ३८

जिणजम्मनाणदिक्खामुत्तीअवयरणवरसभूमीसु ।
अट्ठाहिवरसि चउमासि पुव्वतिहीसं नमामि जिणे ॥ ३९

जे के वि जिणवराणं विहिचेईयभवणसंठिया पडिमा ।
ते विहु भंडारगया तिविहेण नमामि तिक्कालं ॥ ४०

हीयइ धारामि सिरसा नमामि वयसा थुणामि भत्तीए ।
सासयअसासयाणं जिणंदचंदाण पडिमाणं ॥ ४१

एवं मया संथुणिया जिणंदा पायारवंदानहि देवविंदा ।
भत्ती य भव्वा परिसंथुणंतो जिणंद जुत्ता सफली भवंतु ॥४२

एवं मयि संथुणि... समए तेण जं कयं सुकयं
तेण जिणोदय दंसण रिसह सया हुज्ज मे सफलं ॥ ४३

पू. श्री मेरुमुनिकृतम्

## ६५. ॥ श्रीनन्दीश्वरतीर्थस्तोत्रम् ॥

(प्रभातीरागेण गीयते)

सिरिनिलय जंबुदीवो य लवणायरो,
धायईसंड कालोय पुक्खरवरो ।
तयणु वारुणिवरो खीरवर घयवरो,
इक्खुवर सत्त दीवोदही अंतरो ॥ १

आठमओ दीव जयवंत जगदंतरे,
दीव नंदीसरो सत्त सागर परे ।
विविह वणराइ पुक्खरणि गिरि सोहिओ,
तत्थ जिण वंदणे मुज्झ मण मोहिओ ॥ २

कोडि सय एग तेसट्ठि कोडीजुओ,
लक्ख चुलसीय जोयण वलय पिहुलओ ।
कणयमणिखचियकिरि सग्गसिक्खिकणं,
ठविय महि(ही) मंडले सासयं मंडणं ॥ ३

तत्थ सुर रमण तह निच्च उज्जोयओ,
ललिय सययं पभो रमणरमणिज्जओ ।
चिहुं दिसिहिं चारि ए अंजणग पव्वया,
चउरसी सहसजोयण सवे उन्नया ॥ ४

भूमि दस सहस इग सहस सिरि पिहुलया,
किसणकसवट्टमय जाणि दिसि थंभया ।
ताण सिहरेसु मणिकणय चेइहरा,
दंडधयकलसरयणेहिं सोहियसिरा ॥ ५

वस्तु-

भुवण जोयण [भुवण जोयण] दीह सय एगपंचास,
पिहुलप्पणहिं उच्च सिहरि जोयण बहुत्तरि,
मणमोहण मणहरण जाणि मउड अंजणहगिरि सिरि ।
सोलह जोयण उच्च तह, अट्ठ पिहुल चउ बार,
मुहमंडव तोरणपमुह चिहुं दिसि बहु विस्तार ॥ ६

भास-

जिणहर मज्झिहिं ललियमणि, पेढिय झालझमाल
जोयण अट्ठसु उच्चपणि, जोयण सोल विसाल ।
तासु उवरि वररयणमय, पीढ अहियपरिमाण,
सुर वंदिइं छंदिइं रमए जिहां मन सुरनरखयराण तउ ॥ ७

तिहां सासय पलियंकठिय जिणपडिमा, पणमेसु,
अट्ठोत्तरसउ सुरमहिय, भाविहिं हुं अरचेसु तउ ।
रिसहेसर वर्द्धमान जिण अनइं चंदाणण देव,
तउ वारिषेण इणि नामि जगि भवियण सारइ सेव तओ ॥ ८

मणिपेढिय थूभाभिमुह च्यारि च्यारि चिहुं वारि,
तओ चउवीसासउ सवि मिलिय पइ जिणगेहि जुहारि ।
तउ जिणपडिमा सविकणयतणु अंग अंग नियवन्न,
तउ रयणघडियवरवइरमय सिरिसोहासंपन्न ॥ ९

अंजणगिरि लक्खअंतरए चिहुं दिसि वावि वियारे,
तउ लक्ख पिहुल निम्मच्छघण पूरियनिरमलवारि ।
तउ वावि चिहुं दिसि च्यारि वन, जोयण लक्ख आयाम,
तउ जोयण पुहुला पंचसय, जिहिं करइ सुर विश्राम ॥ १०

पुक्खरिणी बि बि फलिहमय दधिमुखगिरि नवरंग,
तउ जोयण पिहुल सहस्स दस चउसठि सहस उतुंग ।

किर नंदीसर जसभरिय, एह अपूरवपाल,
तउ जिणहर जिणबिंब तिह नमउं छोडवि मायासाल ॥ ११

वस्तु-

च्यारि चउगुण च्यारि चउगुण सोलपुक्खरणि,
गिरि सोल सोलह भुवण भुवणि, भुवणि पडिमा जुहारउं ।
चउवीस जुय एग सय, गाढकम्मकलिमल पक्खालउं ।
धन्न ति पंखी सुरखयर जे उड्डवि तिहि जंति,
विज्जा पंखविहूण नर चिंतिवि काइं करंति ॥ १२

भास-

अंजणगिरिविदिसिहिं दोइ दोइ,
रतिकर गिरि वावि दुविविहिं जोइ ।
पिहुलापणि जोयण दस सहस्स,
जोयण दस सय ऊंचा अवस्स ॥ १३

रयणामय दिसि पसरंतकंति,
अंजणगिरि इगि इगि आठ हुंति ।
जिण कहिय चउग्गुण ते बत्तीस,
किरि सासय झल्लरि अह आरीस ॥ १४

रतिकरगिरि सिरिसासय मंडाण,
जिणहर जिनप्रतिमा तेह जि माण ।
मुझ रयणि दिवसि ते वसइ चीति,
जाणे चित्रि लिखीया समिय भीति ॥ १५

चउ सोल मिलिय बेहुं ति वीस हुया,
बावन्न भिलिया जओ बत्तीस ।
नंदीसर बावन ए प्रसाद, सुर करइं महोछव नवलनाद ॥ १६

छ सहस चउ सय अडयाल होइ, नंदीसर प्रतिमा मान जोइ ।
ए वंदवि वीनवउं परमभावि,
निजचरणकमलस्वामी वंदावि ॥ १७

वस्तु -

पडिमपूठि पडिमपूठि छत्तधर एग,
दुहुं पासि दुइ कुंडधर, चमरढाल दुइ दुन्नि पासिहिं,
नाग भूय जक्खहं पडिम, दुन्नि दुन्नि परिकर पयासइं ।
सीहासण मणिरयणमय, छत्रत्रय सुविसाल,
परिकरसिरि सोवनकलस, जाणे रविकरमाल ॥ १८

भास-

तउ चउ रतिकर चिहुंगम ए, लक्खयोजन अंतराल,
